# संस्कृतनाटकम्

COURSE CODE: M23SN05DC

Discipline Core Course

Postgraduate Programme

Sanskrit Language and Literature



SELF LEARNING MATERIAL

SREENARAYANAGURU OPEN UNIVERSITY

# SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# संस्कृतनाटकम्

Course Code: M23SN05DC

Semester - II

SGOU

## Discipline Core Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

संस्कृतनाटकम्

**Course Code: M23SN05DC**

**Semester - II**

**Discipline Core Course**

**MA Sanskrit Language and Literature**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-971228-4-2

9 788197 122842

# DOCUMENTATION

**Academic Committee**

Dr. Shyla C.A.
Prof. M. S. Muraleedharan Pillai
Dr. J.P. Prajith
Dr. N.K. Sundareswaran
Dr. Chandrashekaran Nair
Prof. C.S. Sasikumar
Dr. K. M. Sangameshan
Dr. Sreejith T.G.
Dr. K.Unnikrishnan

**Development of the Content**

Dr. Sreeja J.

**Review**

Content : Dr. N. Sharmila, Dr. G. Pushpangadhan
Format : Dr. I.G. Shibi
Linguistics : Dr. G. Sahadevan

**Edit**

Dr. N. Sharmila, Dr. G. Pushpangadhan

**Scrutiny**

Dr. Jothilekshmi M., Dr. Vijayarajan K.U., Dr. Sreeja J., Anju J., Chitra Bhaskar

**Co-ordination**

Dr. I.G. Shibi and Team SLM

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Production**

October 2024

**Copyright**

© Sreenarayanaguru Open University 2024

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed “blended format,” a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university’s student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P. 01-10-2024

# Contents


| | |
|---|---|
| BLOCK - 1संस्कृतनाटकम् | 2 |
| Unit - 1 नाटकं दशरूपकं च - सामान्याध्ययनम्। | 3 |
| Unit - 2 संस्कृतनाटकम्, भासः, कालिदासः,भवभूतिः। | 23 |
| Unit - 3 नाटकावतरणम्। | 44 |
| Unit - 4 संस्कृते राजनैतिकनाटकानि। | 59 |
| BLOCK - 2 मुद्राराक्षसम् 1- 4अङ्काः | 73 |
| Unit - 1 मुद्राराक्षसे प्रथमः अङ्कः। | 74 |
| Unit - 2 मुद्राराक्षसे द्वितीयः अङ्कः। | 108 |
| Unit - 3 मुद्राराक्षसे तृतीयः अङ्कः। | 137 |
| Unit - 4 मुद्राराक्षसे चतुर्थः अङ्कः | 169 |
| BLOCK - 3मुद्राराक्षम् 5 - 7अङ्काः | 193 |
| Unit - 1 मुद्राराक्षसे पञ्चमः अङ्कः। | 194 |
| Unit - 2 मुद्राराक्षसे षष्ठः अङ्कः। | 223 |
| Unit - 3 मुद्राराक्षसे सप्तमः अङ्कः। | 245 |
| BLOCK - 4मत्तविलासप्रहसनम् | 267 |
| Unit - 1 प्रहसनपरिचयः। | 268 |
| Unit - 2 संस्कृते प्रहसनानि। | 276 |
| Unit - 3 मत्तविलासप्रहसनम्। | 289 |
| Model Question Paper Set-01 | 311 |
| Model Question Paper Set- 02 | 313 |


SGOU

# संस्कृतनाटकम्

# BLOCK -1

UNIT 1

# नाटकं दशरूपकं च - सामान्याध्ययनम्

## Learning Outcomes

- भारतीयरूपकाणां ज्ञानं प्राप्नोति।
- संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।
- नाट्यप्रयोगपरिचयः प्राप्नोति।
- नाटकप्रभृतीनां आस्वादनाय क्षमतोत्पादनम्।

## Background

संस्कृतसाहित्ये काव्यानां अद्वितीयं स्थानमस्ति। ततः साहित्यं नाम किमिति चिन्त्यताम्। साहित्यं इति पदस्य सहितभावः इत्यर्थः। तत्र शब्दार्थयोः सहितभाव एव साहित्यम् इति उच्यते।

'कवेः कर्म काव्यम्' इति काव्यपदस्य व्युत्पत्तिः। गद्यरूपेण पद्यरूपेण वा रसप्रकाशनपरतया प्रयुक्तानि वाक्यान्येव काव्यमिति उच्यन्ते। दृश्यं श्रव्यञ्चेति काव्यं द्विधा विभज्यते। श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दर्शनयोग्यं काव्यं दृश्यकाव्यञ्च। दृश्यकाव्यानां श्रवणयोग्यत्वमप्यस्ति। रघुवंशादीनि श्रव्यकाव्यानि, शाकुन्तलादीनि दृश्यकाव्यानि च। दृश्यकाव्यानां रङ्गमञ्चेऽभिनयद्वारा आविष्कारेणैव दर्शनयोग्यत्वसिद्धिः। तेनैव तस्य रूपकमिति नामाप्यस्ति। रङ्गे नटैः चतुर्विधाभिनयद्वारा यत्प्रयुज्यते तदेव रूपकम्। रूपकेष्वन्यतमं प्रमुखञ्च भवति नाटकम्। नटेषु अनुकार्यपुरुषाणां (कथापात्राणां) रूपं आरोप्यत इत्यतः नाटकादीनां रूपकसंज्ञा। तदुक्तं "तद्रूपारोपात्तु रूपकम्"। (सा.द.6-1) इति साहित्यदर्पणकारेण विश्वनाथाचार्येण, "रूपकं तत्समारोपात् दशधैव रसाश्रयम्।।"। (दशरूपकं 1-7) इति दशरूपककारेण धनञ्जयेन च। रूपकाणि मुख्यतया दशधा विभज्यन्त इत्यपि वयमत्र पश्यामः। नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः। नाट्यशास्त्रस्य प्रामाण्यं ज्ञातुं एतदेव पर्याप्तं भवति

यत्, रूपकाणां रचनाविषये भरतमुनेः सिद्धान्तानां व्यतिक्रमः न केनाऽप्यङ्गीक्रियते। भासनाटकेषु भरतमुनेः सिद्धान्तानां निष्कर्षतयाऽवलम्बनं न दृश्यत इत्यस्मात्, भासः भरतात्पूर्ववर्तीति मन्यत इत्यस्माभिर्दृष्टश्च। काव्येषु तज्जीवानुभूतस्य रसस्योत्पत्तिं अधिकृत्य "विभावानुभावव्यभिचारिसंयोगाद्र-सनिष्पत्तिः" (ना.शा.6/32) इति भरतमुनिना प्रोक्तं रससूत्रं अद्यापि, न केवलं नाटकस्य, अपि तु समस्त-स्यापि साहित्यप्रपञ्चस्य मार्गनिर्देशकं निकषायमाणञ्च विराजते। भरतमुनेः नाट्यशास्त्रे नाट्यस्योत्पत्तिं प्रति प्रतिपादितमस्ति।

**"जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।**

**यजुर्वेदादभिनयान् रसानथर्वणादपि।।"** (ना. शा.1/17) इति।

# Keywords

काव्येषु नाटकं रम्यम्, दशरूपककारः धनञ्जयः, चतुर्विधाभिनयो रसाश्च, विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः, दशरूपकम्।

# Discussion

### 1. संस्कृतनाटकसाहित्यम्

संस्कृतसाहित्ये वैदिकयुगात् नाटकानां परम्पराप्रवाहः विद्यते। नाटक-शब्दोऽयं "नट्" धातोः निष्पन्नो वर्तते यस्यार्थोस्सन्ति- नृत्यम्, अभिनयः, अनुकरणञ्च। एतदङ्गभूतानां ताण्डवलास्यनृत्यानाम् अभिनयगीतवाद्या-दीनाञ्च सम्बन्धः शङ्करपार्वतीप्रजापतिनारदादिभिरभिहितः प्राचीन-ग्रन्थेषु वर्णितः। सर्वेन्द्रियेषु नयनं प्रधानम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। लोके विद्यमानानाम् इतिवृत्तानां घटनानां वा चित्रणमेव नाटकम्। नाटकान्तम् हि साहित्यम् इति। महाकविना कालिदासेन उक्तम् "नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्"। संस्कृतसाहित्ये दशरूपकाण्यष्टादशोपरूपकाणि च सन्ति।

- "काव्येषु नाटकं रम्यम्"।
- अवस्थायाः अनुकरणमेव नाटकमस्ति।
- अवस्थाविशेषस्य अनुकरणं कृत्वा आनन्द-मनोरंजन-प्राप्तिकरणमेव नाटकम्।
- अवस्थानुकृतिः नाट्यम्।
- नाट्यशास्त्रं पञ्चमो वेदः इति भरतमुनिः।
- जग्राह पाठ्यं ऋग्वेदात्सामभ्यो गीतमेव च, यजुर्वेदादभिनयान् रसा-नाथर्वणादपि। ब्रह्मा ऋग्वेदात् सम्वादं, सामवेदात् गानं, यजुर्वेदात् अभिनयम्, अथर्ववेदात् रसञ्च गृहीत्वा नाट्यवेदमरचयत्।
- "नाट्यकारकृतप्रसिद्ध-कल्पितकथासार-ग्रथितरचनानुसारी रङ्गपीठे प्रयोक्तृप्रशिक्षितनटाभिनयसंगीतादिजन्यरसद्वारा प्रेक्षकाणां विनोद-विश्रान्त्युपदेशजनको व्यापारः नाटकं रूपकं वा।"
- "रूपारोपात्तु रूपकम्" इति रूपकं परिभाषयन् साहित्यदर्पणकारः विश्वनाथकविराजः। अर्थात् दृश्यकाव्यं नटे रामादिस्वरूपारोपाद्रूपक-मित्युच्यते। अंगेन, वचनेन वेषरचनया स्तम्भस्वेदादिभिश्च रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयपदव्यवहार्यम्। स एव नटे रामादि-रूपारोपात् " रूपकम्" इत्युच्यते। तत्र रूपकाणि तु दश एव।

दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। नाट्यशास्त्रानुरोधेन, रूपकाण्यधिकृत्य धनञ्जयेन विरचितः ग्रन्थः भवति दशरूपकम्। दश-रूपकात्पूर्वं, भरतमुनेः नाट्यशास्त्रादन्यो ग्रन्थः रूपकशास्त्रे नोपलभ्यते। ततो धनञ्जयकृतस्य दशरूपकस्य सुमहत्स्थानमस्ति साहित्यशास्त्रे। नाट्यशास्त्रं न केवलं नाटकविषये नापि वा रूपकाणां विषये, अपि तु नृत्तनृत्यगीतवाद्यादिविषयेषु सर्वत्रापि सर्वव्यापिना प्रभावेण विराजते। अतिविपुले तस्मिन् शास्त्रग्रन्थे जनानां प्रवृत्तिः क्लेशकारिण्यासीत्। तदानीं धनञ्जयः रूपकेषु औत्सुक्यं भजतां जनानां कृते दशरूपकाख्यस्य, स्वग्रन्थस्य रचनामकरोत्। रूपकाणां लक्षणप्रतिपादनपरतया दशविध-रूपकाणां विवृतिं करोतीत्यतः 'दशरूपकम्' इति अन्वर्थसंज्ञाऽस्य ग्रन्थस्य।

दशरूपककारः –
धनञ्जयः,
विष्णुनामकस्य पुत्रः

दशरूपककारः धनञ्जयः विष्णुनामकस्य पुत्रः भवति। धनञ्जयः माल्वायाः परमारवंशीयस्य राज्ञो मुञ्जस्य सदस्यः आसीत्। एतद् धनञ्जयेनैव स्वग्रन्थस्यान्ते प्रतिपादितमस्ति। मुख्यतया 'अनुष्टुप्' छन्दसि रचितोऽयं ग्रन्थः अतीव सरलः। अस्याध्ययनेन च निःसंशयं वक्तुं शक्यते यदयं ग्रन्थः रूपकाणां वर्णन-विश्लेषण-व्याख्यार्थं विरचिता नाट्य-शास्त्रटीका भवतीति।

रूपकाणामाशयं रसभावादिकञ्च अन्यूनतया सहृदयेषु संक्रामयितुं सहृदयचित्तं कथावस्तुनोऽभिमुखं नेतुं चतुर्विधाः अभिनयाः प्रयुज्यन्ते। ते च आङ्गिकः, वाचिकः, आहार्यकः, सात्विकः। रूपकाणां भेदपरिकल्पने नायकभेदाः अपि हेतवः भवन्ति। चतुर्विधनायकभेदाः भवन्ति। धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरशान्तः च। स्वस्त्री, परस्त्री, साधारणस्त्री इति त्रिविधनायिकाः च।

## 2. चतुर्विधाभिनयो रसाश्च-

सहृदयाः कथावस्तुनः अभिमुखं नीयन्ते इत्यत एव अभिनयसंज्ञाऽत्र प्रसज्यते।चतुर्विधा अभिनयाः सन्ति। योऽभिनयः हस्तपादनेत्रादिभिः अङ्गैः क्रियते स एव आङ्गिकः अभिनयः। भाषणद्वारा (वचोभिः) क्रियमाण एव वाचिकाभिनयः। वस्त्रभूषणादीनां अनुकृतिद्वारा क्रियमाणो भवत्याहार्यकः। कथापात्राणां वेषभूषादीनाम् आहरणादेव आहार्यकसंज्ञा। सात्विकाभिनयः स्तम्भ-स्वेदादिकानष्टानां सात्विकभावानाश्रित्य क्रियमाणोऽभिनयः। अष्टौ सात्विकभावाः –

> **"स्तम्भप्रलयरोमाञ्चाःस्वेदो वैवर्ण्यवेपथू ।**
> **अश्रु वैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन् निष्क्रियाङ्गता ।**

"प्रलयो नष्टसंज्ञत्वं शेषास्सुव्यक्तलक्षणाः" इति।(दशरूपकं- 4-5,6) स्थायिसञ्चारिभावाः हृद्गताः, सात्विकास्तु गात्रगताः इति तेषां मिथो भेदोऽस्ति।

## 3. दशरूपकस्य चतुर्थप्रकाशे रसाः प्रतिपाद्यन्ते।

रूपकेषु रङ्गप्रयोगार्हा रसाः अष्टावेव

धनञ्जयेन भरतमुनिना च संकेतितस्य शान्तरसस्य सत्ता नाटकादिषु न स्वीकृता वर्तते। शान्तरसस्य स्थायी शम इति वा निर्वेद इति वा उच्यते। शमस्य लक्षणञ्च साहित्यदर्पणकारेणैवमुक्तं – "शमो निरीहावस्थायामात्म-विश्रामजं सुखम्" (सा. द. 3/180) इति। एषा निरीहावस्था च न रङ्गप्रयोगार्हेति मत्वैव नाटकेषु शान्तरसस्य अस्वीकारः इति मन्यन्ते विद्वांसः। अतः रूपकेषु रङ्गप्रयोगार्हा रसाः अष्टावेव। स्वस्वाभिनयद्वारा एषां रसानां सहृदयचित्तसङ्क्रान्तिरेव नटैः करणीया। अष्टौ स्थायिभावाः तद्रसाश्चाधिकृत्य किञ्चिदत्र परामृश्यते।

## 4. रसनिष्पत्तिः

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" (ना.शा.6/32) इति भरतमुनिना प्रोक्तं रससूत्रं भारतीयकाव्यशास्त्रस्यैव आधारतया वर्तते।

“विभावानुभावव्य-
भिचारिसंयोगाद्रस
निष्पत्तिः”

विभावानां अनुभावानां व्यभिचारिभावानाञ्च स्थायिभावैः सह सुसमञ्जसेन सन्निवेशेन रसोत्पत्तिरिति सूत्रार्थः। तदुक्तं दशरूपके च -

**“विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।**

**आनीयमानः स्वाद्यत्वंग स्थायीभावो रसः स्मृतः।।”**(द.रू.3/1)

इति।

सूत्रेऽस्मिन् विद्यमानयोः संयोगनिष्पत्तिपदयोः व्याख्यानविषये पण्डितानां मध्येऽपि बहवो विप्रतिपत्तिप्रकाराः विद्यन्ते। भारतीय-काव्यशास्त्रे प्रादुर्भूतेषु सिद्धान्तेषु प्रायेण सर्वेऽपि एतदाधारेणैवाऽजायन्त इत्येव वक्तुं शक्यते।

इदानीं विभावानुभावव्यभिचारिणः के इति वयमवलोकयामः। विभावो नाम हेतुः। अस्य आलम्बनं उद्दीपनं चेति द्वैविध्यं विद्यते। यमवलम्ब्य मनसि स्थायिभावाः प्रादुर्भवन्ति स आलम्बनविभावः। प्रादुर्भूता भावाः यैः उद्दीप्ता भवन्ति, त एवोद्दीपनविभावाः। विभावैः प्रादुर्भूतस्य, अनुभावैः ज्ञापितस्य च स्थायिनः परिपोषः यैः क्रियते ते सञ्चारिभावाः। विविधान् रसान् प्रति आभिमुख्यं भजन्त इत्यतः त एव व्यभिचारिण इत्युच्यन्ते। विविधानां रसभावानां प्रादुर्भावे गात्रे दृश्यमाना भावा सात्विकभावा। स्थायिनः सञ्चारिणश्च हृद्गतत्वात् नेन्द्रियगोचरा इत्यवगन्तव्यम्। सात्विकानां गात्रगतत्वान्न न भावत्वमिति पूर्वमेवोक्तम्। अतः अष्टौ स्थायिनः, त्रयस्त्रिंशद्व्यभिचारिणश्च मिलित्वा एकचत्वारिंश-द्भावाः सन्ति। काव्यव्यापारेण स्थायिभावानां मुख्यतयाऽभिव्यञ्जनमेव रसध्वनिरित्युच्यते। एवमेव सञ्चारिभावानां मुख्यतयाऽभिव्यञ्जनं भवति भावध्वनिः।

## 5. स्थायिभावाः –

**“विरुद्धैरविरुद्धैर्वा भावैर्विचिछिद्यते न यः।**

**आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः”**(द.रू. 4/34)

अविरुद्धैः विरुद्धैर्वा भावैः यो भावः न तिरोदधाति, अन्यान् भावांश्चापि आत्मसात्करोति च स एव स्थायीभावः। यथा समुद्रः सर्वाण्यपि जलानि स्वस्मिन् अन्तर्भावयति, सर्वातिरिक्तप्रभावेण वर्तते च तथैव स्थायी स्वप्रभावेण अन्यभावानां पुरतो विराजते। अष्टौ स्थायिनः –

अष्टौ स्थायिनः, शमः
शान्तरसस्थावी न
सर्वैरङ्गीक्रियते

**“रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः।**

**शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य॥”** (द.रू. 4/35)

रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः, विस्मयः, भयं, शोकः इत्यष्टौ सात्विकभावाः। शमः शान्तरसस्थायी न सर्वैरङ्गीक्रियते।

## 6. अष्टौ रसाः -

एभ्यः स्थायिभ्यः क्रमेण शृङ्गारः, वीरः, बीभत्सः, रौद्रः, हास्यः, अद्भुतः, भयानकः, करुणः इत्येते रसा जायन्ते। स्थायिनां तत्तद्रसानां च क्रमशः स्मरणाय साहित्यदर्पणकारोक्तं कारिकाद्वयं सहायकं भविष्यति। तत् कारिकाद्वयमत्रोच्यते -

स्थायिभावाः -

**"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।**
**जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च॥"**(सा.द. 3/175)

रसाः -

**"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्सोऽद्भुत इत्यष्टौ च रसाः शान्तस्था मतः॥"**

(सा.द.3/182) इति।

## 7. चतुर्विधनायकाः नायिकाश्च

रूपकाणां भेदपरिकल्पने नायकभेदाः अपि हेतवः।

नेता नाम नायकः। सः विनयान्वितः अभिमानी च भवितव्यः

**"नेता विनीतो मधुरस्त्यागीदक्षः प्रियंवदः।**
**रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥**
**बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।**
**शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥"** इति

(दशरूपकं 2- 1,2)

नेता नाम नायकः। सः विनयान्वितः प्रियदर्शनः, त्यागशीलः, क्षिप्रकारी, प्रियभाषी, लोकप्रियः, संशुद्धः, मितं सारञ्च वदन्, प्रख्यातवंशः, स्थैर्योपेतः, यौवनयुक्तः, स्थिरः (मनोवाक्कर्मभिः अचञ्चलः), उत्साहयुक्तः, स्मरणशक्तिसमेतः, प्रज्ञाशाली, कलापरः, अभिमानी च भवितव्यः। नायकाः चतुर्विधाः। धीरललितः, धीरशान्तः, धीरोदात्तः, धीरोद्धतश्चेति।

## 8. दशरूपकम्

### 8.1. नाटकम्।

भारतीयसंस्कारे वेदानां महान् प्रभावो विद्यते। 'इतिहासपुराणेषु वेदार्थमुपबृंहयेत्' इति ब्रह्माण्डपुराण उक्तम्। वैदिकानाम् आशयानां प्रपञ्चनं इतिहासपुराणेषु क्रियते च। तेषामाशयानामधिकतया प्रचारः काव्यनाटकादिभिः उद्दिष्टमासीत्। ततः रूपकरचनायै इतिहासप्रसिद्धमेव

इतिवृत्तं मुख्यतया स्वीक्रियते स्म। यद्यपि कवीनां स्वेच्छानुसारेण अन्येषामितिवृत्तानां स्वीकरणे स्वातन्त्र्यमस्ति। तथापि इतिवृत्तस्वभावः, नायिकानायकयोः प्रकृतिः, मुख्यो रसः, अङ्कानां संख्या चेत्यादिक-माधारीकृत्य रूपकाणां दशधा विभागः कृतः।

रूपकाणां दशधा विभागः कृतः

तदुक्तं दशरूपके -

**"नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**

**व्यायोगसमवकारौ वीथ्यङ्केहामृगाः॥"**(दशरूपकं 1/8)इति।

नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः।

रूपकेषु नाटकस्य प्रामुख्यमस्ति। तद्धेतुरेवमुक्तम् –

**"प्रवृत्तित्वादथान्येषां भूयो रसपरिग्रहात्।**

**सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते॥"** इति।

सर्वेषां रूपकाणां मूलं नाटकमेव; नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्यं विद्यते; रूपकाणां सम्पूर्णं लक्षणं नाटक एव विद्यते। एभिरेव हेतुभिः नाटकस्य प्रामुख्यं सर्वैरङ्गीकृतं वर्तते। एवं दशसु रूपकेषु मध्ये प्रामुख्यं भजतो नाटकस्य प्रारंभः परिसमाप्तिश्च मङ्गलपूर्वको भवितव्य इत्यपि व्यवस्था क्रियते।

रूपकाणां सम्पूर्णं लक्षणं नाटके एव विद्यते

पूर्वरङ्गविधानादारभ्य भरतवाक्यपर्यन्तेषु क्रियाविशेषेषु तदर्था निष्कर्षा विद्यते। यथा –

**"पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते**

**प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नरः॥"** (द.रू. 3/2)

सहृदयाः अस्मिन्नेव पूर्वं रज्यन्त इति हेतोः नाट्यशाला एव पूर्वरङ्गः। पूर्वरङ्गविधानं कृत्वा सूत्रधारे विनिर्गते सति नटः प्रविश्य काव्यवस्तुनः स्थापनां करोति। तदानीं कथायाः वस्तु बीजं मुखं पात्रं वा सूचयति। एषा सूचनैव स्थापना, तत्कर्ता च स्थापकः। अभिज्ञानशाकुन्तले मुख्यकथापात्रसूचनैव कृता –

**"तवास्मि गीतरागेण हारिणा प्रसभं हृतः।**

**एष राजेव दुष्यन्तःसारङ्गेणातिरंहसा॥"** (1/5) इति।

अनन्तरं कथावस्तूनि सहृदयानां आभिमुख्यं जनयितुं भारतीवृत्तिः, आमुखं (प्रस्तावना) इत्यादयोऽपि निर्दिष्टा भवन्ति। अस्याः प्रस्तावनाया अपि बहून्यङ्गान्युक्तानि। अन्येषां माङ्गलिकक्रियाणां सद्भावेऽपि नान्दी अवश्यं कार्यैवेति साहित्यदर्पण उक्तं भवति –

**"प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।**

**तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये॥"**

(सा.द.6/23) इति।

नाटकारंभे रङ्गविघ्नोपशमाय नान्दी कार्या। तत्र प्रयुज्यमानो मङ्गलात्मकः श्लोकः भवति 'नान्दी'। नाटकान्ते विश्वशान्त्याशंसापूर्वकं प्रायः नायकेनैव प्रयुज्यमानं आशंसावाक्यं भवति 'भरतवाक्यम्'। प्रायेण नाटकेषु नान्दिपाठानन्तरं सूत्रधारः प्रविशति। नाटके अभिनीयमानायाः कथायाः सूचनां करोति सूत्रधारः। नटैः क्रियमाणेन चतुर्विधाभिनयेन सहैव नृत्तगीतवाद्यरूपस्य तैर्यत्रिकस्य च समञ्जससन्निवेशोऽपि नाटके विद्यते। ततः, नाटके न केवलं नाट्यवस्तुनः सम्यगवधारणाय, अपि तु नानारूपाणां कलानामास्वादनायाप्यवसरो विद्यत इत्यतः 'काव्येषु नाटकं रम्यम्' इति सहृदयसम्मतिरजायत।

**8.2. प्रकरणम् –**

**"अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्**
**अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्।**
**धीरप्रशान्तं सापायं धर्मकामार्थतत्परम् ।**
**शेषं नाटकवत्सन्धिप्रवेशकरसादिकम्॥**

**नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा ।**
**क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित्॥**
**कुलजाभ्यन्तरा बाह्या वेश्या नातिक्रमोग्रयोः।**
**आभिः प्रकरणं त्रेधा सङ्कीर्णं धूर्तसङ्कुलम्।।"**

(द.रू. 3/39 - 42)

- प्रकरणे वस्तु - उत्पाद्यं भवेत्।
- नायकः ब्राह्मण- वैश्य- सचिवेष्वन्यतमो धीरशान्तः, न त्वितिहास प्रसिद्धः। स च नानाप्रकारान् विघ्नान् अभिमुखीकुर्वन्नपि धर्मार्थ-कामेषु तत्पर एव भवितव्यः।
- रसः - श्रृङ्गारो वीरो वा ।

प्रकरणे वस्तु - उत्पाद्यं भवेत्। रसः - श्रृङ्गारो वीरो वा

- सन्धिः :- पञ्चसन्धयः, निर्वहणसन्धौ रसश्च कार्यः।
- नायिका :- कुलस्त्री गणिका वा। कुत्रचिदेका कुलस्त्री, एका गणिका चेति द्विनायिकेऽपि स्याताम्।
- एकैव कुलस्त्री एकैव गणिका इति प्रकरणे द्वे नायिके नायिकाभेदानुसारेण प्रकरणस्यापि त्रैविध्यम् - नायिका कुलस्त्री चेत् शुद्धप्रकरणम्। गणिका चेद्विकृतप्रकरणम् उभेऽपि नायिके चेत्सङ्कीर्णप्रकरणञ्च। तत्र कुलस्त्री- गृहपत्नीत्वेन आभ्यन्तरनायिका, गणिका, बाह्यनायिका च स्यात्। (एतद् धनिककृतेऽवलोकने स्पष्टीकृतम्)।
- सङ्कीर्णे धूर्तविटादयोऽपि स्युः। (शूद्रकविरचितं मृच्छकटिकं अस्मिन् तृतीयप्रकारेऽन्तर्भवति)

  नायिकाभेदेन प्रकरणस्य त्रैविध्यम् - नायिका कुलस्त्री चेत् शुद्धप्रकरणं (उदा. पुष्पदूषितकम्); गणिका चेत्विकृतप्रकरणं (उदा. तरङ्गदत्तम्); उभेऽपि नायिके चेत्सङ्कीर्णप्रकरणञ्च (उदा. मृच्छकटिकम्)।

"शेषं नाटकवत्सन्धिप्रवेशकरसादिकम्" इत्युक्तत्वाद् यद्यत् नाटकाद्भिन्नतया नोक्तं तत्सर्वं नाटकवदेव करणीयमित्यर्थः।

- उदाहरणानि -

| | | |
|---|---|---|
| दरिद्रचारुदत्तम् | - | भासः |
| मृच्छकटिकम् | - | शूद्रकः |
| मालतीमाधवम् | - | भवभूतिः |
| शारीपुत्रप्रकरणम् | - | अश्वघोषः |
| मल्लिकामारुतम् | - | उद्दण्डकविः |
| समावर्तनम् | - | अम्बिकादत्तव्यासः |

## 8.3. भाणः –

दशरूपके भाणलक्षणम् -

**"भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।**
**यत्रोपवर्णयेदेको निपुणः पण्डितो विटः।।**
**सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः।**
**सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः॥**
**भूयसा भारतीवृत्तिरेकाङ्के वस्तु कल्पितम्।**
**मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च॥"**

(द.रू. 3/49 - 51) इति।

- कश्चन बुद्धिमान् द्यूतकरः, चोरः, धूर्तः विटो वा, आत्मना अन्यैर्वा कृतं उपवर्णयति इत्येवंरूपो भवति भाणः। इतिवृत्तं सर्वमेकेनैव विटेन

भारतीवृत्तिप्रधानत्वाद्भाणः। एक एव अङ्को भवेत्

प्रस्तुतं स्यात्। उक्तिप्रत्युक्तयः आकाशभाषितद्वारा सम्बोधनादिभिः क्रियन्ते। एवं भारतीवृत्तिप्रधानत्वादस्य भाणसंज्ञा।

- रसः शृङ्गारो वीरो वा। अस्मिन् रसस्य स्पष्टता नास्तीत्यतः, नायकस्य सौभाग्यशौर्यादिवर्णनयैव रसयोः सूचना क्रियते।
- सन्धिः :- साङ्गौ मुखनिर्वहणसन्धी।
- दश लास्याङ्गान्यपि प्रयुज्यन्ते।
- अङ्कः :- एक एव अङ्को भवेत्।

**कश्चन बुद्धिमान् द्यूतकरः चोरः, धूर्तः विटो वा, आत्मना अन्यैर्वा कृतं उपवर्णयति इत्येवंरूपो भवति भाणः। भारतीवृत्तिप्रधानत्वाद्भाणः।**

- उदाहरणानि :-

उभयाभिसारिका :- वररुचिः

शृङ्गारतिलकभाणः:- रणभद्रेषः

वसन्ततिलकः :- वरदाचार्यः

शारदातिलकम् :- शङ्करकविः

धूर्तविटसंवादः :- ईश्वरदत्तः

पादताडितकम् :- श्यामिलकः

मुकुटताडितम् :- बाणः

शृङ्गारभूषणः :- वामनभट्टबाणः

मुकुन्दानन्दम् :- काशीपतिकविराजः

शृङ्गारसर्वस्वम् :- गुरुरामः

## 8.4. प्रहसनम् –

प्रहसनलक्षणम् – **“तद्वत्प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः।”**

तत्र शुद्धं – **“पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्॥**

**चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोन्वितम्।”**

प्रहसनमपि भाणवदेव। एक एवाङ्कः, हास्यरसप्रधानम्

विकृतं तु – **“कामुकादिवचोवेषैः षण्डकञ्चुकितापसैः विकृतम्।”** इति।

प्रहसनमपि भाणवदेव। भाणवद्बस्तु – सन्धि - सन्ध्यङ्गादीनि अस्मिन्नपि विद्यन्त इत्यर्थः। अस्य शुद्धं, वैकृतं, सङ्करं चेति त्रयः प्रकाराः सन्ति। पाखण्डितः,विप्राः, चेटचेटीविटादयश्च अस्मिन् प्राचुर्येण भवेयुः। तेषां

चरितैः, वेषभाषादिभिश्च सङ्कुलं हास्यप्रधानञ्चापि भवति शुद्धम् प्रहसनम्।

कामुकादीनां वचोवेषादिकं स्वीकृतवतां नपुंसक – कञ्चुकी – तापसादीनां चरितैर्युक्तं भवति वैकृतं प्रहसनम्।

सङ्कीर्णन्तु – “सङ्कराद्वीथ्या सङ्कीर्णं धूर्तसङ्कुलम्।” इत्युक्तम्।

वीथ्याख्यस्याङ्गैः मिश्रितं धूर्तसङ्कुलं च भवति सङ्कीर्णम्।

रसः - “रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु।” इति चोक्तम्। ततः षट्प्रकारस्यापि हास्यस्य सन्निवेशोऽस्मिन् युज्यते।

- हास्यसप्रधानं रूपकम्।
- अङ्कः :- एक एवाङ्कः स्यात्।
- सन्धिः :- मुखनिर्वहणे सन्धी भवतः।

**प्रहसनम्**

| शुद्धम् | विकृतम् | सङ्कीर्णम् |
|---|---|---|
| पाषण्डश्रोत्रियः, ब्राह्मणः, भिक्षुः इत्यादीनां हास्यमयवचोभिर्युक्तम् चेटचेटीविटादिभिर्युक्तम् वेषभाषादिभिर्हास्यजनक-म्। | कञ्चुकी- षण्ड-तापस-वृद्धादीनां विट-चार-भटादिवेषभाषायुक्तया विपरीतधर्म-प्रवृत्तिरूपतया च वर्णनम्। | वीथ्यङ्गैः सङ्कीर्णम्। चोरकितवधूर्तादिभिश्च सङ्कीर्णम्। |

- उदाहरणम्

भगवदज्जुकसंज्ञकप्रहसनम् :- बोधायनः

मत्तविलासप्रहसनम् :- महेन्द्रविक्रमः

लटकमलकम् :- शङ्खधरः

हास्यचूडामणिः :- वत्सराजः

अङ्गदप्रहसनम् :- जग्गुबकूलभूषणः इत्यादीनि।

## 8.5. डिमः –

**“डिमे वस्तु प्रसिद्धं स्याद्वृत्तयः कैशिकीं विना।**
**नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः॥**
**भूतप्रेतपिशाचाद्याःषोडशात्यन्तमुद्धताः।**

**रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः॥**
**मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।**
**चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि॥**
**चतुरङ्कः चतुःसन्धिर्निर्विमर्शो डिमः स्मृतः।"** (द.रू. 3/57-60)

इति डिमस्य लक्षणम्। एतदनुसारेणास्य -

चत्वारोऽङ्काः, डिमे वस्तु प्रसिद्धं स्यात्

- वस्तु :- प्रसिद्धं स्यात्।
- नायकाः :- देव-यक्ष-किन्नर-गन्धर्व-नागादयो भूतप्रेतादयश्च षोडश उद्धतनायकाः स्युः। नागाः वासुकिप्रभृतयः।
- रसः :- हास्यशृङ्गारौ विहाय (शान्तमपि विहाय) अन्ये षड् दीप्तरसाः स्युः। रौद्रोऽङ्गी रसः।
- मायाभिः,इन्द्रजालैः,सङ्ग्रामैः, क्रोधोद्भ्रान्तादिचेष्टितैः, चन्द्रसूर्यग्रहणादिदृश्यैश्च व्याप्तमिदम्।
- सन्धिः :- विमर्शसन्धिं विना अन्ये सन्धयः भवेयुः।
- अङ्कः :- चत्वारोऽङ्काः।

उदाहरणानि :-

त्रिपुरदासः - वत्सराजः
मेघेश्वरः - हस्तिमल्लः
मन्मथोन्मथनम् - रामाख्यकविः
प्रतापरूद्रविजयः - वि. राघवः

## 8.6. व्यायोगः –

व्यायुज्यन्ते बहवः पुरुषाः अस्मिन्निति व्यायोगः।

**"ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः॥**
**हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः।**
**अस्त्रीनिमित्तसंग्रामो जामदग्न्यजये यथा॥**
**एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः।"**
**व्यायुज्यन्ते बहवः पुरुषाः अस्मिन्निति व्यायोगः।**

- ख्यातेतिवृत्तं भवति।
- नायकः :- ख्यातः धीरोद्धतः स्यात्।
- सन्धिः :- मुख- प्रतिमुख- निर्वहणसन्धयः स्युः।
- रसः :- डिमवत्, हास्यशृङ्गारभिन्ना रसाः।

- यथा जामदग्न्यजये सङ्ग्रामः स्त्रीनिमित्तो न भवति, तथा अस्त्रीनिमित्तः कलहः स्यात्।
- अङ्कः :- एकदिननिर्वर्त्यकथया युक्त एक एव अङ्कः।
- शृङ्गारहास्ययोरभावादेव कैशिकीवृत्तिरपि न स्यात्।

उदाहरणानि :-

| | | |
|---|---|---|
| मध्यमव्यायोगः<br>दूतवाक्यम्<br>दूतघटोत्कचम् | } | भासः |
| धनञ्जयविजयम् | :- | काञ्चनाचार्यः |
| निर्भयभीमः | :- | रामचन्द्रः |
| किरातार्जुनीयव्यायोगः | :- | वत्सराजः |
| पार्थपराक्रमव्यायोगः | :- | प्रह्लादः |
| भीमविक्रमौ | :- | मोक्षादित्यः |

### 8.7. समवकारः -

समवकीर्यन्ते अर्थाः अस्मिन्निति 'समवकारः'।

**"कार्यं समवकारेऽपि आमुखं नाटकादिवत्।।**
**ख्यातं देवासुरं वस्तु निर्विमर्शास्तु सन्धयः।**
**वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः ॥**
**द्वादशोदात्तविख्याताः फलं तेषां पृथक् पृथक्।**
**बहुवीररसाः सर्वे यद्वदम्भोधिमन्थने॥**
**अङ्कैस्त्रिभिस्त्रिकपटस्त्रिशृङ्गारस्त्रिविद्रवः।**
**द्विसन्धिरङ्कः प्रथमः कार्यो द्वादशनाडिकः॥**
**चतुर्द्विनाडिकावन्त्यौ नाटिका घटिकाद्वयम्।**
**वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः॥**
**नगरोपरोधयुद्धे वाताग्न्यादिकविद्रवाः।**
**धर्मार्थकामैः शृङ्गारो नात्र बिन्दुप्रवेशकौ॥**
**वीथ्यङ्गानि यथालाभं कुर्यात्प्रहसने यथा।"** (द.रू. 3/62-68)

- समवकीर्यन्ते अर्थाः अस्मिन्निति 'समवकारः'।
- वस्तु :- अङ्कत्रययुक्तं प्रख्यातवस्तु भवेत्।
- नायकः :- उदात्तप्रकृतयः प्रसिद्धा दानवादयो द्वादश वीराः नायका भवेयुः। तेषां सर्वेषामपि फलप्राप्तिरस्ति।
- रसः :- वीरोऽङ्गी रसः।

- सन्धिः :- विमर्शेन विना अन्ये चत्वारः सन्धयः।
- प्रत्यङ्कं कपटशृङ्गारोपद्रवा वर्णनीयाः

त्रयोऽङ्काः, त्रयः कपटाः, त्रिशृङ्गाराः, त्रिविद्रवः, प्रथमेऽङ्के मुखप्रति-मुखसन्धी।

| त्रयोऽङ्काः (अङ्कानां समाप्तिकालः) | त्रयः कपटाः, | त्रिशृङ्गाराः | त्रिविद्रवाः (उपद्रवाः) |
|---|---|---|---|
| प्रथमोऽङ्कः द्वादशनाडिका निर्वृत्तेतिवृत्तः। द्वितीयः चतुर्नाडिका निर्वृत्तेतिवृत्तः। तृतीयः द्विनाडिका निर्वृत्तेतिवृत्तः। | स्वाभाविकः दैविकः अरिकृतश्च। | धर्मशृङ्गारः धर्मपत्न्या; अर्थशृङ्गारः लोभहेतुकः; कामशृङ्गारः परकीयनायिकाविषयकः। (एकैकस्य शृङ्गारप्रकारस्य एकैकस्मिन्नङ्के सन्निवेशः)। | युद्धः, वायुः, अग्निः इत्यादिषु नगरोपरोधमार्गेषु कश्चन एक एव एकस्मिन्नङ्के प्रयोक्तव्यः। |

उदाहरणानि :-

समुद्रमन्थनम् :- वत्सराजः

पञ्चरात्रम् :- भासः

## 8.8. वीथी –

**"वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत्॥**
**रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम्।**
**युक्ता प्रस्तावनाख्यातैरङ्गैरुद्घात्यकादिभिः॥**
**एवं वीथी विधातव्या ह्येकपात्रप्रयोजिता।"** (दशरू.3/68 - 70)

वीथी एकपात्रप्रयोजिता।

- वीथी मार्गः। वीथिवत्त्वादस्य वीथिसंज्ञा। प्रतिमुखादि सन्धीनां, पात्रबाहुल्यस्य च अभावात्, निर्वहणमार्गो सुव्यक्त इत्यतोऽस्य वीथीति संज्ञा दीयत इति मन्तव्यम्।
- कथावस्तु :- कल्पितं भवेत्।
- अङ्कः :- एकोऽङ्कः स्यात्।

- रसः :- शृङ्गारो हि अङ्गी रसो भवति, अन्येषां रसानामपि स्पर्शः स्यात्।
- शृङ्गाररसस्यौचित्यात् कैशिकी वृत्तिरपि विहिता।
- सन्धिः :- मुखनिर्वहणसन्धी स्याताम्।
- एकं पात्रं द्वे वा पात्रे स्याताम्।

उदाहरणानि :-

1. माधवीवीथी } अज्ञातकर्तृके
2. मालविका

## 8.9. अङ्कः –

**“उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्॥**
**रसस्तु करुणः स्थायी नेतारः प्राकृता नराः।**
**भाणवत्सन्धिवृत्यङ्गैर्युक्तः स्त्रीपरिदेवितैः॥**
**वाचा युद्धं विधातव्यं तथा जयपराजयौ।”** (रसरू. 3/70 – 72)

उत्सृष्टिकाङ्कः इति नामान्तरम्।

- उत्सृष्टिकाङ्कः इति नामान्तरं, नाटकाद्यङ्काद् भेदं प्रदर्शयितुम्।
- वस्तु :- प्रसिद्धं, कविकल्पनया तद्विस्तृतिः कार्या।
- रसः :- करुणरसप्रधानः, ततश्च स्त्रीविलापादियुक्तः।
- सन्धिः :- मुखनिर्वहणे सन्धी।
- नेता :- साधारणो नरः।
- अङ्कः :- एक एव अङ्को भवति।
- युद्धं जयपराजयौ च वाचा अत्र प्रकाश्यन्ते।

उदाहरणानि :-

ऊरुभङ्गम् } भासः
कर्णभारम्

शर्मिष्ठाययातिः :- अज्ञातकर्तृकः

विजयाङ्कम् :- वी. राघवः

उन्मत्तराघवम् :- भास्करकविः

## 8.10. ईहामृगः -

**“मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धितम्।।**
**नरदिव्यावनियमान्नायकप्रतिनायकौ।**
**ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत्॥**

दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः।
शृङ्गाराभासमप्यस्य किञ्चित्किञ्चित्प्रदर्शयेत्॥
संरम्भं परमानीय युद्धं व्याजान्निवारयेत्।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः॥" (दशरू. 3/72-75)

- मृगवदलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः।
- वस्तु :- मिश्रं वस्तु।
- अङ्कः :- चत्वारोऽङ्कः
- रसः :- शृङ्गाराभासो रसः।
- सन्धिः :- मुखं, प्रतिमुखं, निर्वहणं चेति त्रयः सन्धयः।
- नायकः :- देवता मानवो उभावपि वा।
- देवमानवयोः एकस्य नायकत्वे, अपरः प्रतिनायकः कार्यः। उभावपि इतिहासप्रसिद्धौ धीरोद्धतौ भवितव्यौ। प्रतिनायकः बुद्धिविपर्यासादेव (मौढ्यादेव) अनुचितकर्मसु व्यपृतो भवति।
- महापुरुषाणां वधो नाऽत्र कार्यः।

चत्वारोऽङ्काः

उदाहरणानि :-

रुक्मिणीहरणम् :- वत्सराजः

कुसुमेश्वरविजयः :- अज्ञातकर्तृकः

वीरविजयः :- अज्ञातकर्तृकः

एतदतिरिक्ततया अष्टादश उपरूपकाण्यपि सन्ति।

## Summarised Overview

संस्कृतसाहित्ये वैदिकयुगादपि नाटकानां परम्पराप्रवाहः विद्यते। लोके विद्यमानानाम् इतिवृत्तानां घटनानां वा चित्रणमेव नाटकम्।। नाटक शब्दोऽयं " नट्" धातोः निष्पन्नो वर्तते यस्यार्थास्सन्ति-नृत्यम्, अभिनयः, अनुकरणञ्च।

धनञ्जयेन विरचितः ग्रन्थः भवति दशरूपकम्। अस्याध्ययनेन च निःसंशयं वक्तुं शक्यते यदयं ग्रन्थः रूपकाणां वर्णन-विश्लेषण-व्याख्यार्थं विरचिता नाट्यशास्त्रटीका भवतीति। रूपकेषु रङ्गप्रयोगार्हा रसाः अष्टावेव। "विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः"। रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः, विस्मयः, भयं, शोकः इत्यष्टौ सात्विकभावाः। शमः शान्तरसस्थायी न सर्वैरङ्गीक्रियते।

रूपकाणामाशयं रसभावादिकञ्च अन्यूनतया सहृदयेषु संक्रामयितुं- सहृदयचित्तं कथावस्तुनोऽभिमुखं नेतुं- चतुर्विधाः अभिनयाः प्रयुज्यन्ते। ते च - आङ्गिकः, वाचिकः, आहार्यकः, सात्विकः। रूपकाणां भेदपरिकल्पने नायकभेदाः अपि हेतवः भवन्ति। चतुर्विधनायकभेदाः भवन्ति। धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरशान्तः च। त्रिविधनायिकाः स्वस्त्री, परस्त्री, साधारणस्त्री च इति।

नायिकानायकयोः प्रकृतिः, मुख्यो रसः, अङ्कानां संख्या चेत्यादिकमाधारीकृत्य रूपकाणां दशधा विभागः कृतः। नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः।

सर्वेषां रूपकाणां मूलं नाटकमेव; नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्यं विद्यते; रूपकाणां सम्पूर्णं लक्षणं नाटक एव विद्यते। एभिरेव हेतुभिः नाटकस्य प्रामुख्यं सर्वैरङ्गीकृतं वर्तते। नाटकारंभे रङ्गविघ्नोपशमाय नान्दी कार्या। तत्र प्रयुज्यमानो मङ्गलात्मकः श्लोकः भवति 'नान्दी'। नाटकान्ते विश्वशान्त्याशंसापूर्वकं प्रायः नायकेनैव प्रयुज्यमानं आशंसावाक्यं भवति 'भरतवाक्यम्'। प्रायेण नाटकेषु नान्दिपाठानन्तरं सूत्रधारः प्रविशति। 'काव्येषु नाटकं रम्यम्'। नायिकाभेदेन प्रकरणस्य त्रैविध्यम् - नायिका कुलस्त्री चेत् शुद्धप्रकरणः (उदा. पुष्पदूषितकम्); गणिका चेत्विकृतप्रकरणः (उदा. तरङ्गदत्तम्); उभेऽपि नायिके चेत्सङ्कीर्णप्रकरणञ्च (उदा. मृच्छकटिकम्)। कश्चन बुद्धिमान् द्यूतकरः, चोरः, धूर्तः विटो वा, आत्मना अन्यैर्वा कृतं उपवर्णयति इत्येवंरूपो भवति भाणः। भारतीवृत्तिप्रधानत्वाद्भाणः। प्रहसनमपि भाणवदेव। एक एवाङ्कः, हास्यसप्रधानं रूपकम्। तद्वत्प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः"। बोधायनस्य भगवदज्जुकसंज्ञकप्रहसनम्। "डिमे वस्तु प्रसिद्धं स्याद्वृत्तयः कैशिकीं विना"। डिमे वस्तु प्रसिद्धं स्यात्, चत्वारोऽङ्काः, राघवस्य प्रतापरूद्रविजयः उदाहरणम्। "ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः"। व्यायुज्यन्ते बहवः पुरुषाः अस्मिन्निति व्यायोगः। भासस्य मध्यमव्यायोगः उदाहरणाम्। समवकीर्यन्ते अर्थाः अस्मिन्निति 'समवकारः'। त्रयोऽङ्काः, त्रयः कपटाः, त्रिशृङ्गाराः, त्रिविद्रवः, प्रथमेऽङ्के मुखप्रति-मुखसन्धी, भासस्य पञ्चरात्रम् उदाहरणाम्। वीथी एकपात्रप्रयोजिता। प्रतिमुखादि सन्धीनां, पात्रबाहुल्यस्य च अभावात्, निर्वहणमार्गो सुव्यक्त इत्यतोऽस्य वीथी। माधवीवीथी मालविका च उदाहरणे। "उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्" उत्सृष्टिकाङ्कः इति नामान्तरम्। भासस्य कर्णभारम् उदाहरणम्। नायकः स्वस्यालभ्यां नायिकां मृगवदीहतेऽस्मिन्निति ईहामृगः। वत्सराजस्य रुक्मिणीहरणम् उदाहरणम्।।

# Assignments

**उत्तराणि लिखत।**

1. किं नाम नाटकम्?
2. नाटकशब्दस्य निष्पत्तिं लिखत।
3. ‘दशरूपकम्’ नाम ग्रन्थः केन विरचितः?
4. नायकगुणाः के भवन्ति?
5. नायिका कति विधा?
6. कति रूपकाणि सन्ति? रूपकाणां नामानि कानि?
7. नान्दी किमर्थं प्रयुज्यते?
8. नाटके कः पूर्वरङ्गं विधत्ते?
9. ‘भरतवाक्यम्’ किम्? भरतवाक्यं कदा प्रयुज्यते?
10. चतुर्विधाभिनयाः के?
11. प्रकरणं किमाश्रित्य द्विविधा भवति?
12. स्वप्नवासनदत्तं कीदृशं रूपकं भवति? लक्षणं लिखत।
13. धूर्त्तचरितं कस्मिन् रूपके विद्यते?
14. हास्यप्रधानं रूपकं किम्? उदाहरणं लिखत?
15. प्रहसनस्य लक्षणम् किम्? प्रहसनरूपकस्य भेदाः के?
16. डिमे कति अङ्काः भवेयुः? लक्षणं उदाहरणं च लिखत।
17. भासरचिताः प्रसिद्धाः व्यायोगग्रन्थाः के?
18. समवकार इत्यस्यार्थः कः? विशदयत।
19. एकपात्रप्रयोजितं रूपकं किम् ? लक्षणं उदाहरणं च लिखत।
20. अङ्कस्य रूपकस्य नामान्तरं किम् ?
21. ईहामृगस्य लक्षणं किम्? कुतः ईहामृगस्य एतन्नाम?

**टिप्पणिं लिखत।**

1. नाटकलक्षणम्।
2. दशरूपकानुसारं रसनिष्पत्तिः।
3. स्थायिभावः कः?
4. चतुर्विधाभिनयभेदान् साभिनयं उपस्थापयतु।
5. ‘काव्येषु नाटकं रम्यम्’
6. काव्येषु नाटकस्य प्राशस्त्यं कुतः?
7. व्यायोगः कः? विशदयत।

**निबन्धात्मकप्रश्नाः।**

1. नाटकं किम्? लक्षणम् उदाहरणं च विशदयत।
2. संस्कृतनाटकसाहित्यम्।
3. दशरूपकभेदानां आस्वादने भेदः अस्ति वा न वा इति चिन्तयत।
4. दशरूपकेषु नाटकस्य स्थानं किमिति विचारयत।
5. नाटकप्रकरणयोः सविशेषतां सोदाहरणं विशदयत।
6. दशरूपकेषु  हास्यप्रधानरूपकाणां निरूपणं कुरुत।

## Suggested Readings


1. Dr. R. Makkad , *The types of Sanskrit drama*, Charotar Book Stall, Gujarat, 1936.
2. A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidass Publishers, Delhi ,1924.
3. Dr.Kunjunniraja - Samskṛta Sāhityacaritram, Kerala Sahitya Academy.
4. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
5. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वराणसी।
6. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
7. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992


## References


1. Dasarupaka of Dhananjaya, Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014
2. A short History of Sanskrit Literature, T.K. Ramachandra Iyer, R.S. Vadyar & Sons, Kalpathy. 2018
3. The types of Sanskrit drama, Dr. R. Makkad, Charotar Book Stall, Gujarat.
4. The Sanskrit Drama in its Origin, Development, Theory and Practice, Motilal Banarasidas Publishers, Delhi.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# संस्कृतनाटकम्, भासः, कालिदासः,भवभूतिः।

## Learning Outcomes

- संस्कृसाहित्ये प्रमुखरूपककाराणां परिचयं प्राप्नोति।
- संस्कृतनाटके भासस्य त्रयोदशनाटकानां परिचयं प्राप्नोति।
- समाजे भासादिरूपककाराणां स्वाधीनतां आस्वादनं च लभते।
- कालिदासनाटकानां परिचयं प्राप्नोति।
- नाटकरचनायां भवभूतेः योगदानमधिकृत्य जानाति।

## Background

रूपकस्य लक्षणं, दशविधरूपकाणि, तेषां लक्षणानि, उदाहरणानि च युष्माभिः पूर्वभागे अधीतानि सन्ति। अनन्तरं रूपककाराणां परिचयः। संस्कृतभाषायां बहवः रूपककाराः सन्ति।

संस्कृतनाटककाराणां मध्ये प्रथमपरिगणना कविकुलगुरोः भासस्यैव भवति। इतिहासकाराणां मतमनुसृत्य भासादारभ्यते भारतीयसंस्कृतनाटककाराणाम् इतिहासः। भासः कालिदासादपि पूर्विकः। भासादनन्तरमागच्छति विख्यातनाटककारः कालिदासः। मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलमिति नाटकत्रयं तेन रचितम्। मृच्छकटिकस्य कर्ता शूद्रकः, शारीपुत्रप्रकरणस्य कर्ता अश्वघोषः, उदयाभिसारिकाभाणस्य कर्ता वररुचिः, भगवदज्जुकप्रहसनस्य कर्ता बोधायनः, कुन्दमालायाः कर्ता दिङ्नागः, मुद्राराक्षसस्य कर्ता विशाखदत्तः, प्रियदर्शिकादिनाटकत्रयस्य कर्ता हर्षवर्धनः, मत्तविलासप्रहसनस्य कर्ता महेन्द्रविक्रमः, आश्चर्यचूडामणेः कर्ता शक्तिभद्रः, वेणीसंहारस्य कर्ता भट्टनारायणश्च एतेषु प्रमुखाः। एतेषां सुप्रसिद्धानां मध्ये भवभूतिः शूद्रकश्च परिगणनीयौ भवतः। अस्मिन् भागे

नाटकरचनायां भासकालिदासभवभूतिप्रभृतीनां संस्कृतनाटककाराणां योगदानमधिकृत्य प्रतिपाद्यते।

## Keywords

प्रथमनाटककारः, भासपरिचयः, भरतमुनिः, नाटकचक्रं, भासनाटकानि, स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायणम्, चारुदत्तम्, अविमारकम्, प्रतिमानाटकम्, अभिषेकनाटकम्, कर्णभारम्, दूतवाक्यम्, दूतघटोत्कचम्, मध्यमव्यायोगः, पञ्चरात्रम्, ऊरुभङ्गम्, बालचरितम्, भासस्य रचना-वैशिष्ट्यम्, नाट्यकला, कालिदासः, भवभूतिः।

## Discussion

### 1. संस्कृतनाटकस्य विशेषता

नाटकं साहित्यस्य महत्त्वपूर्णमङ्गं वर्तते येन प्रकारेण चित्रस्य भिन्न-भिन्नवर्णाः सहृदयस्य चित्ते वर्णस्य आनन्दस्य अनुभूतिं कारयन्ति तेनैव प्रकारेण नाटके प्रयुक्तनायकादीनां वेषभूषा- नेपथ्य-रचनादयः दर्शकस्य हृदयोपरि विशिष्टं प्रभावयन्ति आनन्दसृष्टिश्च कुर्वन्ति। अध्ययन प्राप्तै तादृशं किमपि ज्ञानं, शिल्पं, विद्या, कला, योगः, कार्यं नास्ति यन्नाटके न दरीदृश्यते। 'नाटकान्तं कवित्वम् इति श्रूयते। भरतमुनिना नाटकस्य त्रीणि उद्देश्यानि प्रतिपादितानि। यथा-

हितोपदेशजननम्- व्यक्तेः समाजस्य च कल्याणार्थम् उपदेशप्रदानम्

विश्रान्तिजननम् - व्यक्तेः समाजस्य च शान्तिप्रदानम् ।

विनोदजननम् - व्यक्तेः समाजस्य च मनोरञ्जनम् ।

भासः संस्कृतसाहित्यस्य प्रथमनाटककारः

### 2. भासः

भासः संस्कृतसाहित्यस्य प्रथमनाटककारः विद्यते। तात्पर्यमिदं यत् सम्प्रति उपलब्धेषु नाटकेषु भासस्य नाटकानि प्राचीनतमानि।

प्राचीनालङ्कारशास्त्राचार्यैः स्वलक्षणग्रन्थेषु अस्य रचनानामनेकानि निदर्शनानि प्रस्तुतानि। एतादृशस्य प्रथितयशसः नाटककारस्य जीवनपरिचयविषये किञ्चिदपि ज्ञानं नास्ति।

भासस्य स्थितिकालविषये महद्विवादः वर्तते। शूद्रकस्य मृच्छघटिक-प्रकरणम् भासकृतचारुदत्तस्य परिवर्धितरूपं विद्यते, अत एव भासः शूद्रकात् पूर्ववर्ती अस्ति। शूद्रकस्य रचनाकालः ई० पू. २२०-१९७ वर्षे आसीत्। अत एव भासस्य कालः अस्मात्पूर्वमेव भवितव्यः।

**2.1. भासपरिचयः**

कालिदासस्य मालविकाग्निमित्रे भासः परामृष्टः

- कालिदासस्य मालविकाग्निमित्रे भासः परामृष्टो भवति। अपि च भासनाटकेषु प्रयुक्ता प्राकृतभाषा कालिदासोक्तप्राकृतापेक्षया प्राचीना भवति। एतेन भासः कालिदासात् पूर्वकालीनो भवतीति मन्तुं युज्यते।
- बाणभट्टः महता आदरेण स्वग्रन्थेषु भासं परामृष्टवान्। तस्माद् बाणभट्टात् पूर्विको भवति भास इति वक्तुं शक्यते।
- भासस्य ऊरुभङ्गे दुर्योधनवधः रङ्गे प्रयुज्यते। भरतमुनेर्मतानुसारं वधम् अङ्गप्रयोगं नार्हति। एतेन भास :भरतमुनेः कालात् पूर्विकः इत्यवगन्तुं शक्यते।
- भासेन पाणिनीयव्याकरणनियमा :सम्यगनुसृताः न भवन्ति। क्वचित् क्वचित् पाणिनिनियमानाम् उल्लङ्घनमपि भासकृतिषु दृश्यते। एतेन भासः पाणिनेः पूर्वकालीन इति केचिदाचार्याः वदन्ति।

भरतमुनेः नाट्यशास्त्रनियमाः भासेन नानुसृताः

- भरतमुनेः नाट्यशास्त्रे लक्ष्मीस्वयंवरमिति अज्ञातकर्तृकं नाटकं परामृष्टमस्ति। तदिदानीमपि नोपलब्धम्। पतञ्जलेः महाभाष्ये अपि कंसवधः, बालिवन्धः इति नाटकद्वयं परामृष्टम्। एतन्नाटकद्वयमपि नोपलब्धम्। ततः एषां त्रयाणाम् अनुपलभ्यमानत्वात् सम्प्रत्युप-लब्धानां रूपकाणां विषये भासकृतान्येव सर्वप्रथमानीति निश्चीयन्ते।

भासस्य कालः क्रिस्तोः पूर्वं शतकत्रये इति निर्णीतः

भासस्य कालः क इति चिन्तयामः। उपर्युक्तप्रस्तावैरेव भासस्य कालः अपि सामान्यतया अवगन्तुं शक्यते। कालिदासस्य कालः क्रिस्तोः पूर्वं प्रथमशतके इति निर्णीयते चेत् भासः तत्पूर्वकालीनो भवेत्। भरतमुनिः क्रिस्तोः पूर्वं द्वितीयशतके आसीच्चेत् भासः तस्मादपि पूर्विको भवितुमर्हति। एवं चिन्तयद्भिः कालगणनापि भासस्य कालः क्रिस्तोः पूर्वं तृतीयशतके इति निर्णीतः अस्ति।

भासनाटकसंग्रहः नाटकचक्रनाम्ना प्रसिद्धः

## 2.2. नाटकचक्रम्

भासनाटकसंग्रहः नाटकचक्रनाम्ना प्रसिद्धः। अस्मिन् त्रयोदशानां नाटकानां संग्रहः विद्यते। मध्यमव्यायोगम्, दूतवाक्यम्, दूतघटोत्कचः, कर्णभारम्, ऊरुभङ्गम्, पञ्चरात्रञ्च महाभारताश्रिताः, प्रतिमानाटकम-भिषेकञ्च रामायणाश्रिते, बालचरितं भागवतपुराणाश्रितम्, दरिद्र-चारुदत्तम्, अविमारकम् च लोककथाश्रिते, प्रतिज्ञायौगन्धरायणम् स्वप्न-वासवदत्तञ्च उदयनकथाश्रिते च वर्तन्ते। एषु नाटकेषु भासस्य मौलिक-कल्पनाशक्तेः अद्भुतनाट्यकौशलस्य परिचयः अस्ति।

## 2.3. भासनाटकानि

अनन्तरं भासस्य नाटकानां परिचयः क्रियते। भासनाटकानामुपलब्धिं संशोधनञ्च महोपाध्यायेन टि.गणपतिशास्त्रिमहाभागेनैव कृतम्। एतानि नाटकानि तेन ट्रिवान्ड्रम् सान्स्क्रिट् सीरीस् इत्याख्यया प्रकाशितानि च। एतेषु नाटकेषु भासस्य नाम न कुत्रापि उल्लिखितमस्ति। एतेन कर्तृत्वविषये पण्डितानां मध्ये मतभेदः वर्तते। किन्तु शास्त्रिणो मतमनुसृत्य एतानि भासकृतानीति सामान्यतया निश्चीयन्ते।

रूपकाणां दश भेदाः सन्तीति युष्माभिः पूर्वमेव विदितम्। तदनुसारेण भासकृतानि रूपकाणि केषु केषु रूपकभेदेष्वन्तर्भवन्तीति चिन्ता प्रसक्तैव। किन्तु भासः नाट्यशास्त्रकर्तुः भरतमुनेरपि पूर्ववर्तीति हेतोः, तत्काल-पश्चाद्वर्तिषु नाट्यशास्त्रादिषु ग्रन्थेषु प्रतिपादितलक्षणानुसारं भासकृतीः वर्गीकर्तुं नैव शक्यते। अतः "विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" (साहित्यदर्पणम् 6-6) इत्युक्तदिशा नाटकसामान्यलक्षणानुसारित्वात् एतेषां त्रयोदशनामानि रूपकाणां सामान्यतया नाटकमिति व्यवहारः क्रियते। भासनाटकानां नामानि-

त्रयोदश नाटकानि

| | |
|---|---|
| 1. स्वप्नवासवदत्तम् | 2. प्रतिज्ञायौगन्धरायणम् |
| 3. चारुदत्तम् | 4. अविमारकम् |
| 5. प्रतिमानाटकम् | 6. अभिषेकनाटकम् |
| 7. कर्णभारम् | 8. दूतवाक्यम् |
| 9. दूतघटोत्कचम् | 10. मध्यमव्यायोगम् |

| | |
|---|---|
| 11. पञ्चरात्रम् | 12. ऊरुभङ्गम् |
| 13. बालचरितम् | |

एतेषां मध्ये चत्वारि नाटकानि लोककथामनुसृत्य रचितानि भवन्ति। तथा रामायणकथामाधारीकृत्य द्वे, महाभारतानुसारं षट्, विष्णुपुराणमनुसृत्य एकं रचितम्। एतानि अधो दीयन्ते -

- लोकोक्तिकथामाधारीकृत्य- स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायणम्, चारुदत्तम्, अविमारकञ्च।
- रामायणकथामाधारीकृत्य - प्रतिमानाटकम् ,अभिषेकनाटकञ्च ।
- महाभारतमाधारीकृत्य - कर्णभारम्, दूतवाक्यम्, दूतघटोत्कचम्, मध्यमव्यायोगम्, पञ्चरात्रम्, ऊरुभङ्गञ्च।
- विष्णुपुराणमाधारीकृत्य- बालचरितम्।

भासनाटकेषु प्रशस्ततमं नाटकम्

**स्वप्नवासवदत्तम्** - नाटकेऽस्मिन् षडङ्काः। उदयनस्य वासवदत्तायाश्च कथा अत्र प्रतिपादिता। मन्त्री यौगन्धरायणः मगधराजस्य भगिन्या पद्मावत्या सह उदयनस्य विवाहं रहसि अकारयत्। उदयनस्य राजशक्तिं वर्धयितुं एतदावश्यकमिति मन्त्री अचिन्तयत्। कार्यमिदं वासवदत्ता न ज्ञातवती। बुद्धिमान् स मन्त्री लावणकग्रामदहने अग्नौ वासवदत्ता दग्धा इति प्रचार्य उदयनस्य विश्वासं कृतवान्। अन्ते स्वप्नक्रमेणैव वासवदत्तां लेभे च। अमुं स्वप्नवृत्तान्तमाधारीकृत्य नाटकस्य स्वप्नवासवदत्तमिति शीर्षकं दत्तं भासेन।

भासस्य नाटकद्वये उदयनः मख्यकथापात्रं भवति

**प्रतिज्ञायौगन्धरायणम्** - अस्मिन् नाटके चत्वारः अङ्काः सन्ति। अत्रापि राजा उदयन एव नायकः। तस्य प्राक्कालकथा वर्णिता भवति। उदयनस्य वासवदत्तायाश्च परस्परानुरागकथाऽत्र प्रतिपादिता। वासवदत्ता उदयनेऽनुरागबद्धा भवतीति वार्तां श्रुत्वा तस्याः पिता उज्जयिनीपतिः प्रद्योतः वत्सराजं बद्धुमैच्छत्। 'बद्धस्य वत्सराजस्य मुक्तिः मया क्रियेत' इति यौगन्धरायणेन प्रतिज्ञा क्रियते। सुहृदः रुमण्वतः विदूषकस्य वसन्तकस्य च साहाय्यमवलम्ब्य यौगन्धरायणः बहुप्रयत्नानामन्ते वासवदत्तया सह वत्सराजं व्यमोचयत्। एवं यौगन्धरायणस्य प्रतिज्ञा सफलीकृता। एतेन अस्य रूपकस्य प्रतिज्ञायौगन्धरायणमिति नामधेय-मकरोत् भासः।

चारुदत्तेन सह वसन्तसेना नाम गणिकायाः प्रेम चित्रीकृतम्

**चारुदत्तम्** - अङ्काः चत्वारः। निर्धनब्राह्मणकुमारेण चारुदत्तेन सह वसन्तसेना नाम गणिकायाः प्रेम नाटकेऽस्मिन् चित्रीकृतम्। चारुदत्तं प्रकरणविभागे अन्तर्भवति। एतस्य इतिवृत्तं कविकल्पितं भवति। अत्र चारुदत्तस्य वसन्तसेनायाश्च प्रेमकथा वर्णिता। चारुदत्तः दानधर्मादिना दरिद्रो जातः कश्चन ब्राह्मणः। वसन्तसेना तु गणिकाकुलजाताऽपि सौशील्यादिगुणसम्पन्ना काचित् धनिका च। स्वभावमहिम्ना प्रसिद्धे चारुदत्ते वसन्तसेना अनुरागिणी अभवत्। तयोः परस्परानुरागस्य कथा अस्मिन् नाटके सुमधुररूपेण कविना आविष्क्रियते। चतुर्ष्वङ्केषु विभक्तेऽस्मिन्प्रकरणे कथायाः परिसमाप्तिर्न दृश्यते। अतः रूपकस्यास्य रचनापरिसमाप्तेः पूर्वमेव भासो दिवमगादिति निर्णयोऽपि पण्डितेष्वस्ति। पश्चात् शूद्रको नाम कविः चारुदत्तकथामाश्रित्य मृच्छकटिकं नाम दशाङ्कोपेतं सहृदयहृदयामृतायमानं प्रकरणमेकं रचितवानित्येतत् कथाया अस्याः जनसम्मतिं प्रकाशयति।

अविमारके अविमारक-कुरङ्ग्यौः मिथः प्रेमकथा वर्णिता

**अविमारकम्** - नाटकेऽस्मिन् षडङ्काः सन्ति। षडध्यायनिबद्धेऽस्मिन् नाटके काशिराजपत्न्याः सुदर्शनाया अग्निदेवाज्जातोऽविमारको नायकः, कुन्तिभोजराजस्य पुत्री कुरङ्गी नायिका च कथापात्रे भवतः। बृहत्कथायाम् उपवर्णिता तयोरनुरागकथा अत्र इतिवृत्तरूपेण स्वीकृता। अविमारकराजकुमारस्य कुरङ्गी नाम कुन्तीभोजस्य पुत्र्याः च मिथः प्रेम नाटकस्यास्य इतिवृत्तम्। अन्ते नारदस्य साहाय्येन तयोः विवाहमचलत्।

रामायणकथाम् आस्त्रित्य रचितं नाटकद्वयम्- प्रतिमानाटकं, अभिषेकनाटकम्

**प्रतिमानाटकम्** - रामायणादस्य नाटकस्येतिवृत्तं स्वीकृतम्। दशरथः श्रीरामं यौवराजाभिषेकं कर्तुम् ऐच्छत्। अभिषेकविघ्नः। ततः रामस्य चतुर्दशसंवत्सरपर्यन्तवनवासाय गमनम्। भरतकुमारस्य अयोध्यागमनवृत्तान्तः चित्रीकृतः।

**अभिषेकनाटकम्** - षडङ्कयुक्तस्य अभिषेकनाटकस्यापि इतिवृत्तं रामायणकथाया एव स्वीकृतम्। त्रयाणामभिषेकाणां सुसमञ्जससन्नि-वेशोऽत्र द्रष्टुं शक्यते। रामायणस्य किष्किन्धासुन्दरयुद्धकाण्डेषु परामृष्टा कथा संक्षिप्य, ईषद्भेदेनाऽत्रोपवर्ण्यते। रावणवधाय लङ्कां गच्छते रामाय, वरुणाज्ञया समुद्रः स्वयमेव मार्गं ददाति, तदर्थं सेतुबन्धनं न करोति रामः इत्येषो भेदः मुख्यतया नाटकेऽस्मिन् भासेन कृतः। बालिना किष्किन्धाया निष्कासितस्य, हृतपत्नीकस्य सुग्रीवस्य, रावणेन अपहृतपत्नीकस्य श्रीरामस्य च मिथः सख्यं कृतम्। तदनुसारेण रामो बालिनं हन्तुं कृतनिश्चयः। तज्जनितेन कोलाहलेन नाटकं प्रारभते। बालिवधादारभ्य रामस्य राज्याभिषेकपर्यान्ता कथाऽस्मिन् चित्रीकृता।

भासस्य कर्णभारे कर्णः मुख्यकथापात्रं भवति

**कर्णभारम्** - एकाङ्कनाटकम्। अस्येतिवृत्तं महाभारतात् स्वीकृतम्। कर्णस्य उदात्तं चरितम्। दानवीरस्य कर्णस्य दानकर्मणि अस्खलितगतित्वं, दानस्य माहात्म्यञ्च नाटकेऽस्मिन् प्रतिपादितम्। ब्राह्मणवेषधारी देवेन्द्रः कर्णमुपेत्य तस्य कवचकुण्डले अयाचत। दीनशीलः कर्णः ते तस्मै अदात् च। कर्णस्य विजयसर्वस्वायमाने कवचकुण्डले स्वीकुर्वन्निन्द्रः, तदनन्तरं पश्चात्तापतप्तो भवति। तेन ब्राह्मणवेषधारिणा स्वसुहृदा केनचिदस्त्रमेकं कर्णाय प्रददाति। दत्तस्य प्रतिग्रहणमनिच्छन्नपि कर्णः, ब्राह्मणवचः इति कृत्वा तत्स्वीकरोति, युद्धाय प्रतिष्ठते च।

दूतशब्देन आरब्दं नाटकद्वयम्- दूतवाक्यम्, दूतघटोत्कचम्

**दूतवाक्यम्** - एकाङ्कः। महाभारतात् इतिवृत्तं स्वीकृत्य रचितमेकं एकाङ्कनाटकं भवति दूतवाक्यम्। श्रीकृष्णः पाण्डवानां दूतभावेन सन्धिनिर्वहणाय कौरवसभां गतवान्। यदा कृष्णः सभां प्रविशति तदा दुर्योधनः स्वस्यासनात् पतति। तावताऽपि कृष्णप्रभावमङ्गीकर्तुं विमुखः सःतमवमन्तुं बद्धुञ्च प्रारभते। किन्तु दुर्योधननिदेशानुसारं कृष्णं बद्धुमुद्युक्ताः सर्वेऽपि राजानः स्वयमेव बद्धा जायन्ते। कृष्णः तदानीं स्वस्य दिव्यास्त्राणि स्मरति। ततः सुदर्शनादिशस्त्राणि, गरुडश्च कृष्णस्य साहाय्यं कर्तु आगच्छन्ति। सन्दर्भेऽस्मिन् सुदर्शनमपि कथापात्रमेव। तद्भगवतोऽवतारलक्ष्यं भगवन्तं प्रतिबोधयति। कृष्णः सर्वाण्यपि दिव्यास्त्राणि प्रतिप्रेषयति। अन्ते धृतराष्ट्रः स्वयमेवागत्य भगवते श्रीकृष्णाय युक्तां सत्कारविधिमनुतिष्ठन् स्वपुत्रस्यापराधाय तं क्षमां याचते।

भीमस्य हिडिम्बायाः च पुत्रः घटोत्कचस्य चरितम् अत्र प्रतिपादितम्

**दूतघटोत्कचम्** - एकाङ्कनाटकं भवति। भीमस्य हिडिम्बायाः च पुत्रः घटोत्कचः। तस्य चरितम् अत्र प्रतिपादितम्। भीमपुत्रो घटोत्कचः दूतरूपेण कौरवसभां प्रविशतीति कथाऽत्रोपवर्ण्यते। अभिमन्योः मरणानन्तरं घटोत्कचः युद्धभूमौ प्रविश्य कौरवाणां मरणं प्रवचितवान्। किन्त्वेषः कथाभागः महाभारते न दृश्यते। ततः नाटकस्यास्य कथाबीजं भासकल्पितमेवेति मन्यन्ते विद्वांसः।

**मध्यमव्यायोगः** - एकाङ्कः। व्यागोगस्यास्य नायको भीमसेनः यद्यपि महाभारतप्रसिद्धो भवति, ततोऽप्यस्य कथा भासकल्पितेत्येव वक्तुं शक्यते। भीमसेनस्य पत्न्या हिडिम्बायाः व्रतान्तभोजनार्थं तत्पुत्रेण घटोत्कचेन गृहीतः कश्चन ब्राह्मणकुमारः भीमसेनेन मोचित इत्येषा कथाऽत्र नाटकीयैर्मुहूर्तैः सुसम्पुष्टतया प्रतिपादिता। घटोत्कचः मातुः पारणायै

मानवमेकमन्विष्यन् निर्जने वने विचरति । हिडिम्बया सह भीमस्य प्रणयः। ततः घटोत्कचपुत्रद्वारा चिरकालविरहितयोः तयोः सङ्गमः।

**पञ्चरात्रम्** - त्रयः अङ्काः। कल्पितकथा अस्य नाटकस्य इतिवृत्तम्। महाभारतात् विराटपर्वणः स्वीकृतमितिवृत्तम्। अज्ञातवासस्थानां पाण्डवानां सान्निध्यं ज्ञातुं कौरवाः विराटराजस्य धेनूरपहृतवन्तः। अज्ञातवासकालः परिसमाप्तः। पञ्चरात्रश्चावशिष्यते, पाण्डवाः अपि विदिताः इति जानन् द्रोणः, दक्षिणा-विषये कृतां प्रतिज्ञां पालयितुं दुर्योधनमवदत्। दुर्योधनश्च पाण्डवेभ्यो राज्यार्धं दत्वा यज्ञकर्मानुष्ठानेन पवित्रीकृतान्तरङ्गस्य स्वस्य साध्वाचारतां प्रकाशयति च।

ऊरुभङ्गनाटके दुर्योधनस्य वधं रङ्गे प्रदर्शयति

**ऊरुभङ्गम्** - एकाङ्कनाटकम्। संस्कृतनाटकसाहित्ये एकमेव दृश्यते दुःखपर्यवसायि नाटकं - महाभारतकथाम् उपजीव्य भासेन विरचितं ऊरुभङ्गम्। नाटकेऽस्मिन् भीमस्य गदाप्रहारेण संचूर्णितोरुयुगलस्य दुर्योधनस्य पतनं, अन्ते तस्य मरणं च चित्रीकृतम् ।

श्रीकृष्णस्य बाललीलामाधारीकृत्य लिखितं नाटकम्

**बालचरितम्** - पञ्चाङ्कनाटकं भवति। विष्णुपुराणप्रसिद्धाः श्रीकृष्णकथाः बालचरितस्येतिवृत्तत्वेन स्वीकृताः। अस्मिन् नाटके कृष्णस्य जननं, बाल-लीला, कंसवधं, श्रीकृष्णस्य पराक्रमादिकं च वर्णितम्।

## 2.4. भासस्य रचना वैशिष्ट्यम्

भासस्य एकं शोकान्तनाटकं ऊरुभङ्गम्

रचनावैशिष्ट्यमधिकृत्य मुख्याशयरूपेण केचिदत्र दीयन्ते। इतिवृत्त-स्वीकरणे भासः न केवलं इतिहासद्वयात्, लोककथाभ्यः अपि मूलकयां स्वीकृतवान्। लोककथास्तु जनसामान्यकथाः भवन्ति। एतेन सामान्यजना अपि नाटके प्रवेष्टुं शक्ताः भवन्ति। भासः संस्कृतनाटकनियमानां अनुसरणं निषकर्षतया न करोति। सः न केवलं शुभान्तानि नाटकानि रचितवान्, अपि त्वेकं शोकान्तनाटकमपि (ऊरुभङ्गं) व्यरचयत्। एतत्तु संस्कृत-नाटकनियमानां विरुद्धतयैव। ऊरुभङ्गे वधचित्रीकरणं रङ्ग एव कृतम्। प्रतिमानाटके च दशरथस्य मृत्युः रङ्ग एव प्रदर्श्यते। भरतमुनिः "न कार्यं मरणं रङ्गे नाट्यधर्मं विजानता" इत्यनुशास्ति। भासनाटकेषु प्रस्ताव-नायाः स्थाने स्थापना अस्ति। कथापात्राणां कथांशानाञ्च चित्रीकरणे महद् वैचित्र्यं भासेन प्रदर्शितमस्ति। नाटकीयतायाः आविष्करणे कविः सिद्ध-हस्तो भवति इत्यस्य निदर्शनं भवति स्वप्नवासवदत्तनाटके स्वप्ने इव वासवदत्तायाः पुनर्दर्शनम्, प्रतिमानाटके प्रतिमादर्शनम्, प्रतिज्ञा-

यौगन्धरायणे यौगन्धरायणस्य प्रतिज्ञा चेत्यादिकम्। काव्यसौन्दर्येण नाटकीयमुहूर्तानां चारुतराविष्करणैश्च भासः संस्कृतनाटकसाहित्य-नभोमण्डले स्वस्य स्थानं व्यतिरिक्तम् एव अकरोत्।

### 2.5. नाट्यकला

महाकविः भासः संस्कृतसाहित्यस्य कुशलनाटककारः विद्यते। यद्यपि महाकविना नाट्यशास्त्रस्य नियमानामक्षरशः पालनं न कृतं, परञ्च स्वकौशलेन नाटकं रोचकं कृतम्। संस्कृतस्य प्रायः सर्वाणि रूपकाणि प्रयोगदृष्ट्या अनुपयुक्तानि परञ्च भासस्य नाटकानि सफलीभूतानि। भासेन अनेकानि एकाङ्कानि नाटकानि प्रणीतानि। भासस्य नाटकेषु कथापात्राणां संघटनं चरित्रचित्रणं कथोपकथनं रससंयोजनं च मनोहररीत्या सूचितानि। भाषा शैली च हृदयग्राहिणी आकर्षका समीचीना च विद्येते।

## 3. कालिदासः

कालिदासः विश्वसाहित्ये सुप्रसिद्धः कविः

सुहृदः! संस्कृतनाटककर्तॄणां कालगणनायां भासः प्रथम इति अस्माभिः पठितमस्ति। तदनु कः इत्याकांक्षा जायते। भासादनन्तरं कः आगच्छति? न संशयः। कालिदास एव। सः यद्यपि कालगणनायां भासस्यानन्तरगामी, तथापि प्रशस्तिविषये सः भासात् पुरतो वर्तते। कालिदासः न केवलं संस्कृतसाहित्ये सुप्रसिद्धः कविः, अपि च विश्वसाहित्येऽपि स तथैव सुप्रसिद्धः। केनचित् जर्मन् समालोचकेन एवमुक्तमस्ति - 'येन केनापि समालोचकेन आङ्गलेयसाहित्यकारस्य षेक्स्पियर् महाशयस्य तुलना कालिदासेन क्रियते चेत्, तत्तस्य अज्ञतानिमित्तमेव। कालिदासस्य अभिज्ञानशाकुन्तलेन तुलयितुं षेक्स्पियर् महाशयस्य सर्वे ग्रन्थाः अपि न पर्याप्ताः भवन्ति' इति। अभिज्ञानशाकुन्तलस्य जर्मन्भाषानुवादं दृष्ट्वा महाकविना गेथे महाशयेन उक्तम् – 'देवमर्त्यलोकयोः एकत्र स्थितिं द्रष्टुम् यदि कश्चिदिच्छति चेत् सोऽभिज्ञानशाकुन्तलं पठतु' इति। एवं काव्यसौन्दर्यविषये पाश्चात्यपौरस्त्यपण्डितैः कालिदासः युगपदेव कीर्तितो दृश्यते। तादृङ्महान् कविरेव कालिदासः। अस्तु। इदानीं वयं कालिदासमधिकृत्य किञ्चिदधिकतया परिचिन्तयामः।

### 3.1. कालिदासपरिचयः

- कालिदासः न केवलं संस्कृतसाहित्ये, अपि तु विश्वसाहित्यनभोमण्डल एव विराजमानः सुमहान् कविः। काव्यनाटकयोरुभयोरपि अस्य प्रतिभायाः अस्खलितगतित्वं सुप्रसिद्धमेव। काव्यमाधुर्यविषये कविरयं सर्वान् कवीन् अतिशेते। मानवचित्तानां सूक्ष्मभावं सुसूक्ष्मं निरीक्ष्य काव्यरचनाप्रक्रियायां व्यापृतवानयम्। हृद्गतभावानां चित्रीकरणे कालिदासः अग्रगण्यः। बाह्याभ्यन्तरलोकयोः सूक्ष्मचित्रं तस्य काव्येषु दृश्यते। अत्र सुप्रसिद्धा काचित् सहृदयोक्तिरप्यस्ति –

- 'पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।
  अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव' इति।

कालिदासः विक्रमादित्यराजस्य सदसि कविः आसीत्

पद्यस्यास्य आशयं जानीथ वा? पुरा केचन प्रभावशालिनां कवीनां गणनमकुर्वन्। तदा प्रथममेव कालिदासं कनिष्ठिकाङ्गुल्यां गणयामासुः। तदनन्तरं कः इत्यत्र सन्देहे जाते कालिदासस्य समीपेऽपि गणयितुं न कोऽप्यासीत्। एवं कनिष्ठिकासमीवर्तिन्यां अङ्गुल्यां गणयितुं न कोऽप्यस्तीति दृष्ट्वा, तस्या अङ्गुल्याः अनामिकेति (नामरहितेति) नाम अन्वर्थमेवाऽभवदित्याशयः। कालिदासः महाराजस्य विक्रमादित्यस्य पण्डित-सभायां पुरा विराजितेषु नवरत्नेषु अन्यतमः आसीदिति प्रसिद्धिः। स्वप्रतिभाविशेषेण सर्वेषाम् आदरपात्रमासीदयं कविः।

कालिदासस्य जन्मदेशः उज्जयिनीति अङ्गीक्रियते

- कालिदासस्य कालदेशादीनधिकृत्य पण्डितानां मध्ये मतभेदोऽस्ति। अनेन कुमारसम्भवे हिमालयवर्णनं कृतमित्यतः अयं काश्मीरदेशवास्यासीदिति केचिन्मन्यन्ते। मालविकाग्निमित्रं नाम नाटकं रचितवानयं मालवदेशीय इति केचित्, मेघदूतं रचितवानयं उज्जयिनीवासीति केचिदपरे च मन्यन्ते। एवमस्य जन्मदेशविषये मतभेदाः सन्ति। एवमपि उज्जयिन्येव कवेरस्य जन्मदेश इति सामान्यतया अङ्गीक्रियते। तस्य हेतव एवं प्रदर्श्यन्ते - मेघदूते उज्जयिन्याः समीपप्रदेशानाञ्च सूक्ष्मरूपेण वर्णनं कविना कृतमस्ति। अपि च पर्वतेषु हिमालयः, नगरीषु उज्जयिनी, देवतासु शिवः, अलङ्कारेषु उपमा, छन्दस्सु मन्दाक्रान्ता चेत्येतत्सर्वं कालिदासस्य बहुमतमासीत्। प्रायेणैतत्सर्वं उज्जयिनीनिवासिनामपि प्रियतरमेवे-

त्यतः कालिदासमपि तथा ते मन्यन्ते। प्रायेणायं पक्षो बलीयानिति कृत्वा कालिदासस्य जन्मदेशः उज्जयिनीति अङ्गीक्रियते।

### 3.2. कालिदासस्य कालः

कालिदासस्य कालविषये अपि भिन्नाभिप्रायाः सन्ति। तस्य कालः क्रिस्तोः पूर्वं प्रथमशतके इति केचिन्मन्यन्ते। विक्रमवर्षस्य समारंभः तदानीमासीदित्येष एवाऽत्र प्रदर्शितो हेतुः। विक्रमादित्योऽस्य वर्षस्य समारंभक इति सामान्योऽभिप्रायः। कालिदासस्तु विक्रमादित्यसभायां नवरत्नेष्वन्यतम आसीदिति प्रसिद्धिश्चास्ति। एतदाधारीकृत्य क्रिस्तोः पूर्वं प्रथमशतक आसीत् कालिदास्य काल इति प्रथमाभिप्रायः।

कालिदासस्य कालविषये अपि भिन्नाभिप्रायाः सन्ति

क्रिस्तोः परं पञ्चमशतक एव कालिदासस्य काल इति मन्यन्ते केचित् पाश्चात्यपण्डिताः। चन्द्रगुप्तद्वितीयस्य काले एव कालिदासः जीवति स्मेति तन्मतम्। ते च गुप्तराजानां सुवर्णयुगे, विक्रमादित्यपदवीमारूढस्य चन्द्रगुप्तद्वितीयस्य आस्थानकविरासीत् कालिदास इत्यभिप्रयन्ति।

केचित्तु वदन्ति यत् क्रिस्तोः पश्चात् षष्ठशतक एव तस्य काल इति। तस्मिन् काले यशोधर्माख्यः कश्चन राजा हूणान् पराजित्य विक्रमादित्यपदवीम् आरूढवान्। यशोवर्मणा विक्रमादित्यवर्षः परिष्कृतः। एतेषां मतानुसारेण तस्य सभापण्डित आसीत् कालिदासः। एवं कालिदासस्य जीवितकालविषये प्रबलं मतत्रयमस्ति।

### 3.3. कालिदासकाव्यानि

**'आत्मनाम गुरोर्नाम नामातिकृपणस्य च।**
**श्रेयस्कामो न कुर्वीत ज्येष्ठापत्यकलत्रयोः'॥**

इति विश्वासः पुरातनकाले आसीदिति जानीमः। ततः श्रेयसे काव्यरचनां कुर्वताम् एतेषां पञ्चानां नामानि स्वग्रन्थेषु न कुत्रापि विलिखन्ति स्मेति मन्यते।

प्रायेण प्राचीनग्रन्थेषु तत्कर्तॄणाम् नाम्नां अनुपलब्धौ एषोऽपि हेतुर्भवितुमर्हति। कालिदासकृतीनां सुव्यक्ततया गणनाविषये अपि प्रश्न एष उदेति। ततः रचनाशैली, आशयानां आविष्कारसम्प्रदायः, भाषासौकुमार्यञ्चेत्यादिषु बहुविषयेषु साम्यवैषम्यादिकं अवलोक्यैव पुरातनग्रन्थानां कर्तारो निर्णीयन्ते स्म। अनेन प्रकारेणैव कालिदासकृतीनामपि कर्तृत्वं निर्णीतमस्ति। तदनुसारेण महाकाव्यद्वयं, नाटकत्रयं, खण्डकाव्यद्वयञ्च कालिदासकृतिष्वन्तर्भवन्ति। तेषां नामानि -

महाकाव्यद्वयम्
नाटकत्रयम्
खण्डकाव्यद्वयम्

- महाकाव्यद्वयम् - रघुवंशम्, कुमारसम्भवञ्च।
- नाटकत्रयम् - मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञान-शाकुन्तलञ्च।
- खण्डकाव्यद्वयम् - ऋतुसंहारः, मेघदूतञ्च।

### 3.4. कालिदासनाटकानि

प्रथमं नाटकं, मालविकायाः अग्निमित्रस्य च अनुरागकथा प्रतिपादिता भवति

**मालविकाग्निमित्रं नाटकम्** - कालिदासेन त्रीणि नाटकानि रचितानि। तेषु प्रथमं नाटकं मालविकाग्निमित्रं भवति। अस्मिन् नाटके मालविकायाः अग्निमित्रस्य च अनुरागकथा प्रतिपादिता भवति। अग्निमित्रः शुङ्गवंशीयः विदिशायाः शासकश्च भवति। मालविका तु राज्याः कारुण्येन अभयं प्राप्ता काचन कुमारी। अग्निमित्रस्य राज्ञी भवति धारिणीदेवी। तया पुत्रीसमानतया संरक्षिता मालविका। नृत्तसंगीतविषये निपुणां तथा सौन्दर्येण शालीनतया च मोहिनीं मालविकां दृष्ट्वा राज्ञः मनसि तां प्रति अनुरागो जायते। किन्तु तयोरनुरागमार्गे विघ्नानां परम्पराः आगच्छन्ति। प्रधानविघ्नस्तु राजपत्नी धारिणीदेवी एव। मालविकायां राज्ञः प्रेमभाव-मवगम्य, तत्सम्मुखात् मालविकाम् अपनेतुं धारिणी बहुधा प्रयत्नमकरोत्। अन्ते विघ्नान् सर्वान् परिहृत्य, धारिणीदेव्याः अनुमत्या राजा मालविकां परिगृह्णाति। अस्मिन् नाटके पञ्च अङ्काः सन्ति।

शृङ्गाररसप्रधानम् एकं उपरूपकं भवति विक्रमोर्वशीयम्।

**विक्रमोर्वशीयम्** - शृङ्गाररसप्रधानमेकं उपरूपकं भवति विक्रमोर्वशीयम्। पञ्चाङ्कनिबद्धमिदं त्रोटकं भवतीति प्रस्तावनायामुक्तम्। त्रोटकं नाम अष्टादशोपरूपकेषु अन्यतमं भवति। अस्मिन् महाराजस्य पुरूरवसः अप्सरस्त्रियाः उर्वश्याश्चानुरागकथा भवतीतिवृत्तम्। अस्य मूलकथा ऋग्वेदे शतपथब्राह्मणे च दृश्यते। नाटके तु कालिदासस्य भावनानुसारेण केचन भेदाः आनीताः सन्ति। केशिनामकेन असुरेण अपह्रियमाणां उर्वशीं पुरूरवसा मुच्यते। उर्वीं अन्वेष्टुं देवेन्द्रेण प्रेषितेन चित्ररथेन सह तां देवलोकं प्रेषयति च। किन्तु ततः प्रभृति उर्वश्याः चित्ते, स्वस्याः रक्षकं पुरूरवसं प्रति अनुरागः उदेति। एकदा देवसभायां सुधर्मायां लक्ष्मीकल्याणमिति नाटके उर्वशी लक्ष्मीवेषं धृत्वा रङ्गमञ्चमागच्छति। नाटके च कुत्रचित्सा, वाचस्खलनेन पुरुषोत्तम इति वक्तव्ये पुरूरवाः इति वदति। तस्याः अनवधानतायां कुपितो नाट्याचार्यो भरतस्तां शापेन देवलोकान्निष्कासयति। वृत्तान्तममुं ज्ञात्वा देवेन्द्रः 'तस्याः प्रियस्य यावत् तत्पुत्रमुखदर्शनं स्यात् तावत् तेन सह वस्तुं' अनुमेने।

पुरूरवसः उर्वश्यामनुरागवृत्तान्तं ज्ञात्वा कुपिताऽपि तत्पत्नी पश्चात् "प्रियानुप्रसादनव्रतं" अनुतिष्ठन्ती सती, तां स्वीकर्तुं राज्ञेऽनुमतिं ददाति। राज्ञा परिणीता उर्वशी किमपि गर्भलक्षणं विनैव पुत्रमेकं सूते। किन्तु राज्ञः पुत्रमुखदर्शने स्वस्याः देवलोकगमनं अनिवार्यमिति जानन्ती सा पुत्रं तम् अतिनिगूढतया विद्याभ्यसनार्थं च्यवनमहर्षेराश्रमं प्रेषयति।

पुरूरवसः सकाशं 'सङ्गमनीय'मिति किमपि रत्नमासीत्। तद्रत्नं केनापि पक्षिणा अपह्रियते। रत्नं गृहीत्वा गच्छन्तं पक्षिणं कोऽपि शस्त्रेण पातयति। पक्षिणो गात्रसंलग्नाच्छस्त्राद् इदमवगम्यते यत् आयुर्नामकः कश्चन भवति तत्पक्षिघातकः इति। आयुः पुरूरवस उर्वश्यां जातः पुत्र आसीत्। सः धनुर्विद्यानिष्णातोऽभवदिति ज्ञात्वा च्यवनः तं उर्वशीसकाशं प्रेषयति। राज्ञः पुत्रमुखदर्शने लब्धे सति उर्वशी देवलोकं गच्छति। दुःखितो राजा पुत्रं राज्येऽभिषिच्य वनवासाय गन्तुं निश्चिनोति। किन्तु अचिरभाविनि देवासुरसङ्ग्रामे, देवानां पुरूरवसः साहाय्यमनिवार्यं स्यादिति महर्षिणां प्रवचनमासीदिति जानन् देवेन्द्रः पुरूरवसो वनगमनं निवारयितुमिच्छन् उर्वशी तेनैव सह निवसतु इत्यनुमतिं ददौ। एवं नायिकानायकयोः अनुरागनिर्झर्याः प्रवाहोऽबाधित एवावर्तत।

‘काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला।

**अभिज्ञानशाकुन्तलम्** - कालिदासस्य सर्वोत्कृष्टं विश्वप्रसिद्धश्च नाटकं भवति अभिज्ञानशाकुन्तलम्। संस्कृतसाहित्ये अपि शाकुन्तलमेव श्रेष्ठतमम् भवति। उच्यते च, ‘काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला, शाकुन्तले चतुर्थोऽङ्कः, तत्र श्लोकचतुष्टय’मिति। शकुन्तलायाः दुष्यन्तस्य च प्रणय-कथा नाटकेऽस्मिन् इतिवृत्तं भवति। अत्र सप्त अङ्काः सन्ति। नायकः पुरुकुलावतंसो दुष्यन्तः। सः महासत्वः, अतिगम्भीरः, कृपावान्, अविकत्थनश्चेत्येवं धीरोदात्तनायकलक्षणैः संयुक्तो भवति। नायिका शकुन्तला। सा कन्यका मुग्धा च। महाभारताद् मूलकथा स्वीकृता। मूलकथातः वैरस्योत्पादकांशान् विहाय, काश्चित् नूतनांशान् योजयित्वा च कालिदासः स्वस्येतिवृत्तस्य कमनीयतां प्रगुणितामकरोत्। शृङ्गारोऽस्य अङ्गी रसः। अन्ये रसाः अङ्गभावेन च सम्मिलिताः।

शाकुन्तलं कालिदसस्य प्रसस्ततमं नाटकम्

## 3.5. कालिदासस्य रचनावैशिष्ट्यम्

कालिदासस्य रचनावैशिष्ट्यम् अन्यादृशं भवति। कल्पनाविशालत्वं, पदमाधुर्यं, वागर्थसंश्लेषणं, काव्यगुणानां समायोजनं, अलङ्कारसन्निवेशनं,

कालिदासरचनासु वैदर्भीरीतिः दृश्यते

वैदर्भीरीत्याः प्रसरणं, रसध्वनेः सौन्दर्यम् – इत्येवं अनेकेषां काव्यगुणानां आकर एव कालिदासरचनाः। अभिज्ञानशाकुन्तलस्य सुविस्तराध्ययनम् अस्मिन्नेव पत्रे भविष्यतीत्यतः तदधिकृत्य नाऽत्र विशदतया प्रतिपाद्यते। बन्धपारुष्यरहिता, शब्दकाठिन्यवर्जिता, नातिदीर्घसमासा च वैदर्भीरीतिः कालिदासेनात्र प्रयुक्ता। श्लेषः, प्रसादः, समता, माधुर्यं, सुकुमारता, अर्थ-व्यक्तिः, उदारत्वम्, ओजः, कान्तिः, समाधिश्च – इत्येते दशकाव्यगुणाश्च सुसंयोजिताः। प्रसादगुणस्य प्रचुरता चात्र दृश्यते। उचितस्थानेषु शृङ्गार-रसस्य समुन्मेषः कृतः। शाकुन्तलस्य चतुर्थाङ्के करुणरसस्य सौन्दर्यमपि द्रष्टुं शक्यते। अन्ये रसाः अङ्गभावेन कालिदासनाटकेषु दृश्यन्ते। प्रायेण सर्वेषामप्यलङ्काराणां प्रयोगे सुनिपुण एव कालिदासः। तथापि उपमालङ्कारस्य प्रयोगे कविकुलगुरोः कालिदासस्य प्रावीण्य-मन्यादृशमेव। कालिदासस्य कल्पनासामर्थ्यं काव्येषु परिलसति। द्राक्षा-पाकास्वादनक्षमेऽस्मिन् काव्यप्रपञ्चे सहृदयानां सविशेषमाभिमुख्यं विद्यत इति विशिष्य न वक्व्यम्।

अनेकेषां काव्यगुणानां आकर एव कालिदासरचनाः

## 4. भवभूतिः

संस्कृतनाटककाराणां मध्ये प्रथमपरिगणना कविकुलगुरोः भासस्यैव भवति। इतिहासकाराणां मतमनुसृत्य भासादारभ्यते भारतीय-संस्कृतनाटककाराणाम् इतिहासः। भासः कालिदासादपि पूर्विकः। भासादनन्तरमागच्छति विख्यातनाटककारः कालिदासः। मालविकाग्नि-मित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलमिति नाटकत्रयं तेन रचितम्। मृच्छकटिकस्य कर्ता शूद्रकः, शारीपुत्रप्रकरणस्य कर्ता अश्वघोषः, उदया-भिसारिकाभाणस्य कर्ता वररुचिः, भगवदज्जुकप्रहसनस्य कर्ता बोधायनः, कुन्दमालायाः कर्ता दिङ्नागः, मुद्राराक्षसस्य कर्ता विशाखदत्तः, प्रियदर्शि-कादिनाटकत्रयस्य कर्ता हर्षवर्धनः, मत्तविलासप्रहसनस्य कर्ता महेन्द्र-विक्रमः, आश्चर्यचूडामणेः कर्ता शक्तिभद्रः, वेणीसंहारस्य कर्ता भट्टनारा-यणश्च एतेषु प्रमुखाः। एतेषां सुप्रसिद्धानां संस्कृतनाटककाराणां मध्ये भवभूतिः शूद्रकश्च परिगणनीयौ भवतः। अस्मिन् भागे नाटकरचनायां भवभूतेः योगदानमधिकृत्य प्रतिपाद्यते। नाटकरचनायां गुणमाहात्म्येन कालिदासेन स्पर्ध्यते भवभूतिः।

## 4.1. भवभूतिपरिचयः

भवभूतिः कनौजराजस्य यशोवर्मणः आस्थानकविः

कनौजदेशस्य राज्ञः यशोवर्मणः आस्थानकविः आसीत् भवभूतिः। अस्य यथार्थनामधेयं श्रीकण्ठ इति। भवभूतिनाम्ना स ख्यातः। तस्य मातापितरौ जातुकर्णिः नीलकण्ठश्च। विदर्भायाः पद्मपुरे सः अजायत। मालतीमाधवस्य प्रस्तावनायाम् वेदशास्त्रपण्डित इति आत्मपरिचयः कृतः। तस्य कालः अष्टमशतकस्य आरम्भे एव । भवभूतिनाटकानि उज्जयिन्याः महाकालक्षेत्रे रङ्गाविष्कृतानीति श्रूयते।

## 4.2. भवभूतेः नाटकानि

श्रीरामस्य चरितमेव महावीरचरितम्

**महावीरचरितम्** - भवभूतेः प्रथमं नाटकं महावीरचरितं भवति। रामायणादेतस्य कथा स्वीकृता भवति। महावीरः श्रीरामः। श्रीरामस्य चरितमेव महावीरचरितम्। रामस्य विश्वामित्रसन्दर्शनादारभ्य अयोध्या-प्रत्यागमनपर्यन्तं षट्काण्डान्तर्भूता कथा अत्र प्रतिपादिता भवति। अर्थशास्त्रस्य अभिस्पर्शः अस्मिन् नाटके बाहुल्येन दृश्यते। माल्यवानित्याख्यस्य अमात्यस्य राष्ट्रियप्रवर्तनानि, रामस्य नाशाय तेन आसूत्रिताः पद्धतयः नाटके शोभादायकाः भवन्ति। अत्र महावीररूपेण रामः आगच्छति। प्रथमं तस्य युद्धं परशुरामेण सह। तदनन्तरं बालिना सह, अन्ते रावणेन च सह। अस्मिन् युद्धत्रये महावीरस्य रामस्य वीरमाहात्म्यं कविना प्रदर्शितमस्ति। अस्मिन् नाटके मूलकथातः कानिचित् परिवर्तनानि भवभूतिना कृतानि सन्ति। तानि परिवर्तनानि कथापात्राणां मूल्यवर्धनायैव साहाय्यकानि।

**मालतीमाधवम्** - अस्मिन् काचित् काल्पनिकप्रणयकथा सुमधुररूपेण कविना विकसिता भवति, तस्मादेवैतत् रूपकं प्रकरणविभागे अन्तर्भवति।

मालतीमाधनं प्रकरणविभागे अन्तर्भवति, तस्मिन् दश अङ्काः सन्ति

अस्मिन् नायकः माधवः, नायिका मालती च। नाटककारस्य विस्तृतं भावनासामर्थ्यं प्रकरऽणेस्मिन् सर्वत्र द्रष्टुं शक्यते। इतिवृत्तानुसारं रसकर-सन्दर्भाणां संयोजनं कविना कृतमस्ति। कथापात्राणां युक्तियुक्तप्रकाशने कवेः अनितरसाधारणवैदग्ध्यं प्रकरणस्यास्य महत्त्वं वर्धयति। अस्मिन् प्रकरणे दश अङ्काः सन्ति।

**उत्तररामचरितम्** - भवभूतेः उत्कृष्टरचना उत्तररामचरितं भवति। 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति उक्तिरपि तदधिकृत्यास्ति। नाटक-स्यास्य रचनया भवभूतिः कालिदासेन सह स्पर्धां कुरुते इति विमर्शकैरुच्यते। अभिज्ञानशाकुन्तलस्य प्रतियोगिरूपेण नाटकमिदं परिक-ल्प्यते पण्डितैः। 'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला इतिवत्,

शाकुन्तलागुणगाम्भीर्यं नाट्येऽस्मिन् दृश्यते सदा' इत्येवमपि वक्तुं शक्यते। कालिदासादनन्तरं गणनीयो भवभूतिरेवेति यदुक्तिः विमर्शकलोके अस्ति, तस्य कारणम् एतन्नाटकं कालिदासनाटकवद् अतिहृद्यमित्येतदेव। कालिदासस्य प्रभावः नाटकेस्मिन् बहुत्र द्रष्टुं शक्यते। रामायणस्य उत्तरकाण्डप्रमेयः अस्मिन् प्रतिपाद्यरूपेण स्वीकृतः। रामकथायाः अन्त्यभागः अत्र नाटकरूपेण आविष्कृतोऽस्ति। अस्य कथा यद्यपि रामायणात् स्वीकृता, तथापि काव्यसौन्दर्यवर्धनाय नूतनायोजनानि तत्र तत्र कृतानि सन्ति। एकत्र सीतारामयोः स्थितिः एकस्मिन्नेव देशे कविना प्रदर्शिता, किन्तु तत्र सीताविरहेण रुदितः रामः सीताम् न पश्यति, किन्तु सीता रामं पश्यति च। एतादृशानि नाटकीयरङ्गाविष्करणानि कविना कृतानि। सीताविरहसम्भूतस्य रामशोकस्य अगाधतां सीतां ज्ञापयितुम् एतादृशम् अवतरणं सहायीकरोति। तदपि तयोः पुनर्मेलने निमित्तमप्यभवत्। लवकुशाभ्यां सह रामसैन्यस्य युद्धं कवेः नूतनाविष्करणमेव। मूलकथायाम् एतन्नास्ति, तत्तु भवभूतेः भावनासृष्टमेव। अश्वमेधयागसन्दर्भे यागाश्वस्य प्रेषणं, मार्गमध्ये लवकुशाभ्यां तस्य बन्धनम्, तदनुबन्धेन युद्धम्। एतत्सर्वं भवभूतिकल्पना एव। 'कारुण्यं भवभूतिरेव तनुते' इत्येवं काचिदुक्तिरस्ति। तत्कारणं नाटकेऽस्मिन् सुमधुररूपेण कृतः करुणरसविन्यास एव।

रामकथायाः अन्त्यभागः अत्र नाटकरूपेण आविष्कृतोऽस्ति

## 4.3. भवभूतेः रचनावैशिष्टम्

**काल्पनिकता-** भवभूतेः त्रिषु नाटकेषु, मालतीमाधवं सम्पूर्णतया काल्पनिककथासम्बद्धं भवति। यद्यपि कथायाः केचिदंशाः जनमुखादनावृतकथासु द्रष्टुं शक्यन्ते, तथापि मालतीमाधवस्य मुख्यकथा, उपकथा च स्वकल्पितरूपेणैव तेन कृताः। 'भावनायां सम्राट् एव भवभूतिः' इत्युक्तिं समर्थयितुं उत्तररामचरिते अपि बहवः दृष्टान्ताः सन्ति। मूलकथासु भावनानुसारं परिवर्तनं कृत्वा कविना नाटकस्य इतिवृत्तं निर्मितम्। मालत्याः माधवस्य च परस्परानुरागघटनाः, एवम् उत्तररामचरिते करुणरसस्य तीव्रतामानेतुं रचिताः घटनाश्च कवेः कल्पनावैभवं सूचयन्ति।

**नवकल्पनानि-** बह्व्यः नवकल्पनाः कविना स्वनाटकेषु कृताः सन्ति। उत्तररामचरिते आत्रेयी, तमसा, वासन्ती इत्यादिकथापात्राणि भवभूतेः

रचनावैशिष्ट्यम् – काल्पनिकता, नवकल्पनानि, काव्यसौन्दर्यम्

नूतनाविष्करणानि सन्ति। अश्वमेधसन्दर्भे यागाश्वस्य प्रेषणं, लवकुशाभ्यां तन्निरोधनं, ताभ्यां सह युद्धं च मूलकथायां न दृश्यन्ते। सीताविरहे रामस्य तीव्रदुःखावतरणमपि नूतनकल्पना एव। सीतापरित्यागः तेन कृतः, सामान्यबुद्धौ तदङ्गीकर्तुं न शक्यते। किन्तु राज्ञि राजपत्न्यां वा जायमानः प्रजानाम् अविश्वासः राज्ञां न भूषणम्। राजा तु प्रजानां सर्वेषां पतिरिति चिन्ता तस्मिन्नासीत्। प्रेयसीप्रेम्णा तद्हृदयं व्यामुग्धं शोकाकुलञ्चासीत्। सीताविरहे शिशुरिव रामः रोदिति। रामपक्षे स्थित्वा कविरपि तत्कार्यं प्रतिपादितम् अस्ति।

**काव्यसौन्दर्यम् -** कारुण्यं भवभूतिरेव तनुते' इत्येतत् प्रस्तावः रसविन्यासे विशिष्य करुणरसविन्यासे कवेः सिद्धहस्ततां बोधयति। शृङ्गार-रसविन्यसने कालिदासः यथा प्रशस्तः, तद्वदेव करुणरसविन्यसने भव-भूतिः। नाटके यानि घटकानि आविष्कृतानि, तेषाम् आत्यन्तिकपरिणामः करुणरसे पर्यवसति। काव्यसौन्दर्यदृष्ट्या तस्य त्रिषु नाटकेषु उत्तररामचरितं विशिष्यते। तस्य कारणमपि तस्मिन् नाटके करुणरसस्य मधुराविष्करणं कृतमित्येतदेव। सर्वे रसाः करुणं प्रति गच्छन्तीति रीत्या तत्र पात्राविष्करणं दृश्यते।

भवभूतेः नाटकेषु विदूषकाः न सन्ति।

भवभूतेः नाटकेषु विदूषकाः न सन्ति। मालतीमाधवसदृशे शृङ्गारकाव्ये अपि हास्यकथापात्ररूपेण विदूषको नागच्छति। 'धिक् प्रहसनमिति' यः प्रस्तावः उत्तररामचारिते तेन कृतः अस्ति, तस्मादवगन्तुं शक्यते स हास्यरसविरोधीति। काव्यचारुत्वहेतूनामुपकरणानां संयोजने, विशिष्य रसध्वनिविन्यसने सः कालिदासस्य समीपमेव उपविशति। अत एव संस्कृतनाटककाराणां मध्ये काव्यमीमांसाकारैः कालिदासादनन्तरं स्थानं भवभूतेः दत्तमस्ति।

## Summarised Overview

नाटकं साहित्यस्य महत्त्वपूर्णमङ्गं वर्तते। भासः संस्कृतसाहित्यस्य प्रथमनाटककारः विद्यते। कालिदासस्य मालविकाग्निमित्रे भासः परामृष्टः। बाणभट्टेन भासः परामृष्टः। भासस्य स्थितिकालविषये महद्विवादः वर्तते। शूद्रकस्य मृच्छकटिकप्रकरणम् भासकृतचारुदत्तस्य परिवर्धितरूपं विद्यते, अत एव भासः शूद्रकात् पूर्ववर्ती अस्ति। एवं चिन्तयद्भिः इतिहासकारैः भासस्य कालः क्रिस्तोः पूर्वं तृतीयशतके इति निर्णीतः अस्ति। भासनाटकसंग्रहः नाटकचक्रनाम्ना प्रसिद्धः। अस्मिन् त्रयोदशानां नाटकानां संग्रहः

विद्यते। "विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" (साहित्यहर्पणम् 6-6) इत्युक्तदिशा नाटकसामान्यलक्षणानुसारित्वात् एतेषां त्रयोदशनामानि रूपकाणां सामान्यतया नाटकमिति व्यवहारः क्रियते। काव्यसौन्दर्येण नाटकीयमुहूर्तानां चारुतराविष्करणैश्च भासः संस्कृतनाटकसाहित्यनभोमण्डले स्वस्य स्थानं व्यतिरिक्तं एव अकरोत्। भासः संस्कृतसाहित्यस्य कुशलनाटककारः विद्यते। भासस्य नाटकेषु कथानकस्य संघटनं चरित्रचित्रणं कथोपकथनं रससंयोजनं च मनोहररीत्या सूचितानि। भाषा शैली च हृदयग्राहिणी आकर्षका समीचीना च विद्येते।

कालिदासः न केवलं संस्कृतसाहित्ये सुप्रसिद्धः कविः, अपि च विश्वसाहित्येऽपि स तथैव सुप्रसिद्धः। कालिदासः महाराजस्य विक्रमादित्यस्य पण्डितसभायां पुरा विराजितेषु नवरत्नेषु अन्यतमः आसीदिति प्रसिद्धिः। स्वप्रतिभाविशेषेण सर्वेषाम् आदरपात्रमासीदयं कविः। कालिदासस्य जन्मदेशः उज्जयिनीति अङ्गीक्रियते। क्रिस्तोः परं पञ्चमशतक एव कालिदासस्य काल इति मन्यन्ते केचित् पाश्चात्यपण्डिताः। महाकाव्यद्वयं, नाटकत्रयं, खण्डकाव्यद्वयञ्च कालिदासकृतिष्वन्तर्भवन्ति। नाटकत्रयम् – मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलञ्च। कालिदासेन रचितं प्रथमं नाटकं मालविकाग्निमित्रं भवति। अस्मिन् नाटके पञ्च अङ्काः सन्ति। मालविकायाः अग्निमित्रस्य च अनुरागकथा प्रतिपादिता भवति। शृङ्गाररसप्रधानमेकं उपरूपकं भवति विक्रमोर्वशीयम्। महाराजस्य पुरूरवसः अप्सरस्त्रियाः उर्वश्याश्चानुरागकथा भवतीतिवृत्तम्। कालिदासस्य सर्वोत्कृष्टं विश्वप्रसिद्धश्च नाटकं भवति अभिज्ञानशाकुन्तलम्। शकुन्तलायाः दुष्यन्तस्य च प्रणयकथा नाटकेऽस्मिन् इतिवृत्तं भवति। अत्र सप्त अङ्काः सन्ति। कल्पनाविशालत्वं, पदमाधुर्यं, वागर्थसंश्लेषणं, काव्यगुणानां समायोजनं, अलङ्कारसन्निवेशनं, वैदर्भीरीत्याः प्रसरणं, रसध्वनेः सौन्दर्यम् – इत्येवं अनेकेषां काव्यगुणानां आकर एव कालिदासरचनाः।

नाटकरचनायां गुणमाहात्म्येन कालिदासेन स्पर्ध्यते भवभूतिः। असौ कनौजदेशस्य राज्ञः यशोवर्मणः आस्थानकविः आसीत्। भवभूतेः यथार्थनामधेयं श्रीकण्ठ इति। तस्य मातापितरौ जातुकर्णिः नीलकण्ठश्च। भवभूतेः प्रथमं नाटकं महावीरचरितं भवति। रामायणादेतस्य कथा स्वीकृता भवति। महावीरः श्रीरामः। श्रीरामस्य चरितमेव महावीरचरितम्। मालतीमाधवं काचित् काल्पनिकप्रणयकथा सुमधुररूपेण कविना विकसिता भवति। तस्मादेवैतत् रूपकं प्रकरणविभागे अन्तर्भवति। दश अङ्काः सन्ति।। भवभूतेः उत्कृष्टरचना उत्तररामचरितं भवति। रामायणस्य उत्तरकाण्डप्रमेयः अस्मिन् प्रतिपाद्यरूपेण स्वीकृतः।। 'कारुण्यं भवभूतिरेव तनुते' इत्येवं काचिदुक्तिरस्ति। तत्कारणं नाटकेऽस्मिन् सुमधुररूपेण कृतः करुणरसविन्यास एव। रचनावैशिष्ट्यम् – काल्पनिकता, नवकल्पनानि, काव्यसौन्दर्यम्। भवभूतेः त्रिषु नाटकेषु, मालतीमाधवं सम्पूर्णतया काल्पनिककथासम्बद्धं भवति। बह्व्यः नवकल्पनाः कविना स्वनाटकेषु कृताः सन्ति। उत्तररामचरिते आत्रेयी, तमसा, वासन्ती इत्यादिकथापात्राणि भवभूतेः नूतनाविष्करणानि सन्ति। 'कारुण्यं भवभूतिरेव तनुते' इत्येतत् प्रस्तावः रसविन्यासे विशिष्य करुणरसविन्यासे कवेः सिद्धहस्ततां बोधयति। भरतमुनेः नाट्यशास्त्रनियमाः भासेन नानुसृताः। भवभूतेः नाटकेषु विदूषकाः न सन्ति। संस्कृतनाटककाराणां मध्ये काव्यमीमांसाकारैः कालिदासादनन्तरं स्थानं भवभूतेः दत्तमस्ति।

# Assignments

उत्तरं लिखत।

1. प्रथमनाटकानि केन रचितानि ?
2. कालिदासस्य कस्मिन् नाटके भासः परामृष्टः? इतिहासकाराणां मते भासस्य कालः कः?
3. स्वप्नवासवदत्तनाटके नायकः कः? नायिका का?
4. भासस्य नाटकद्वये उदयनः मुख्यकथापात्रं भवति। तन्नाटकद्वयं किम् ?
5. चारुदत्तनाटके नायिकायाः नाम किम् ?
6. अविमारके कयोः प्रेमकथा वर्णिता ?
7. भासस्य कस्मिन् नाटके कर्णः मुख्यकथापात्रं भवति ?
8. दूतशब्देन आरब्धं नाटकद्वयं भासेन लिखितम्। तद् नाटकद्वयं किम् ?
9. ऊरुभङ्गनाटके कस्य वधं रङ्गे प्रदर्शयति ?
10. श्रीकृष्णस्य बाललीलामाधारीकृत्य भासेन लिखितं नाटकं किम् ?
11. कालिदासः कस्य राज्ञः सदसि कविः आसीत् ? तस्य जन्मदेशविषये प्रबलोऽभिप्रायः कः?
12. कालिदासस्य प्रथमं नाटकं किम् ? तस्य प्रशस्ततमं नाटकं किम्?
13. भवभूतिः कस्य आस्थानकविः? तस्य जन्म कस्मिन् काले आसीत् ?
14. रामायणकथामाश्रित्य भासेन रचितं नाटकद्वयं किम् ?
15. महाभारतकथानुसारं लिखितानि भासनाटकानि कति ?
16. भासस्य शोकपर्यवसायि नाटकं किम् ?
17. भासनाटकानि सूत्रधारप्रवेशात् वा नान्दीमुखात् वा आरभते?
18. न कुर्याद् मरणं रङ्गे इति नियमः भासेन कस्मिन्  नाटके भज्यते?
19. कालिदासेन कति नाटकानि रचितानि ?
20. भवभूतेः प्रथमं नाटकं किम् ?
21. भवभूतेः सर्वोत्कृष्टरचना का ?

टिप्पणिं लिखत

1. अभिज्ञानशाकुन्तलम्।
2. कालिदासस्य त्रीणि नाटकानि।

निबन्धात्मकप्रश्नाः

1. भासनाटकचक्रम्।

2. भासस्य रचनावैशिष्ट्यम्।
3. कालिदाससस्य रचनावैशिष्ट्यम्।
4. भवभूतिनाटकेषु उत्तररामचरितस्य वैशिष्ट्यम्।
5. भवभूतेः रचनावैशिष्ट्यम्।

## Suggested Readings


1. Dr.Kunjunniraja - Samskṛta Sāhityacaritram, Kerala Sahitya Academy.
2. Prof. C.Ramanathan - A brief sketch of life and works of Bhavabhuti.
3. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
4. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वराणसी।
5. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
6. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992


## References


1. T.K.Ramachandra Iyyer, A short History of Sanskrit Literature, R S Vadhyar & Sons Kalpathy, Palakad, 2018.
2. Arther A Macdonnel, A History of Sanskrit Literature, London William Heinemann, MDCCCC
3. A.B.Keith, Sanskrit drama –Geoffrey cumberlege, Oxford University Press
4. Dr.Sudhamsu Caturvedi-Bhāsanāṭakasaṛvasvam
5. Prof. C.Ramanathan. A brief sketch of life and works of Bhavabhuti, Indian Institute of World Culture, Banglore.
6. Dr.K.Kunjunniraja - Sanskrit on the stage , Madras University of Madras
7. M.R.Kale. Ed. 'The Mudrārākṣasam of Viśākhadatta', Digital library of India.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# नाटकावतरणम्

## Learning Outcomes

- संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।
- नाटकप्रभृतीनां आस्वादनाय क्षमतोत्पादनम्।
- नाटकावतरणे साङ्केतिकानां पदानां ज्ञानम्।

## Background

ऋग्वेदगताः यमयमीसंवादाः सरमापाणिसंवादाः, उर्वशीपुरूरवस्संभाषणं, रामायणादि कथानां भाषणं इत्यादिकं आङ्गिकेन कृतमिति दृश्यकाव्यानां प्रारम्भमिति वक्तुं शक्यते। भारतीयनाटकानाम् उद्भवमधिकृत्य पाश्चात्यपण्डितानां मतान्यपि द्रष्टव्यानि। डा. कीथ् महोदयः 'प्राकृतिकपरिवर्तनानां मूर्तरूपं साधारणजनसमक्षं अवतारयितुमेव नाटकानामुदयो जातः। महाभाष्यनिर्दिष्टे कंसवधे नामके नाटके कृष्णपक्षीयाः रक्तमुखाः कंसपक्षीयाः च श्याममुखाः भवन्ति। तत्र वसन्तस्य हेमन्तोपरि विजय एव दर्शयितुमभिलषितः। कृष्णविजयेन प्रकृतिकोपं प्रति प्रकाश अधीयत' इत्यादयः अभिप्रेति। डा. पिशेल महोदयः पुत्तलिकानृत्यमूलं नाटकानामुदयं वदति। नाटकेषु प्रचलिताः सूत्रधारशब्दाः एतत्प्रबलयन्ति। सूत्रधारः सूत्रमादाय पुत्तलिकां नर्तयति। पुत्तलिका नृत्यमूला नाटकप्रवृत्तिः इति। रिजवे महाशयः वीरपूजामूलकं भारतीयनाटकस्य उद्भवं मन्यते। रामलीला, कृष्णलीला च उदाहरणे।

भारतीयनाटकानामुत्पत्तिः पोल् नृत्याधारमिति अन्ये केचित्पाश्चात्यपण्डिताः अभिप्रयन्ति। तस्मिन् देशे शीतमासे ध्वजाकारं वंशमारोप्य तस्याधः स्त्रीपुरुषाः नृत्यन्ति स्म। नाटकस्याविर्भावे एतदाधार इति तेषां मतम्। एवं नाटकस्य उत्पत्तौ मतभेदाः सन्ति।

पतञ्जलिमुनेः महाभाष्ये द्वयोः नाटकयोः सूचना अस्ति। तावेव कंसवधः, बालिबन्धः च।

नाटकयोरेतयोः अवतारणमपि शोभनिकाः कृतवन्तः। भरतस्य नाट्यशास्त्रेऽपि 'लक्ष्मीस्वयंवरम्' इति नाटकस्य रङ्गावतरणमधिकृत्य सूचना भवति। कथावस्तुनः स्वभावः, नाटकस्य दैर्घ्यं, नायिकानायकयोः स्वभावः, रसाः इत्यादीनाधारीकृत्य भरतः नाटकान् दशप्रकारान् चकार।

## Keywords

रूपकेषु नाटकस्य प्रामुख्यम्, नाटकं ख्यातवृत्तं, पञ्चसन्धयः, नाट्याविर्भावकालः।

## Discussion

रूपकेषु नाटकस्य प्रामुख्यमस्ति। सर्वेषां रूपकाणां मूलं नाटकमेव; नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्यं विद्यते; रूपकाणां सम्पूर्ण लक्षणं नाटक एव विद्यते। एवं दशसु रूपकेषु मध्ये प्रामुख्यं भजतो नाटकस्य प्रारंभः परिसमाप्तिश्च मङ्गलपूर्वको भवितव्य इत्यपि व्यवस्था क्रियते।

### नाटके वस्तुप्रपञ्चनम् –

प्रस्तावनया कथां पात्रञ्चाक्षिप्य सूत्रधारो निर्गच्छति। तदनन्तरं कथावस्तुनः प्रपञ्चनं सुसूक्ष्मं करणीयम्। तत्र च नाटकस्य कथावस्तुनो नायकादीनाञ्च विषये सुनिष्कर्षा विधिरस्ति। यथा –

**"आभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्॥**

**कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः।**

**प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः॥**

**तत्प्रख्यातं विधातव्यं वृत्तमात्राधिकारिकम्।**

**यत्तत्रानुचितं किञ्चिन्नायकस्य रसस्य वा॥**

**विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्।**

**आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च॥**

**खण्डशः सन्धिसंज्ञांस्तान् विभागानपि खण्डयेत्।"**

(दशरू. 3/22-26) इति।

"नाटकं ख्यातवृत्तं स्यात्"

एतदनुसारेण नाटकस्य नायकः प्रतापवान् धीरोदात्तः, वेदरक्षकश्च राजा भवितव्यः। इतिहासप्रसिद्धं इतिवृत्तं चाधिकारिकं कर्तव्यम्। "नाटकं ख्यातवृत्तं स्यात्" इति सिद्धान्तयन् आचार्यविश्वनाथोऽपि नाटकस्येतिवृत्तं इतिहासपुराणादिषु प्रसिद्धमेव भवितव्यमिति स्पष्टयति। वैदिकानामाशयानां जनहृदयेषु सङ्क्रमणं, तद्द्वारा जनानां मोक्षमार्गनिर्देशनञ्च काव्यानां लक्ष्येषु मुख्यतया गण्यते। नायकस्य रसस्य वा विरुद्धं किमपि तत्र न स्यात्। तदर्थं इतिवृत्ते परिवृत्तिं कर्तुं कवेरधिकारोऽस्ति। कथावस्तु पूर्णतयैव मनसि कृत्वा इतिवृत्तं पञ्चसन्धिषु विभज्य च नाटके वस्तुप्रपञ्चनं कार्यमिति निष्कर्षः।

**पञ्चसन्धयः**

रूपकेषु नाटकस्य प्रामुख्यादेव, तत्र कथावस्तुनः सन्निवेशः सुसूक्ष्मं करणीयः। तत एव धनञ्जयः नाटककथावस्तु पञ्चसन्धिषु संविभज्य प्रयोक्तव्यमिति सिद्धान्तयति। पञ्चानामर्थप्रकृतीनां पञ्चानामवस्थानाञ्च सम्यक्तया सन्निवेशेन सन्धिकार्यं निर्वर्त्यत इत्यतस्तदधिकृत्यापि किञ्चिद्वक्तव्यमेव।

पञ्च अर्थप्रकृतयः – बीजं, बिन्दुः, पताका, प्रकरी, कार्यम्।

अर्थप्रकृतिरित्यत्र अर्थशब्देन प्रयोजनं अथवा फलं उद्दिश्यते। प्रकृतिरिति तस्य सिद्धिहेतुः। फलप्राप्त्यर्थं याः उपयुज्यन्ते ता एवार्थप्रकृतयः। धनञ्जयेन दशरूपके अर्थप्रकृतयः अवस्थाः पञ्चसन्धयश्चोक्ताः। पञ्च अर्थप्रकृतयः – बीजम्, बिन्दुः, पताका, प्रकरी, कार्यम्।

इतिवृत्तस्य भेदद्वयम् - आधिकारिकं पासङ्गिकम्।

एतत्प्रतिपादनाय प्रथममेव कथावस्तुनः(इतिवृत्तस्य) आधिकारिकं प्रासङ्गिकञ्चेति द्वैविध्यमुक्तम्।यथा -

**"तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः।"**

(द.रू. 1/11) इति।

प्रधानभूतमाधिकारिकं यथा रामायणे रामसीतावृत्तान्तः।

कुतस्तस्याधिकारिकत्वमिति चेत् –

**"अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः**

**तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्॥"** इति प्रोक्तम्।

प्रासङ्गिकेतिवृत्तस्य भेदद्वयम्-

पताका, प्रकरी

कथावस्तुनः आत्यन्तिकफलप्राप्तेः अर्हतैव अधिकारशब्देन विवक्षिता। मुख्यकथायाः फलप्राप्तिपर्यन्तं अभिव्याप्य स्थितं भवत्याधिकारिकं वस्तु। तत्र च फलप्राप्तिः नायकस्यैव स्यात्। नायकस्य फलप्राप्तौ सहायकतया, मुख्यकथाङ्गरूपेण वर्तमानं भवति प्रासङ्गिकं वस्तु। प्रासङ्गिकेऽपि वस्तुनि तन्नायकस्य स्वकार्यसिद्धिर्भवति। यथा रामायणे सीतान्वेषणाय रामस्य साहाय्यं कुर्वतः सुग्रीवस्यापि राज्यप्राप्तिः। प्रासङ्गिकस्य वस्तुनः पताका-प्रकरी चेति भेदाद् द्वैविध्यम्। तयोश्च -

**"सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक् ।"**(द.रू. 1/13)

पताकाप्रकर्योर्मिथः भेदः

यद्दूरमनुवर्तते सा पताका भवति, सुग्रीवादि वृत्तान्तवत्। यदल्पं भवति सा प्रकरी, श्रावणादिवृत्तान्तवत्। कस्याञ्चिदेकस्मिन् प्रकरण एव स्थितं प्रकरी; प्रकरणान्तरेष्वपि व्याप्य स्थितं पताका चेति विवेकः। पताकानायकस्य स्वफलसिद्धिर्भवति, प्रकरीनायकस्य तु तन्न भवति इत्यपि भेदो द्रष्टव्यः।

एवम् कथावस्तुनः आधिकारिकं, प्रासङ्गिकद्वयञ्चेति त्रैविध्यमुक्त्वा पुनस्तेषां त्रयाणामपि त्रैविध्यमुच्यते, तत्फलं चैवं प्रदर्शितम् –

**"प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधापि तत्त्रिधा।**
**प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्॥**
**मिश्रं च सङ्करात्ताभ्यां दिव्यमर्त्यादिभेदतः।**
**कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च॥"**

(दशरू. 1/15, 16) इति।

इतिहासपुराणादिषु प्रसिद्धं प्रख्यातं; कविना स्वप्रतिभया कल्पितं उत्पाद्यं;

प्रख्यातेऽपीतिवृत्ते कविना भेदाः कल्पिताश्चेत् तन्मिश्रं च। तस्येतिवृत्तस्य

फलं धर्मार्थकामानां प्राप्तिरिति च प्रदर्शितम्। तदनन्तरं तत्फलसाधनतया अर्थप्रकृतय उच्यन्ते -

**"स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा।"** (द.रू. 1/17)

पूर्वं स्वल्पतया निर्दिष्टः, पश्चात् कार्यसाधकतया अनेकप्रकारं विस्तारं प्राप्स्यमाणं च हेतुविशेषो बीजम्। वृक्षबीजवत् अल्पप्रमाणतया अङ्कुरितमपि बृहदाकारं भजतीत्यस्मात् तद्बीजम्। यथा वेणीसंहारे द्रौपदीकेशसंयमनहेतुः भीमक्रोधोपचितो युधिष्ठिरोत्साहः बीजम्। अस्य महाकार्यबीजं, अवान्तरकार्यबीजं इत्यादिभेदाः सन्ति इत्युक्तम्। अथ बिन्दुः -

**"अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।।"** (द.रू. 1/17)

इति अवान्तरबीजस्य संज्ञान्तरमेव बिन्दुरिति निर्दिष्टम्। यथा तैलबिन्दुः जलोपरि व्याप्य नीरन्ध्रतया तिष्ठति, तथा विच्छिन्नस्य कथांशस्य अविच्छिन्नतां विदधात्ययमित्यर्थः। बीजं, बिन्दुः, पताका, प्रकरी, कार्यं इत्येते पञ्चार्थप्रकृतय इति चोक्तम् –

**"बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः।**
**अर्थप्रकृतयः पञ्चधा एताः परिकीर्तिताः॥"**

(दशरू. 1/18) इति।

**अथावस्थापञ्चकमप्याह-**

पञ्च अवस्थाः – आरंभः,यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमः

**अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।**
**आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।"** (द.रू.1/19)इति।

1. आरम्भः -

**"औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।।"** (द.रू. 1/20)

'इदमहं संपादयामि' इत्यध्यवसायमात्रम् आरम्भ इत्युच्यते।

2. प्रयत्नः –

**"प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः।।"**

तत्र फलस्य अप्राप्तौ उपाययोजनादिरूपः चेष्टाविशेषः प्रयत्नः।

3. प्राप्त्याशा -

"उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः।।" (द.रू.1/21)

उपायस्य अपायशङ्कायाश्च भावादनिर्धारितैकान्ता फलप्राप्तिः प्राप्त्याशा।

4. नियताप्तिः –

**"अपायभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता।"** (द.रू.1/22)

विघ्नानामभावेन फलप्राप्तेः सुनिश्चयः नियताप्तिरित्यर्थः।

5. फलागमः –

**"समग्रफलसंपत्तिः फलयोगो यथोदितः।।"** (द.रू. 1/22)

समस्तफलसंपत्तिरेव फलागमः। एवं पञ्चावस्थाः।

**सन्धयः -**

**"अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः।।**
**यथासंख्येन जायन्ते मुखाद्याः पञ्च सन्धयः।"**

(द.रू. 1/22,23)

अर्थप्रकृतीनां पञ्चानां यथासंख्यं पञ्चावस्थाभिः योगात् यथासंख्यमेव वक्षमाणा मुखाद्याः पञ्चसन्धयो जायन्ते। "अन्धरैकार्थसंबन्धः सन्धिरेकान्वये सति।" इति सन्धिसामान्यलक्षणमुक्त्वा सन्धयः उच्यन्ते -

पञ्चसन्धयः - मुखं, प्रतिमुखं, गर्भः,अवमर्शः, निर्वहणम्

**"मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः।"** (द.रू. 1/24) इति।

मुखं, प्रतिमुखं, गर्भः,अवमर्शः,निर्वहणं - इत्येते पञ्च सन्धयः। तत्र

**मुखसन्धिः-**

**"मुखं बीजसमुत्पत्तिर्नानार्थरससंभवा।।**
**अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात्।"** (द.रू. 1/24, 25)

मुखसन्धेः द्वादशाङ्गानि भवन्ति।

बीजानाम् उत्पत्तिः, अनेकप्रकारप्रयोजनस्य रसस्य च उत्पत्तिहेतुर्भवति मुखसंधिः। तेन अनुद्दिष्टत्रिवर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव बीजत्वम्। अस्य च बीजारम्भार्थयुक्तासंबद्धानि द्वादशाङ्गानि भवन्ति। तानि च - उपक्षेपः, परिकरः, परिन्यासः, विलोभनम्, युक्तिः, प्राप्तिः, समाधानम्,

विधानम्, परिभावना, उद्भेदः, करणम्, भेदः इत्येतानि। तेषामत्र विशदतया प्रतिपादनं न क्रियते।

प्रतिमुखसन्धेः त्रयोदशाङ्गानि भवन्ति।

**प्रतिमुखसन्धिः –**

**"लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत्।**

**बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ।।"** (द.रू. 1/30)

तस्य बीजस्य किंचिल्लक्ष्यः इव किंचिदलक्ष्य इव च प्रकाशनं प्रतिमुखम्। अस्य च बिन्दुरित्यर्थप्रकृतेः प्रयत्नाख्याया अवस्थायाश्चानुरोधेन त्रयोदशाङ्गानि भवन्ति।

**गर्भसन्धिः –**

**"गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः।**

**द्वादशाङ्गः पताका स्यान्न वा स्यात्प्राप्तिसंभवः।।"** (द.रू. 1/36)

प्रतिमुखसन्धौ लक्ष्यालक्ष्यरूपतया किञ्चिदिव उद्भिन्नस्य बीजस्य बाधासहितो लाभः, पुनरपि तन्नष्टप्रायत्वं, पुनश्चापि तत्प्राप्तिः, पुनर्विच्छेदः इत्येवं तत्प्राप्तौ अनिश्चितत्वापत्तिः इति पुनःपुनरन्वेषणपरा, प्राप्त्याशात्मिका च भवति गर्भसन्धिः।

**अवमर्शसन्धिः –**

**"क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात्।**

**गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः।।"** (द.रू. 1/43)

अवमर्शनमवमर्शः पर्यालोचनम्। तच्च क्रोधेन वा व्यसनाद्वा विलोभनेन वा भवितव्यम्। एष्वन्यतमेन हेतुना फलप्राप्तिविषये पर्यालोचनम्, तथा च गर्भसन्धिद्वारा प्रस्फुटितस्य बीजार्थस्य संबन्धश्च यत्र वर्तते तत्रावमर्शसन्धिः। अनेनार्थेनेत्यवधारितैकान्तफलप्राप्त्यवसायात्मा गर्भसन्धेः भिन्नबीजार्थसंबन्धो विमर्शोऽवमर्शः। अस्य त्रयोदशाङ्गान्युक्तानि।

**निर्वहणसन्धिः –**

**"बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।।"**

**"ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्।"** (द.रू.1/48,49)

तत्र तत्र प्रकीर्णतया स्थिताः, मुखादिसंबन्धयुक्ताश्चार्थाः नायकस्य मुख्यफलसिद्धये यत्र सम्मिलिता भवन्ति तत्रैव निर्वहणसन्धिः।

तदङ्गानिच

"सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्॥

**प्रसादानन्दसमयाः कृतिभाषोपगूहनाः।**

**पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश॥**" (द.रू.1/49,50)

इत्युक्तानि।

तदनुसारेण च मुखसन्धेः - संन्धिः, विबोधः, ग्रथनम्, निर्णयः, परिभाषणम्, प्रसादः, आनन्दः, समयः, कृतिः, भाषा, उपगूहनं, पूर्वभावः, उपसंहारः, प्रशस्तिश्चेति चतुर्दशाङ्गानि सन्ति।

**पञ्च सन्धयः**

| सन्धिनामानि | मुखम् | प्रतिमुखम् | गर्भः | अवमर्शः | निर्वहणम् |
|---|---|---|---|---|---|
| लक्षणानि | "मुखं बीजसमुत्पत्तिर्नानार्थ-रससंभवा" | "लक्ष्यालक्ष्यतयो-द्भेदस्तस्य प्रतिमुखं भवेत्"। | "गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः" | "क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात्। गर्भनिर्भिन्न-बीजार्थः सोऽवमर्श इति स्मृतः" | "बीजवन्तो मुख्याद्यर्था विप्रकीर्णा यथायथम्"।। "ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्"। |

**नाटकस्योदाहरणानि** – भासेन विरचितं स्वप्नवासवदत्तम्।

कालिदासेन विरचितं अभिज्ञानशाकुन्तलम्।

भवभूतिना विरचितं उत्तररामचरितम्

भट्टनारायणेन विरचितं वेणीसंहारम् - इत्यादीनि नाटकस्योदाहरणानि।

**नाट्याविर्भावकालः**

तदेतस्य नाट्यशास्त्रस्याविर्भावकालं कालविदः प्राक् क्रैस्तद्वितीय-शतकं निर्णयन्ति। सैषा दृश्यकाव्योपज्ञता तु तत्रभवन्तं नाट्याचार्य भगवद्भरतमुनिपादमेवालङ्करोति। श्रव्यकाव्यारम्भकालस्तु क्रैस्तीं पञ्च-मशताब्दीमेवालम्बते।

भारतीयनाट्यप्रपञ्चे ग्रीकदेशीयनाटकानां प्रभावोऽनुमीयत इति वदतामनुवदताञ्चावधारणं भ्रमविजृम्भितमेवेति निदिष्टपूर्वम् इति धिक्!

उपरितनेन विवरणेन सुतरामेतदभ्युपपत्रं भवति यद्भूव्यं भारतमेव तावन्नाट्यकलायाः आदिमोद्गमभूमिः। संस्कृतनाट्यकलात एव सर्वत्र नाट्यतन्त्रं प्रसृतम्। अतएव भारतीयनाट्यकलेयमुत्कर्षस्य परां कोटिमवगाहमाना वरीवर्त्ति।

नाटकस्येतिवृत्तम् इतिहासपुराणादिषु प्रसिद्धमेव भवति

एतदनुसारेण नाटकस्य नायकः प्रतापवान् धीरोदात्तः, वेदरक्षकश्च राजा भवितव्यः। इतिहासप्रसिद्धं इतिवृत्तं चाधिकारिकं कर्तव्यम्। "नाटकं ख्यातवृत्तं स्यात्" इति सिद्धान्तयन् आचार्यविश्वनाथोऽपि नाटकस्येतिवृत्तं इतिहासपुराणादिषु प्रसिद्धमेव भवितव्यमिति स्पष्टयति। वैदिकानामाशयानां जनहृदयेषु सङ्क्रमणं, तद्वारा जनानां मोक्षमार्गनिदेशनञ्च काव्यानां लक्ष्येषु मुख्यतया गण्येते। नायकस्य रसस्य वा विरुद्धं किमपि तत्र न स्यात्। तदर्थं इतिवृत्ते परिवृत्तिं कर्तुं कवेरधिकारोऽस्ति। कथावस्तु पूर्णतयैव मनसि कृत्वा इतिवृत्तं पञ्चसन्धिषु विभज्य च नाटके वस्तुप्रपञ्चनं कार्यमिति निष्कर्षः।

भारतीयनाटकानि बहुशः सुखान्तानि भवन्ति, न जातु दुःखान्तानि। यद्यपि दुःखान्तनाटकानां सर्वथैवाभावस्तु नास्ति संस्कृतवाङ्मये, तथापि सुखान्तानि एव तानि भूम्ना उपलालितानि भवन्ति कविभिरिव जनसाधारणैरपि।

यत्र स्थाने नाटकान्यभिनीयन्ते तद् रंगशालेत्युच्यते

यत्र स्थाने नाटकान्यभिनीयन्ते तद् रंगशालेत्युच्यते। यत्र च अभिनेतारो नटाः स्वस्ववेषभूषाभिरात्मनः प्रसाधयन्ति-भूषवन्ति तन्नेपथ्यम्। नाट्यशालाया व्यवस्थापकः सूत्रधारः, तत्पत्नी च नटी परिभाष्यते। नाटके मङ्गलाचरणं हि नाम नान्दीत्युच्यते। नान्द्यां हि कथावस्तुनो निर्देशः दिङ्मात्रं प्रस्तूयते। सूत्रधारश्च पुनः कवेः नाटकस्य च

परिचयं सभां प्रति ससम्मानं विनिवेद्य रङ्गमञ्चतो निष्कान्तो भवति। नायकश्च पुनर्धीरोदात्तः कुलीनश्च भवति, नायिकाऽपि तादृशी एव। प्रायशः चेमानि एकाङ्कादारभ्य दशपर्यन्तैरङ्कैर्निबध्यन्ते। तत्र नाटिका नावतुष्ट्यप्रणिबद्धा भवन्ति, प्रहसनन्तु खल्वेकाङ्कसमलङ्कृतमेवेति प्रायशो न तत्र दशन्निर्बन्धविशेष इति।

नाटके मङ्गलाचरणं हि नाम नान्दीत्युच्यते।

स्वततः प्रस्तावनां विधाय निष्क्रान्ते सति सूत्रधारे नाटकारम्भो भवति। अङ्कस्य परिसमाप्तौ अङ्कान्तरोपक्रमे च प्रवेशविष्कम्भ-कादिनामभिव्यक्त्या अङ्कोत्थानिका भवति। नाटकान्ते चाशीरभ्यर्थनासंवलितं छन्दोबद्धं भरतवाक्यसंज्ञकं पद्यं पठ्यते। नाट्यशास्त्रस्य भरतोपज्ञत्वात् तन्महामुनिस्मृताविव प्रत्येकं नाटकं भरतवाक्येनैव परिसमाप्यते। न हि भरतवाक्यमन्तरा कस्यापि नाटकस्य पर्यवसितिः शक्यसङ्कल्पा इति।

संस्कृतनाटकेषु प्रयुज्यमाना भाषा संस्कृत-प्राकृतमिश्रिता भाषा। सोऽयमपरो विशेषः संस्कृतनाटकानाम्। तत्र नायकादि प्रमुखपात्राणां भाषा संस्कृतं, स्त्री-तत्सहचरिणां वा भाषा प्राकृतं भवति।

विदूषको हि नाम नायकसखः, न तु तदीयो दासः

संस्कृतनाटकेषु विदूषकस्य स्थानमप्यतीव महत्पूर्णम्। विदूषको हि नाम नायकसखः, न तु तदीयो दासः। अभिनयो न केवलं हास्यरसोत्पादनमेव तस्य कार्यमपि तु यथावसरं नायककर्त्तव्यकार्येषु साहाय्यकरणमपि तस्य कर्त्तव्यत्वेन निर्दिश्यते।

**सांकेतिकपदानि।**

**अभिनयः** - अवस्थानुकारः अभिनयः। वास्तविकानां रामादेः धर्माणां अनुकरणं सदृशीकरणं अवस्थानुकारः। स अभिनयः चतुर्विधः। आङ्गिकः, वाचिकः, आहार्यः, सात्विकः चेति। अङ्गेन निष्पन्नः आङ्गिकः। वचसा प्रतिपाद्यः वाचिकः। आहारणीयमुकुटकेयूरादिरचनानिष्पाद्यः आहार्यः। स्तम्भभेदादिरूपः सात्विकः।

**नान्दी** - नन्दयति स्तुत्या देवानानन्दयति इति नान्दी।

**आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।**
**देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।**

देवद्विजगुर्वादीनां आशंसाप्रतिपादकेन वचनेन संयुक्ता स्तुतिः यस्मात् प्रवर्तते नटैः श्राव्यते तत्सम्बन्धात् नान्दीति संज्ञिता।

सूत्रं धारयतीति सूत्रधारः

**सूत्रधारः** - सूत्रं धारयतीति सूत्रधारः ।

**नाट्योपकरणानि सूत्रमित्यभिधीयते ।**
**सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ।।**

अन्यदपि -

**नाटकीयकथासूत्रं प्रथमं येन सूच्यते।**
**रङ्गभूमिं समासाद्य सूत्रधार स उच्यते ।।** इति ।

**स्थापकः** - काव्यार्थस्य स्थापनात् स्थापकः। भरतः 'स्थापकः प्रवेशेत्तत्र सूत्रधारगुणाकृतिः' इति। स स्थापकः भारतीं वृत्तिमाश्रितः सन् काव्यार्थः दृश्यकाव्यवृत्तान्तः तत्सूचकैः मधुरैः श्लोकैः रंगं प्रसाद्य सामाजिकगणं प्रीणयित्वा अभिनेयदृश्यकाव्यस्य कवेश्च नाम कवेः गोत्रं च कथयेत्। सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते।

प्रस्तावयति प्रकृताभिनयविषयं सूचयति या सा प्रस्तावना

**प्रस्तावना** - नटः, विदूषकः, पारिपार्श्विकः वा सूत्रधारेण सहिता स्वस्वकर्तव्यविषयमाश्रित्य उपयुक्ताः प्रस्तुतं दृश्यकाव्यविषयं सूचयन्ति। तैः चित्रैः वाक्यैः मिथः संलापं कुर्वते आमुखम् इति विज्ञेयम्। नाम्ना प्रस्तावयति प्रकृताभिनयविषयं सूचयति या सा प्रस्तावना।

**इतिवृत्तम्** - अभिनेतव्य वृत्तान्तः इतिवृत्तम्।

**नायकः** - त्यागी, धीरकर्मकुशलः, कुलीनः, बुद्धिमान्, सुन्दरः, युवा, उत्साही, दक्षः, अनुरक्तलोकः, तेजोयुक्तः, वैदग्ध्यशीलवान् च नायकः। नायकः चतुर्विधः धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरशान्तः च ।

**विष्कम्भकः** - अतीतानां वृत्तानां वर्तिष्यमाणानां कथांशानां निदर्शकः संक्षिप्तार्थः अङ्कस्यारम्भे प्रयोजितः विष्कम्भः स्यात्। शुद्धः संकीर्णः चेति विष्कम्भकः द्विविधः।

प्रवेशकः - अङ्कद्वयस्य मध्ये अनुदात्तोक्त्या संस्कृतेतरभाषया नीचेन नीचाभ्यां पात्राभ्यां नीचैर्वा प्रयोजितः रूपकांशविशेषः अप्रत्यक्षार्थान् सामाजिकहृदये प्रवेशयति स प्रवेशकः।

## Summarised Overview

सर्वेषां रूपकाणां मूलं नाटकमेव; नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्यं विद्यते; रूपकाणां सम्पूर्णं लक्षणं नाटक एव विद्यते। एभिरेव हेतुभिः नाटकस्य प्रामुख्यं सर्वैरङ्गीकृतं वर्तते। प्रस्तावनया कथां पात्रञ्चाक्षिप्य सूत्रधारो निर्गच्छति। तदनन्तरं कथावस्तुनः प्रपञ्चनं सुसूक्ष्मं करणीयम्। तत्र च नाटकस्य कथावस्तुनो नायकादीनाञ्च विषये सनिष्कर्षा विधिरस्ति। एतदनुसारेण नाटकस्य नायकः प्रतापवान् धीरोदात्तः, वेदरक्षकश्च राजा भवितव्यः। नाटकस्येतिवृत्तं इतिहासपुराणादिषु प्रसिद्धमेव। कथावस्तु पूर्णतयैव मनसि कृत्वा इतिवृत्तं पञ्चसन्धिषु विभज्य च नाटके वस्तुप्रपञ्चनं कार्यमिति निष्कर्षः।

नाटककथावस्तु पञ्चसन्धिषु संविभज्य प्रयोक्तव्यमिति। पञ्च अर्थप्रकृतयः - बीजम्, बिन्दुः, पताका, प्रकरी, कार्यम्। इतिवृत्तस्य भेदद्वयम् - आधिकारिकं प्रासङ्गिकम्। प्रासङ्गिकेतिवृत्तस्य भेद्वम्- पताका, प्रकरी। पञ्च अवस्थाः - आरंभः,यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमः। पञ्चसन्धयः - मुखं, प्रतिमुखं, गर्भः, अवमर्शः, निर्वहणम्।

यत्र स्थाने नाटकान्यभिनीयन्ते तद् रंगशालेत्युच्यते। अभिनेतारो नटाः। नाट्यशालाया व्यवस्थापकः सूत्रधारः। नाटके मङ्गलाचरणं हि नाम तान्दीत्युच्यते। नायकश्च पुनर्धीरोदात्तः कुलीनश्च भवति, नायिकाऽपि तादृशी एव। स्वततः प्रस्तावनां विधाय निष्क्रान्ते सति सूत्रधारे नाटकारम्भो भवति। नाटकान्ते चाशीरभ्यर्थनासंवलितं छन्दोबद्धं भरतवाक्यसंज्ञकं पद्यं पठ्यते। नाटकान्ते विश्वशान्त्याशंसापूर्वकं प्रायः नायकेनैव प्रयुज्यमानं आशंसावाक्यं भवति 'भरतवाक्यम्'। न हि भरतवाक्यमन्तरा कस्यापि नाटकस्य पर्यवसितिः शक्यसङ्कल्पा इति। संस्कृतनाटकेषु प्रयुज्यमाना भाषा संस्कृत-प्राकृतमिश्रिता च। नायकादि प्रमुखपात्राणां भाषा संस्कृतं, स्त्री-तत्सहचरिणां वा भाषा प्राकृतं भवति।

# Assignments

उत्तरं लिखत

1. अर्थप्रकृतयः काः ?
2. इतिवृत्तस्य भेदद्वयं किम्?
3. पताकाप्रकर्योर्मिथः को भेदः ?
4. पञ्चसन्धयः के ?
5. मुखसन्धेर्लक्षणं किम्? कति अङ्गानि सन्ति ?
6. प्रतिसन्धेर्लक्षणं किम् ? कति अङ्गानि सन्ति ?
7. नान्दी किमर्थं प्रयुज्यते ?
8. भरतवाक्यं कदा प्रयुज्यते?
9. नाटके कः पूर्वरङ्गं विधत्ते ?
10. किं नाम विदूषकः?
11. किं नाम सूत्रधारः?
12. प्रस्तावना किम् ?
13. विष्कम्भकः किम् ?
14. प्रवेशकः किम् ?

टिप्पणिं लिखत।

1. काव्येषु नाटकस्य प्राशस्त्यं कुतः ?
2. रूपकेषु नाटकस्य प्रामुख्यं विशदयत।
3. "नाटकं ख्यातवृत्तं स्यात्" सप्रसङ्गं व्याख्यात।
4. 'काव्येषु नाटकं रम्यम्'- उक्तिमिमां स्पष्टयत।

निबन्धात्मकप्रश्नौ ।

1. नाट्याविर्भावकालं विशदयत।
2. नाटकावतरणम् अधिकृत्य निबन्धो लेख्यः।

# Suggested Readings

1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वराणसी।
3. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
4. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992

# References

1. Dasarupaka of Dhananjaya, Chapter III, Chowkhambha Sanskrit Series, Varanasi.
2. A short History of Sanskrit Literature, T.K. Ramachandra Iyer, R.S. Vadyar & Sons, Kalpathy.
3. The types of Sanskrit drama, Dr. R. Makkad, Charotar Book Stall, Guarat.
4. The Sanskrit Drama in its Origin, Development, Theory and Practice, Motilal Banarasidass Publishers, Delhi.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# संस्कृते राजनैतिकनाटकानि

## Learning Outcomes

- संस्कृते राजनैतिकनाटकानाम् अवलोकनम्।
- प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम् इति अवगच्छति।
- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् आर्जयति।

## Background

अवस्थानुकृतिर्नाट्यम्। अनुकरणमेव नाटकस्य मूलाधारः। लोकरञ्जकत्वमेव नाटकस्य मुख्यं प्रयोजनम्। लोकव्यवहारं तत्तत्कालीनं समाजव्यवस्थां च नाटकेषु चित्रिता वर्तते। राष्ट्रिय-सामूहिक-नीतिपराणि कर्याणि विशदीकृतानि संस्कृतनाटकानि सन्ति। तेषु प्रसिद्धानि भवन्ति शूद्रकस्य मृच्छकटिकम्, विशाखदत्तस्य मुद्राराक्षसम्, भट्टनारायणस्य वेणीसंहारं च। अधिकारगर्वं राजबन्धूनां दुष्प्रवृत्तिं समूहस्य जीर्णतां च प्रतिपादयति शूद्रकः मृच्छकटिके। तत्समये साधुजनानां चिन्ताधाराः प्रकीर्तयति च। राजतन्त्रस्य दौर्बल्यं सूचयन् नाटककर्ता साधुजनसंरक्षणं च विशदयति। मुद्राराक्षसे चाणक्यराक्षसयोः गूढनैतिकविलासः विशाखदत्तेन वर्णितोऽस्ति। कुटिलरीत्या राज्यभरणम् इष्टं नायकं राजपदवीमानयितुं कृतः प्रयत्नः च चित्रीकृतः। पौरुषस्य उत्साहस्य ऊर्जिस्वितायाश्च वर्णनया साकं राजनीतिं सुष्ठु प्रतिपादयति। भट्टनारायणस्य वेणीसंहारं सर्वलक्षणोपेतं राजनैतिकं शास्त्रीयनाटकमेव। नैतिकयुक्तानां तादृशानां नाटकानां विवरणमत्र विशदीकरिष्यामः।

## Keywords

शूद्रकपरिचयः, शूद्रकस्य प्रकरणम्, शूद्रकस्य रचनावैशिष्ट्यम्, विशाखदत्तपरिचयः, मुद्राराक्षसस्य कथावस्तु, विशाखदत्तस्य रचनावैशिष्ट्यम्, देवीचन्द्रगुप्तम्, भट्टनारायणपरिचयः, वेणीसंहारस्य वैशिष्ट्यम्।

## Discussion

### 1. मृच्छकटिकम्

#### 1.1. शूद्रकपरिचयः।

संस्कृतसाहित्ये सर्वोत्कृष्टं प्रकरणं भवति मृच्छकटिकम्। अस्य कर्तुः कालस्य च विषये विभिन्नाभिप्रायाः सन्ति। किन्त्वपि भारतीयपैतृकं अस्य कर्तृत्वं शूद्रके निश्चितमस्ति। शूद्रकः कश्चन राजा इति ग्रन्थादवगम्यते। भारतीयपरम्परायां शूद्रकनामधेये बहवः राजानः दृश्यन्ते। स्कन्दपुराणस्य कुमारिकाकाण्डे कस्यचन शूद्रकस्य नाम आगच्छति, यः क्रिस्तोः पश्चात् १९० वर्षे राज्यभरणं कृतवानिति। दण्डिनः अवन्तिसुन्दरिकथायाम् उज्जयिन्याः राजत्वेन विलसितस्य कस्यचन शूद्रकस्य जीवितविवरणं लभते। राजशेखरस्य ग्रन्थे रामिलसोमिलनामधेयाभ्यां कविभ्यां कीर्तितः कश्चन शूद्रकराजः अस्ति। अनेकलोककथासु शूद्रकः आगच्छति। वामनस्य काव्यालङ्कारसूत्रवृत्तौ श्लेषगुणप्रधानरचनाभिः प्रसिद्धः कस्यचन शूद्रकः आगच्छति। एवं यद्यपि शूद्रकनामधेये बहूनां परामर्शाः दृश्यन्ते, तथापि बहुवादविवादैः चर्चाभिश्च अन्ते दण्डिपरामर्शे मृच्छकटिकस्य कर्ता स्थापितो भवति। तदनुसृत्य क्रिस्तोः पश्चात् प्रथमशतके जीवितं नीतः शूद्रकराजः मृच्छकटिकस्य कर्ता इत्येवमङ्गीक्रियते।

क्रिस्तोः पश्चात् प्रथमशतके जीवितं नीतः शूद्रकराजः मृच्छकटिकस्य कर्ता

## 1.2. शूद्रकस्य रूपकाणि

प्रकरणग्रन्थेषु प्रथमरचितं चारुदत्तं भवति। तत् भासेन कृतम्

इतिहासकाराणां मते शूद्रकेण एकमेव प्रकरणं रचितम्। तत्तु मृच्छकटिकनामधेयं भवति। अस्य रूपकस्य घटना प्रकरणलक्षणानुसारं भवति। अस्य इतिवृत्तं न प्रख्यातं, केवलं कविना कल्पितमितिवृत्तम्। बृहत्कथातः स्वीकृतमितिवृत्तम्। प्रथममेतद् इतिवृत्तं भासेन चारुदत्त-प्रकरणे स्वीकृतमस्ति। इदं तु चारुदत्तमपेक्ष्य कल्पनासुन्दरं नानासम्भव-पात्रचित्रीकरणेन समग्रं च भवति। अस्य आद्याश्चत्वारः अङ्काः चारुदत्तप्रकरणवदेव। किन्तु तदनन्तरं कथांशाः शूद्रकेण निर्मिताः भवन्ति।

मृच्छकटिके नायकः चारुदत्तः, नायिका वसन्तसेना च

नायकः चारुदत्तः धीरशान्तः। 'धीरः शान्तः प्रसन्नात्मा धीरशान्तो द्विजादिकः'इति तस्य लक्षणम्। चारुदत्तः शान्तः, प्रसन्नात्मा च धीरद्विजः। पूर्वं बहुधनी आसीदपि, नाटके सः अत्यन्तं दरिद्रः दृश्यते। दानधर्मादिना तस्य सर्वं धनं नष्टमभूत्। मूल्यमहिम्ना शोभनचरित्रवानस्ति चारुदत्तः। अस्मिन् नायिका वसन्तसेना भवति, या सुन्दरी, धनिका, कृपावती च काचित् वेश्या। प्रतिनायकः शकारः। यद्यपि चारुदत्तः दरिद्रः, तथापि तस्य स्वभावमहिमानं दृष्ट्वा धनिका वसन्तसेना तस्मिन् प्रेमबद्धा अभवत्। धनिकात् शकारेण यद्यपि विघ्नाः कृताः तथापि तान् सर्वानपि अतिक्रम्य तयोः सुखसङ्गमः अभवत्। एतस्मिन् दश अङ्काः सन्ति। मृच्छकटिकस्य रचनायै निमित्तरूपेण स्थितं रूपकं चारुदत्तम्।

मृच्छकटिकस्य रचनायै निमित्तरूपेण स्थितं रूपकं चारुदत्तं भवति

## 1.3. अस्य प्रकरणस्य 'मृच्छकटिक'मिति नामकरणस्योद्देश्यम्

साहित्यदर्पणे रूपकलक्षणप्रसङ्गे आचार्येण विश्वनाथेन निगदितं यत्- 'नायिकानायकाख्यानात् संज्ञा प्रकरणादिषु' - प्रकरणस्य नामकरणं नायकनायिकयोः संज्ञामवलम्ब्य भवति, नाटकस्य च गर्भितार्थप्रकाश-कत्वं भवति। तद्विपरीतं मृच्छकटिकप्रकरणस्य नामकरणं तत्र वर्णिते षष्ठाङ्के विषयवस्तुमवलम्ब्य कृतम्। तथा च तत्र नायकस्य चारुदत्तस्य

पुत्रः रोहसेनः पार्श्ववर्तिनो जनस्य पुत्रः स्वर्णनिर्मितेन शकटेन क्रीडन्तमवलोकयामास। सोऽपि स्वमृच्छकटिकेन क्रीडितुं नेच्छति, तत्स्थाने च सुवर्णनिर्मितं शकटमिच्छति। चारुदत्तसेविका रदनिका तमादाय प्रमोदाय वसन्तसेनागृहं याति। सा च तस्याः भूषणानि तन्मृच्छकटिके स्थापयति। आकर्षिकेयं घटना मृच्छकटिके चिरस्मरणीया अस्ति। यतो हि इमान्याभूषणान्यादाय वसन्तसेनायै प्रदानाय याति, यदा चेमानि न्यायालये कक्षभागात् पतन्ति तदा चारुदत्तस्य वसन्तसेनायाः हत्यापराधं पुष्णन्ति। अनेन प्रकारेण 'मृच्छकटिक' समर्थिता सम्बन्धिता च घटना अस्य प्रकरणस्य कथाविकासे एकं महत्त्वपूर्णस्थानं निर्धारयति। एतदाधारीकृत्य एतत् नामकरणमुपयुक्तमेवास्ति।

## 1.4. शूद्रकस्य रचनावैशिष्ट्यम्

इतिवृत्तस्य जनकीयता

मृच्छकटिके कथापात्राणि साधारणमनुष्याः एव। नाटकानां विषये तु उत्तममध्यमादयः कथापात्ररूपेण आगच्छन्ति। ग्रामीणजीवितकथायाः नाटकीयाविष्करणमित्यनेन एतत्प्रकरणस्य स्वीकरणं व्यापकतया प्राप्तम्। मृच्छकटिकस्य प्रशस्तेः मूलकारणमपि इतिवृत्तस्य जनकीयता एव। अस्य प्रकरणस्य रचना अत्यधिकप्रतिभया कृता अस्ति, यतः वैविध्यघटनानां सम्भवानां कथापात्राणां च विन्यासः अत्याकर्षक एव। बहूनि साहसिकघटनानि अस्मिन् प्रकरणे उचितानुसारं योजितानि। राष्ट्रीयकुटिलतायाः चित्राण्यपि अस्मिन् द्रष्टुं शक्यन्ते। दरिद्रस्य ऋणयाचनं, ऋणधनस्य प्रतिग्रहणाभावे दण्डनम्, एवं ग्रामनगरसाधारणानि कार्याणि अत्र विन्यस्तानि। नाटकीयतायाः सुमधुरमुहूर्तानि च नाटकेऽस्मिन् सन्ति। अत्र यद्यपि शृङ्गारः मुख्यतया दृश्यते, तथापि अन्येषां रसानामपि उचितकालसमावेशनं द्रष्टुं शक्यते। संक्षिप्य उच्यते चेत् प्रकरणग्रन्थानां

प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्

मध्ये चूडारत्नं भवति मृच्छकटिकम्। एतत्प्रकरणं रङ्गाविष्करणे बहुयोग्यमिति विशेषः अपि दृश्यते।

### 1.5. मृच्छकटिकम्- राष्ट्रस्य समाजस्य चोत्कृष्टं निदर्शनम्

प्रस्तुतेऽस्मिन् मृच्छकटिकप्रकरणे प्राचीनभारतस्य सर्वविधं सामाजिकमनुशीलनमुपलभ्यते। अपि च प्राकृतिकं वर्णनमपि स्थाने स्थाने संस्थापितं वर्तते। नायकस्य चारुदत्तस्य वैदुष्यं दानवीरता, तथा च दारिद्रय- भावापन्नता तथापि निर्लोभता वर्णिताऽस्ति। समासतः कथनमिदं समुचितं भविष्यति यत् तत्तत्कालिकाः समस्ताः व्यवहाराः, न्यायालये वादप्रक्षेपाः नीतयश्च विभिन्नाङ्केषु समायाताः सन्ति। चौर्यकर्मणः समस्ताः क्रियाः युगपदेव सन्निविष्टाः सन्ति। कथनस्याभिप्रायोऽयं यदिह रूपके नगराध्यक्षाणां नागरिकाराणाश्च जीवनस्य- समाजस्य चैतादृक् सुमनोहरं चित्रमुपन्यस्तं तथा अन्यस्मिन् कस्मिन्नपि रूपके नोपलभ्यते। एतदभिधानं न केवलं प्रशंसात्मकमपितु यथास्थितिवर्णनात्मकं विद्यते। अस्मिन् रूपकलक्षणान्वितं व्यापारमन्तरेणापि सामाजिकाचारस्य प्रदर्शनं समधिकं गौरवं भजते, तस्मात् राष्ट्रस्यामूल्यनिधिभूतं प्रकरणरत्नमिदमिति।

मध्यमवर्गीयाणां सामाजिकानामेव नाटकीयतत्त्वेषु सन्निवेशः वर्तते

अस्य प्रकरणस्य मुख्यं वैशिष्ट्यं वर्तते यदस्मिन् मध्यमवर्गीयाणां सामाजिकानामेव नाटकीयतत्त्वेषु सन्निवेशः वर्तते। तथा च चौर-द्यूत-गणिकादीनामत्र विस्तृतं वर्णनं विद्यते। सामाजिकानां यथार्थचित्रणात् 'मृच्छकटिकम्' संस्कृतनाटकजगति यथार्थवादयुक्तमद्वितीयं (नाटकं) प्रकरणमस्ति। यत्र महाकविकालिदासे भवभूतौ च काव्यपरिपाकस्य भावनायाश्चोदात्तं वातावरणमस्ति तत्र मृच्छकटिके जीवनस्य वास्तविकतायाः चित्रणं विद्यते।

अपरञ्च वैशिष्ट्यं वर्तते मृच्छकटिकस्य कथावस्तुविन्यासे घटनाक्रमे गतिशीलत्वमस्ति। कविवरेण प्रकरणकारेण राज्ञा शूद्रकेण पालक-

स्यार्यकस्य च राजनैतिकी कथा चारुदत्त-वसन्तसेनयोः प्रणयकथया कौशलेन मेलिता। तेन मृच्छकटिकस्य मूलकथायां न कापि विप्रतिपत्तिः। मृच्छकटिकस्य संवादपद्धतिः सरला संक्षेपतमा चास्ति। तत्र वाग्विदग्धतायाः व्यङ्ग्यस्य च दर्शनं भवति। तेन हि हास्यरसस्य चर्वणायां संस्कृतसाहित्यस्य सर्वश्रेष्ठं प्रकरणरत्नमस्ति।

अपरञ्च नाटकानां समीक्षणेनैतद् ज्ञायते यत् मृच्छकटिकं संस्कृतनाट्यसाहित्ये अद्वितीयं चरित्रप्रधानं प्रकरणम् (नाटकं) अस्ति। मृच्छकटिकस्य पात्र-चरित्र-चित्रणस्य वैशिष्ट्यमस्ति यदस्य सर्वे पात्रविशेषाः स्वप्रतिभाप्रभाप्रभासिताः नवनवाः इव दृश्यन्ते।

## 2. मुद्राराक्षसम्

### 2.1. विशाखदत्तपरिचयः

विशाखदत्तस्य जीवितचित्रमधिकृत्य निश्चितज्ञानं ग्रन्थाद्वा अन्यतो वा न प्राप्यते। ग्रन्थस्य आमुखभागे तत्कर्तृविषये केचन परामर्शाः दृश्यन्ते।। प्रस्तावनासन्दर्भे सूत्रधारः प्रविश्य एवं वदति - 'सामन्तवटेश्वरदत्तपौत्रस्य महाराजभास्करदत्तसूनोः कवेर्विशाखदत्तस्य कृतिरभिनवं मुद्राराक्षसं नाम नाटकं नाटयितव्यमिति।' अस्मात् प्रस्तावादभिज्ञायते यत् विशाखदत्तः वटेश्वरस्य पौत्रः इति। वटेश्वरस्तु कश्चन सामन्तराजः। विशाखदत्तस्य पितुर्नाम पृथुः, यस्य महाराज इत्युपाधिरप्यासीदिति। ग्रन्थस्थभरतवाक्ये कस्यचन अवन्तिवर्मणः सूचना अस्ति। केषुचित् पाठेषु 'चिरमवतु महीं पार्थिवोऽवन्तिवर्मा' इत्यपि दत्तमस्ति। एतेन विशाखदत्तः राज्ञः अवन्तिवर्मणः आस्थानकविरासीदिति चिन्तितुं शक्यते। अवन्तिवर्मा प्राचीनकान्यकुब्जराज्यस्य राजा आसीत्। अवन्तिवर्मणः कालः क्रिस्तोः पश्चात् षष्ठशतकमित्येवम् इतिहासकाराणां मतम्। एतेन कवेरपि कालः षष्ठशतकम् इति ज्ञातुं शक्यते।

विशाखदत्तस्य कालः क्रिस्तोः पश्चात् षष्ठशतके।

इतिहासात्मकं नाटकं मुद्राराक्षसम्

इतिहासकाराणां मते विशाखदत्तेन एकमेव नाटकं रचितम्। तत्तु मुद्राराक्षसाख्यया वर्तते। मुद्राराक्षसे सप्त अङ्काः सन्ति। मुख्यनायकरूपेण चन्द्रगुप्तः, यः पाटलीपुत्रस्य राजा। एतस्य मौर्यः, वृषलः इति नामधेयद्वयमप्यस्ति। अनन्तरमागच्छति चाणक्यः; यः विष्णुगुप्ताख्यया अपि प्रसिद्धः; यस्य साहाय्येन चन्द्रगुप्तः नन्दान् पराजित्य राज्यसिंहासनाधिरोहणं कृतवान्। मलयकेतुः प्रतिनायकरूपेण आगच्छति, यः पर्वतकाख्यस्य राज्ञः पुत्रः, राक्षसेन सह सख्यं कृत्वा पाटलीपुत्रम् अधिरोढुम् यतते। अन्यस्तु राक्षसनामधेयः नन्दराजानां स्वामिभक्तः अमात्यः, यः मलयकेतुमुपयुज्य चन्द्रगुप्तं निष्कासितुमयतत। एवं चत्वारि कथापात्राणि अस्मिन् नाटके मुख्यरूपेण आगच्छन्ति। एताननतिरिच्य अमुख्यरूपेण चन्दनदासादीनि कथापात्राण्यपि सन्ति। नाटकस्य नामधेयं मुद्राराक्षसमिति। मुद्रया जितः वशीकृतो वा राक्षसः मुद्राराक्षसः। स एव अभेदोपचारात् मुद्राराक्षसाख्यं नाटकम्।

मुद्राराक्षसे सप्त अङ्काः सन्ति

प्रथमाङ्कस्य प्रधानमितिवृत्तं मुद्रालाभः, प्रथानपात्रं चाणक्यश्च। चाणक्यगुप्तचरसम्भाषणेन नाटकस्य कथा उद्घाटिता भवति। नन्दानाममात्यस्य राक्षसस्य तन्त्रवैभवं बुद्धिसामर्थ्यं शासनवैदग्ध्यं कार्यप्राप्तिं चाधिकृत्य चाणक्यः सुज्ञातः आसीत्। चन्द्रगुप्तस्य प्रधानामात्यरूपेण राक्षसम् आनेतुम् उपायान् आलोच्य चाणक्यः तस्थौ। अत्रैव कथाबीजम् उपक्षिप्यते नाटककारेण। चन्दनदासस्य गृहात् अङ्गुलीमुद्रिकायाः प्राप्तिरपि अस्मिन्नङ्के। राक्षसविचार इति द्वितीयाङ्कस्य नाम। अस्मिन्नङ्के चन्द्रगुप्तवधाय राक्षसेन आयोजितानि, एवमनुचरैः संचालितानि च कार्याणि सर्वाणि चाणक्यबुद्ध्या निष्फलान्यभवन् इत्येतदवगम्य राक्षसस्य दुःखावस्था। तृतीयाङ्के चन्द्रगुप्तचाणक्ययोर्मध्ये व्याजकलहः। राक्षसोद्योगाख्ये चतुर्थाङ्के राक्षस एव प्रधानपात्रम्।

पञ्चमाङ्कारम्भे राक्षसस्य मलयकेतोश्च विरोधः। षष्ठाङ्के बद्धस्य चन्दनदासस्य वधाय पद्धतिः। अन्तिमे अङ्के चन्दनदासमोचनाय आगतेन राक्षसेन सह चाणक्यस्य सख्यम्। तदनुसृत्य राक्षसः चन्द्रगुप्तस्य प्रधानसचिवपदे आगच्छति। एवं शत्रोः मित्रीकृतावस्थायाः वर्णनम्।

## 2.2. विशाखदत्तस्य रचनावैशिष्ट्यम्

मुद्राराक्षसम् इतिहासनाटकं राष्ट्रियनाटकमपि भवति।

मुद्राराक्षसम् इतिहासनाटकं राष्ट्रियनाटकमपि भवति। अन्यसंस्कृत-नाटकेभ्यः भिन्नं भवति अस्मिन् स्वीकृतमितिवृत्तम्। इतिहासाद् आनीतस्य कथावस्तुनः स्वकीयानुभवेन भावनया च चमत्क्रियते कविना अत्र। अस्मिन् राष्ट्रतन्त्रज्ञतायाः, राष्ट्रियकुटिलप्रवर्तनानां च बहुचित्राणि लभन्ते। इतिवृत्तविकासाय अनुकूलसन्दर्भाणां सम्भवानां च चित्रीकरणं कविना सुन्दररीत्या कृतमस्ति। राष्ट्रियप्रवर्तकश्चायं प्रकृतविषयस्य नाटकाविष्करणे यानि यानि संयोजकानि आवश्यकानि नाटककारः स्वानुभवमण्डलादेव इतिवृत्तं स्वीकृतमिति कार्यं श्लाघनीयमेव। तदुपरि, तानि सर्वाणि भावनया परिचिन्वन् तेषां समञ्जसमेलनेन सुन्दरनाटकशिल्पं कृतवानयं नाटककारः। कवेः प्रतिभाविलासस्य निदर्शनानि नाटके सर्वत्र द्रष्टुं शक्यन्ते। तस्य रचनाशैलिस्तु ऊर्जस्वला, प्रकाशनं तु ललितमाकर्षकञ्च। नाट्यशास्त्रे ज्योतिशास्त्रे च महान् पण्डितो भवतीति ग्रन्थादवगन्तुं शक्यते। नाटक-नियमानां पालनं सुचिररूपेण अनेन कृतम्। अस्य नायकः चन्द्रगुप्तः, यः धीरोदात्तः। अस्मिन् नाटके वीररसः अङ्गित्वेन भासते।

## 2.3. देवीचन्द्रगुप्तम्

देवीचन्द्रगुप्तमस्यैव विशाखदत्तस्य अपरः कृतिः। रचनादृष्ट्या त्विदं प्रथमा कृतिः, अस्य सम्प्रति पञ्चैवाङ्का लभ्यन्ते। अत्र हि ध्रुवदेव्याश्च-

न्द्रगुप्तस्य च प्रेमकथा वर्णिताऽस्ति। शृङ्गारप्रधानेऽप्यस्मिन् नाटके राजनीतिस्तु निहितैव कविना। कथानकं त्वित्थम् -

समुद्रगुप्तस्य सम्राजो ज्येष्ठतनयो रामगुप्तः पितुरनन्तरं मगधसिंहासनमध्यतिष्ठत्। स हि स्वभावेन कातरोऽकर्मण्यश्चासीत्। बलदर्पतो हि शकराजस्तं हि समाक्रम्य सन्धये प्रार्थितस्तन्निमितं तत्पत्नी ध्रुवदेवीमुपायनरूपेणायाचत। रामगुप्त उपायान्तरमनवेक्ष्य तत्समर्पणाय तत्परोऽभूत्। किन्तु तदनुजो द्वितीयश्चन्द्रगुप्तस्तन्नैवासहत। स हि भ्रातृजायां निरुध्य स्वयमेव तद्वेषेण शकराजशिबिरं प्रविश्य तं हत्वा सकुशलं प्रत्यागतः। तद्विक्रमप्रीता हि ध्रुवदेवी रामगुप्तमुल्लङ्घ्य चन्द्रगुप्तमेव पतित्वेन स्वीचकार। एषैव कथाऽत्र सुनिपुणमवतारिताऽस्ति। अस्या एव ध्रुवदेव्या गर्भतः कुमारगुप्तस्य प्रथमस्य जन्म। नाटकमिदं राजनीतिमिश्रितशाङ्गरिकम्।

## 3. वेणीसंहारम्

### 3.1. भट्टनारायणपरिचयः

भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं शास्त्रीयनाटकम्। भट्टनारायणोऽपि संस्कृतपरम्परेतरकविरिव स्वजीवनविषये नितान्तमेव मौनमालम्बते। वेणीसंहारं हि वैक्रमाष्टमशतकोत्तरार्द्धभवो वामनः काव्यालङ्कारसूत्राणां वृत्तौ स्मरति इति कवेरस्य तत्पूर्ववर्तित्वं सिध्यति। स हि सहोक्त्यलङ्कारोदाहरणे-'अस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्रियन्ता बलानि' इति मुद्राराक्षसगतस्य(५।१६) पद्यस्यान्तिमं पादमुद्धरति। एवमेवानन्दवर्धनः तृतीयोद्योतस्य द्वादशतमकारिकायाः वृत्तौ "यथा वेणीसंहारे विलासाख्यस्य प्रतिमुखसन्ध्यङ्गस्य प्रकृतरसनिबन्धनाननुगुणमपि द्वितीयेऽङ्के भरतमतानुसरणमात्रेच्छया घटनम्" इति स्मरति। आनन्दवर्धनो हि ९०७ मितवैक्रमाब्दमभितः स्थितिमान्। अतो हि भट्टनारायणस्य वैक्रमसप्तमशतकमभितः स्थितिकालः स्पष्टः। असौ हि बाणसमकालिको वा ततोऽपि किञ्चि-

भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं शास्त्रीयनाटकम्।

त्कालपूर्ववर्ती। तं हि दण्ड्याचार्यः अवन्तिसुन्दरीकथायां "व्याप्तुं पदत्रयेणाऽपि यः शक्तो भुवनत्रयम्। तस्य काव्यत्रयव्याप्तौ चित्रं नारायणस्य किम्।।" इति कथयित्वा भट्टनारायणस्य काव्यत्रयं स्मरति।

महाभारतीयं कथावस्त्वाश्रित्य विरचितं नाटकं भवति वेणीसंहारम्।

महाभारतीयं कथावस्त्वाश्रित्य विरचितं नाटकं भवति वेणीसंहारम्। दुश्शासनापमानसन्तप्ता द्रौपदी घोरां प्रतिज्ञां कृता, यद् 'अहं दुश्शासने निहत एव केशसंयमनं करिष्यामि' इति। अस्याः एव घटनायाः पूर्ती महाभारतस्य या कथा साऽत्र वर्णिता। अत्र नाटके षडङ्काः सन्ति। प्रथमोऽङ्कः कृष्णचन्द्रस्य दौत्यात् प्रारभ्यते यत्र विफले भगवति कृष्णे कुपिते च युधिष्ठिरे समरदुन्दुभिरताड्यत। द्वितीयेऽङ्के दुर्योधनभानुमत्योः संवादः। तृतीये प्रवेशकेन धृष्टद्युम्नकृतद्रोणवधावगमः, कुपितस्याश्वत्थाम्नः सकलराजन्यकनिन्दा, कर्णाश्वत्थाम्नोर्वाक्कलहश्च प्रधानं वस्तु। चतुर्थेऽङ्के सुन्दरकद्वारा युध्दस्थितौ दुःशासनभीषणवधपर्यन्तायां निवेदितायां दुर्योधनस्य खेदः। पञ्चमेऽङ्के धृतराष्ट्रगान्धार्योः शोकात् दुर्योधनं पाण्डवैः सह सन्धिं विधातुमागृह्णीतः, परं नासौ मन्यते। षष्ठेऽङ्के चार्वाकमुनिवञ्चनया यावद् युधिष्ठिरो वह्निप्रवेशमभिलषति तावदेव सत्ये विदिते सर्वे आनन्दन्ति, द्रौपदी च दुःशासनसृजा केशान् बध्नाति।

## 3.2. वेणीसंहारस्य वैशिष्ट्यम्

वेणीसंहारं शास्त्रीयदृष्ट्याऽऽदर्शभूतम्। यद्यप्यत्र नाटके नाटकीयवस्तूनां विन्यासस्तथा सुश्लिष्टतया घटितो यथा नाटकीयवस्तूदाहरणायैव निर्मितमिदं नाटकमिति सन्देहः सम्भवति, परन्तु नेयं वस्तुस्थितिः, सिद्धनाटककारप्रतिभोद्भूते रूपके नाटकीय-वस्तूनि स्वतो यथास्थानं निविशन्ते यान्युदाहरति नाट्यरीतिकारः।

अस्मिन् नाटके महाभारतस्य कथा मौलिकतया नूतनेन परिवेषेण सह प्रदर्शिता। कुटिलहृदयो दुर्योधनः पाण्डवान् द्यूतक्रीडायां पराजित्य तेषां राज्यापहरणाय चेष्टते। दुर्योधनस्यैवाज्ञया दुःशासनः राज्यसभायां द्रौपद्याः वेणीं गृहीत्वा तां धर्षति। भीमस्य एषा भीषणप्रतिज्ञा सर्वत्र नाटके गुञ्जिता भवति। कौरवाणां विनाश एव नाटकस्यान्तः। नाटकान्ते भीमसेनः सर्वान् कौरवान् विनिहत्य दुःशासनरुधिरेण स्वहस्ताभ्यां द्रौपद्याः मुक्तकचान् संयतान् करोति वेणीं बध्नाति वा। करुणरसस्य सुन्दरं दृश्यं कविरत्र प्रकटयति। नाटके शृंगार-वीभत्स-करुण-रसाः अङ्गरसाः सन्ति, वीररसं ते सर्वे समुत्तेजयन्ति।

## Summarised Overview

संस्कृतसाहित्ये सर्वोत्कृष्टं प्रकरणं भवति मृच्छकटिकम्। क्रिस्तोः पश्चात् प्रथमशतके जीवितं नीतः शूद्रकराजः मृच्छकटिकस्य कर्ता इत्येवमङ्गीक्रियते। मृच्छकटिकस्य इतिवृत्तं न प्रख्यातं, केवलं कविना कल्पितमितिवृत्तम्। बृहत्कथातः स्वीकृतमितिवृत्तम्। मृच्छकटिके नायकः चारुदत्तः, नायिका वसन्तसेना च। मृच्छकटिकस्य रचनायै निमित्तरूपेण स्थितं रूपकं भवति चारुदत्तम्। मृच्छकटिके कथापात्राणि साधारणमनुष्याः एव। मृच्छकटिकस्य प्रशस्तेः मूलकारणमपि इतिवृत्तस्य जनकीयता एव। प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्। अस्य प्रकरणस्य मुख्यं वैशिष्टचं वर्तते यदस्मिन् मध्यमवर्गीयानां सामाजिकानामेव नाटकीयतत्त्वेषु सन्निवेशः वर्तते। तथा च चौर-द्यूत-गणिकादीनामत्र विस्तृतं वर्णनं विद्यते। सामाजिकानां यथार्थचित्रणात् 'मृच्छकटिकम्' संस्कृतनाटकजगति यथार्थवादयुक्तमद्वितीयं राजनैतिकं (नाटकं) प्रकरणमस्ति।

विशाखदत्तस्य नाटकं भवति मुद्राराक्षसम्। एतद् राजनैतिकात्मकं नाटकम्। विशाखदत्तस्य कालः क्रिस्तोः पश्चात् षष्ठशतके। विशाखदत्तः अवन्तिवर्मणः आस्थानकविः अस्ति। मुद्राराक्षसे सप्त अङ्काः सन्ति। मुद्राराक्षसे चन्द्रगुप्तः मुख्यनायकः, नायकविभागेषु धीरोदात्तः च। मुद्राराक्षसनाटके वीरः अङ्गी रसः। मुद्राराक्षसम् नाटकं राष्ट्रियनाटकमपि भवति। अस्मिन् राष्ट्रतन्त्रज्ञतायाः, राष्ट्रियकुटिलप्रवर्तनानां च बहुचित्राणि लभन्ते। इतिवृत्तविकासाय अनुकूलसन्दर्भाणां सम्भवानां च चित्रीकरणं कविना सुन्दररीत्या कृतमस्ति।

भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं राजनैतिकं शास्त्रीयनाटकं भवति। महाभारतीयं

कथावस्त्वाश्रित्य विरचितं नाटकं भवति वेणीसंहारम्। अत्र नाटके षडङ्काः सन्ति।

# Assignments

उत्तराणि लिखत।

1. मृच्छकटिकस्य प्रशस्तेः मूलकारणं विशदयत।
2. विशाखदत्तस्य नाटकस्य नामधेयं किम् ? नायकः कः?
3. मुद्राराक्षसनाटके कति अङ्काः सन्ति ?
4. मुद्राराक्षसनाटकं कीदृशं नाटकं भवति? मुद्राराक्षसनाटके अङ्गीरसः कः ?

टिप्पणिं लिखत।

1. प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्। विशदयत।
2. मृच्छकटिकप्रकरणस्य वैशिष्ट्यम्।
3. मृच्छकटिकप्रकरणस्य 'मृच्छकटिक'मिति नामकरणस्योद्देश्यं सविस्तरं प्रतिपादयत।
4. मृच्छकटिकं राष्ट्रस्य समाजस्य चोत्कृष्टं निदर्शनमिति सप्रमाणं लिखतु।
5. विशाखदत्तस्य जीवनकालमधिकृत्य लिखत।
6. चन्द्रगुप्तः मुख्यनायकः। विशदयत।
7. देवीचन्द्रगुप्तम्।
8. वेणीसंहारस्य वैशिष्ट्यम्।

निबन्धात्मकप्रश्नाः

1. संस्कृतनाटकेषु मृच्छकटिकस्य वैशिष्ट्यं सयुक्तिकं सविस्तरं प्रतिपादयत।
2. मुद्राराक्षसम् राजनैतिकनाटकं-राष्ट्रियनाटकमपि भवति। विशदयत।
3. भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं शास्त्रीयनाटकम्। विशदयत।

# Suggested Readings


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।

2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
4. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992

# References

1. The Mṛcchakaṭika of Sudraka'by M.R.Kale, Digital library of India, Item 2015.326600
2. Mṛcchakaṭika kathāsańgraha – by Prof. V.C.Vasudevan Elayat
3. The Mudrārākṣasam of Viśākhadatta'edited by M.R.Kale, Digital library of India.
4. The Mudrārākṣasam of Viśākhadatta'edited by Prof. K.H.Dgruva.
5. Sanskrit drama – A.B.Keith

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# मुद्राराक्षसम्

# 1- 4 अङ्काः

# BLOCK - 2

SGOU

UNIT 1

# मुद्राराक्षसे प्रथमः अङ्कः।

## Learning Outcomes

- मुद्राराक्षसनाटकस्य राष्ट्रतन्त्रपरं विज्ञानम् ।
- मुद्राराक्षसनाटकपठनद्वारा राजनैतिकनाटकानां सविशेषविज्ञानम्।
- विशाखदत्तपरिचयः।
- संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यम्।
- चाणक्यस्य नीतिनैपुण्यम्।
- श्लोकानां पठनेन आशयावगतिः।

## Background

संस्कृतस्य निखिलेभ्यः नाटककारेभ्यः भिन्नोऽयं विशाखदत्त नाम नाटककारः कूटनीतिं, राजनीतिञ्चाश्रित्य नाटकं निर्मितवान्। कवेः राजवंशसम्भवात् राजनीतिषु पक्षपातो दृश्यते। विशाखदत्तस्य पितामहः श्रीवटेश्वरदत्तः वत्सराजाभिधस्य देशस्य सामन्तराजाऽऽसीत्। पिता चास्य भास्करदत्तः 'महाराजः' इत्युपाधिना अलङ्कृतः आसीत्। विशाखदत्तः कौटिल्यार्थशास्त्रस्य तथा शुक्रनीतिशास्त्रस्य च प्रकाण्डविद्वान् आसीत्। ज्योतिश्शास्त्र-दर्शनन्यायशास्त्रेषु चास्य नैपुण्यं दृश्यते। वैदिकधर्मावलम्बी विशाखदत्तः बौध्दधर्ममपि अत्यादरेण समवलोकयति स्म। अस्यैतानि नाटकानि प्राप्यन्ते - (१) मुद्राराक्षसम्, (२) देवीचन्द्रगुप्तम्, (३) अभिसारितवञ्चितकम् चेति।

विशाखदत्तस्य स्थितिकालविषये विविधानि मतानि सन्ति। डा.जायसवालमहोदयः अस्य स्थितिकालं ४०० ईस्वीयशताब्द्याः समीपे मन्यते। केचित् समालोचकाः षष्ठ्यां शताब्द्याम् अस्य समयं मन्यन्ते। ४९० शताब्द्यां श्रीवराहमिहिरः बृहत्संहितायामस्योल्लेखं करोति, अतः वराहमिहिरात् पूर्वं पञ्चमशताब्द्यां विशाखदत्तस्य समयः स्वीकरणीयम् इति न्यायसङ्गतं प्रतिभाति।

मुद्राराक्षसे चाणक्यराक्षसौ निजकूटनीत्या विलक्षणं राजनीतिकयुद्धं सन्दर्श्य दर्शकान् मोहयतः। अतः मुद्राराक्षसं संस्कृतनाटकेषु निःसन्देहमद्वितीयनाटकमिति निश्चप्रचम्। मुद्राराक्षसे विशाखदत्तस्य शैली परुषार्थपूर्णास्ति। मुख्यो रसः वीरः। सप्त अङ्काः सन्ति। मुद्रालाभाख्यः, राक्षसविचारः, कृतकलहः, राक्षसोद्योगः, राक्षसनिकारः, राक्षसनिर्वेदः, राक्षसनिग्रहः चेति।

# Keywords

शिवस्य स्तुतिः, वटेश्वरदत्तपौत्रः विशाखदत्तः, मुद्राराक्षसम्, चन्द्रग्रहणम्, चन्द्रगुप्तस्य मन्त्री कुटिलमतिः कौटिल्यः, नन्दवंशम्, चन्द्रगुप्तमौर्यः, वृषलः, नन्दस्य अमात्यः राक्षसः, पर्वतकस्य पुत्रः मलयकेतुः, कौमुदीमहोत्सवम्, यमपटचरः, विषकन्याप्रयोगम्, कपटलेखः, क्षपणकजीवसिद्धिः।

# Discussion

विशाखदत्तस्य कृतिषु मुद्राराक्षसं महनीयं नाटकं वर्तते। पात्राणां चरित्रचित्रणबलेन एवं कथयितुं शक्यते यत् सफलमिदं नाटकं यत्र विशाखदत्तस्य भाषा- शैली, कवित्वशक्तिः एतद् द्वयमपि कवेः वैशिष्ट्यं तनोति। अस्मिन् नाटके न हि कालिदाससदृशं कल्पना - भाव- चाञ्चल्यं, न वा भवभूतिरिव हृदय- विदारक- करुणधारा कुत्रापि प्रवहति, न च भट्टनायकसदृशं सैनिकानां प्राणान् प्रणयितुः निमन्त्रणं विलोक्यते। विशाखदत्तस्य नाटके द्वयोः राजनीतिज्ञयोः बुध्दिवैभवास्त्रेण समरं भवति नास्त्रेण, मुद्राराक्षसे चाणक्यराक्षसौ निजकूटनीत्या विलक्षणं राजनीतिक-युध्दं सन्दर्श्य दर्शकान् मोहयतः। अत्र तु विनैवास्त्रं शत्रु-जयो भवति। अतः मुद्राराक्षसं संस्कृतनाटकेषु निः सन्देहं द्वितीयनाटकमिति निश्चप्रचम्

### नाटकस्य उद्देश्यम्

विशाखदत्तः मुद्राराक्षसनाटके समाजस्य प्रत्येकं स्तरं वर्णयितुं प्रयतितवान्। यद्यपि अस्याः रचनायाः उद्देश्यं नन्दवंशस्य नाशं कृत्वा मौर्यसाम्राज्यस्य स्थापनां चाणक्यस्य उदयस्य वर्णनं च आसीत् परं तु इदं

प्रतीयते यत् कविः मौर्ययुगस्य राजनैतिक - धार्मिक - नैतिक - स्थितेः शुद्धकूटनीति-चित्रणेन आदर्श - प्रधान - वास्तविकता - स्थापनस्य उद्देश्यं कृत्वा नाटकस्य रचनां कृतवान् स्यात् इति।

**नाटकस्य विषयः**

नन्दवंशस्य महामत्यं राक्षसं केन्द्रीकृत्य मुद्राराक्षसनाटकस्य रचना कृता अस्ति। तेजस्वी चाणक्यः इच्छति स्म यत् सः राक्षसः कथञ्चित् चन्द्रगुप्तस्य अमात्यत्वं स्वीकुर्यात्। महाराजनन्दस्य सेनापतिः कूटनीतिज्ञस्य चाणक्यस्य साहाय्येन नन्दवंशस्य समाप्तिम् कृत्वा मगधस्य सिंहासने उपविशति। सम्राट् चन्द्रगुप्तः कुसुमपुरे कौमुदीमहोत्सवरूपेण स्वस्य विजयस्य उत्सवं कर्तुं निर्देशं ददाति, परन्तु चाणक्यः गुप्तचराणम् माध्यमेन ज्ञायते यत् राक्षसस्य केचन अनुयायिनः सामन्ताः च कुसुमपुरे चन्द्रगुप्तस्य वधाय निश्चयं कृतवन्तः; अतः चाणक्यः अस्य उत्सवस्य निषेधं करोति। अस्मात् कारणात् चन्द्रगुप्तः चाणक्येन सह विच्छेदः भवति। वार्तां श्रुत्वा अमात्यः राक्षसः स्वस्य 'चाणक्यस्य उपरि विजयस्य' योजनां सफलं मन्यते। चन्द्रगुप्तस्य स्थाने सः राक्षसः पर्वतेश्वरस्य पुत्रं मलयकेतुं नन्दराज्यस्य सिंहासने स्थापयितुम् इच्छति। अस्याः कल्पनायाः दानरूपेण मलयकेतुः अमात्यरक्षसाय स्वस्य आभूषणं दातुम् इच्छति। चाणक्यः राक्षसस्य विश्वासपात्रेण शकटदासेन लिखितं कोडितं पत्रं प्राप्य तस्य मुद्रणं करोति। सिद्धार्थकः मुद्रितवस्तूनि आभूषणपेटिकां च वहन् गृह्यते। मलयकेतुः क्रोधेन स्वस्य मित्रराजानाम् वधं करोति। फलतः सः कारागारे। अत्र राक्षसमित्रस्य धनकुबेरचन्दनदासस्य देशद्रोहस्य मृत्युदण्डः दास्यति इति वार्ता श्रुत्वा निराशः अमात्यरक्षासमर्पणार्थं सज्जः भूत्वा चन्द्रगुप्तस्य अमृतत्वं स्वीकुर्वति। अन्ततः चाणक्यः विजयते। अन्ते प्रसन्नः अमात्यः चाणक्यः राज्ये कारागारस्थानां सर्वेषां जनानां मुक्तिं घोषयति, पुनः स्वस्य उन्मुक्तशिखां च बध्नाति। ईदृशरूपेण नाटकस्य समाप्तिः सफलतया संजाता।

## महाकवि श्रीविशाखदत्तप्रणीतम्
## मुद्राराक्षसम्

### प्रथमोऽङ्कः

अथ तत्रभवान् महाराजपदभाक् पृथुसूनुः विशाखदत्तनामा महाकविः सहृदय-हृदयरञ्जनार्थं भारतीयेतिहासप्रसिद्धं मौर्यसाम्राज्यप्रतिष्ठापन-वृत्तात्मकं मुद्राराक्षस नाम नाटकं निर्मित्सुर्निर्विघ्नतया तत्समाप्त्यर्थं मङ्गलमाचरन् नान्दी – मुखमुपस्थापयन्ति -'धन्या केय'मिति। अर्द्ध-नारीश्वरस्य भगवतः शिवस्य शिरोविभूषयन्तीं गङ्गामुद्दिश्य ईर्ष्याकलुषा पार्वती हरं पृच्छति।

**धन्या केयं स्थिता ते शिरसि ? शशिकला किन्नु नामैतदस्या**
**नामैवास्यास्तदेतत् परिचितमपि ते विस्मृतं कस्य हेतोः ।**
**नारीं पृच्छामि नेन्दुं, कथयतु विजया न प्रमाणं यदीन्दु-**
**र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥१॥**

*अन्वयः - ते शिरसि स्थिता इयं धन्या का ? शशिकला! नु अस्याः एतत् नाम किम्? अस्याः तत् नाम एव एतत् ते परिचितम् अपि कस्य हेतोः विस्मृतम्? नारीं पृच्छामि, इन्दुं न। यदि इन्दुः प्रमाणं न, विजया पृच्छतु। देव्याः सुरसरितं निह्नोतुम् इच्छोः विभोः शाठयं वः अव्यात्।*

शिवपार्वतीपूजनाभ्यां श्लोकद्वयेन मुद्राराक्षसः आरभ्यते।

*अत्र कविः पूर्वनान्दीश्लोकेऽर्द्धनारीश्वरं शिवं स्तुवन् ताण्डवरूपिणं तं पुनः वर्णयति--*

**अपि च।**

**पादस्याविर्भवन्तीमवनतिमवने रक्षतः स्वैरपातैः,**
**संकोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम्।**
**दृष्टिं लक्ष्येषु नोग्रज्वलनकणमुचं बध्नतो दाहभीते-**
**रित्याधारानुरोधात्त्रिपुरविजयिनः पातु वो दुःखनृत्यम् ॥२॥**

*अन्वयः - पादस्य स्वैरपातैः आविर्भवन्तीम् अवनेः अवनतिं रक्षतः सर्व-लोकातिगानां दोष्णां सङ्कोचेन एव मुहुः अभिनयतः, दाहभीतेः ज्वलन-कणमुचम् उग्रां दृष्टिं लक्ष्येषु न बध्नतः त्रिपुरविजयिनः दुःखनृत्यम् आधा-रानुरोधात् इति वः पातु।*

*भावार्थः - नृत्यकाले मत्पादयोः स्वच्छन्दविन्यासेन पृथ्वीभङ्गो माभूदिति शनैः शनैः पादं दधतः विशालानां भुजानां प्रक्षेपेण लोकातिक्रमणं यथा न स्वकीयां भवेदिति निरुद्धप्रसरेणाभिनयतः किञ्च प्रलयङ्करान् वह्निविस्फुलिङ्गान् मुञ्चमानां उग्राम् दृष्टिं लक्ष्येषु दाहभीतेः स्थिरतया न कुर्वतः महानटस्य त्रिपुरविजयिनः सदाशिवस्य आधारानुरोधादित्थंभूतं दुःखपूर्वं, नृत्यं वः सभ्यान् पातु॥*

*अत्र पृथिव्यादीनामवनत्याद्ययोगेऽपि तत्तद्योगकल्पनादतिशयोक्तिरलङ्कारः। सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम् इति तल्लक्षणात्। स्रग्धरावृत्तम्।*

प्रसिद्धः नाटककारः विशाखदत्तः स्वनाटकस्य अबाधसमाप्तेः इच्छां कृत्वा स्वस्य अध्यक्षदेवताशङ्करभक्तस्य निम्नलिखितेन आशीर्वादश्लोक-माध्यमेन स्वेन आरब्धस्य उपक्रमस्य नाटकीयविषयं संकेतयति। शिवस्य जटाविवर्तितकेशसमूहस्य मध्ये गुप्तरूपेण उपविष्टाम् अनिन्दितां कन्याम् शिवपत्नीं पार्वतीम् ईर्ष्यया पृच्छति। अयं श्लोकः संवादरूपः अस्ति। प्रथमद्वितीयश्लोकयोः द्विविधाः चाणक्यस्य कुटिलनीतिं तस्याः नीतेः कष्टानि च क्रमशः सूचयन्ति।

(नान्द्यन्ते।)

सूत्रधारः - अलमतिप्रसङ्गेन। आज्ञापितोऽस्मि परिषदा यथा-'अद्य सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेर्विशाखदत्तस्य कृतिः मुद्राराक्षसं नाम नाटकं नाटयितव्यम्' इति। यत्सत्यं काव्यविशेषवेदिन्यां परिषदि प्रयुञ्जानस्य ममापि चेतसि सुमहान्परितोषः प्रादुर्भवति। कुतः

चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः

**चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः।**<br>**न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ॥३॥**

*अन्वयः - बालिशस्य अपि सत्क्षेत्रपतिता कृषिः चीयते। शालेः स्तम्बकारिता वप्तुः गुणं न अपेक्षते।*

*भावार्थः- अविदितबीजावापविधेरपि कृषीवलस्य उर्वरायां भुवि कृतो बीजनिक्षेपः अङ्कुरस्तम्बफलधान्यादि रूपेणाभिवर्द्धत एव। यतः शालेः स्तम्बकारिता वप्तुः गुणं न अपेक्षते।*

तद्यावद् इदानीं गृहं गत्वा गृहिणीमाहूय गृहजनेन सह संगीतक-मनुतिष्ठामि। (परिक्रम्यावलोक्य च) इमे नो गृहाः। तद्यावत्प्रविशामि।

परिजनः स्वस्वकर्मण्यधिक-तरमभियुक्तः

(नाट्येन प्रविश्यावलोक्य च) अये, तत्किमिदानीमस्मद्गृहेषु महोत्सव इव दृश्यते। स्वस्वकर्मण्यधिकतरमभियुक्तः परिजनः।

*अभियोगप्रकारमाह-*

**तथाहि -**

**वहति जलमियं पिनष्टि गन्धानियमियमुद् ग्रथते स्रजो विचित्राः।**
**मुसलमिदमियञ्च पातकाले मुहुरनुयाति कलेन हुङ्कृतेन ॥४॥**

***अन्वयः*** *- इयं जलं वहति, इयं गन्धान् पिनष्टि, इयं विचित्राः स्रजः उद्ग्रथते, इयं च इदं मुशलं पातकाले कलेन हुङ्कृतेन मुहुः अनुयाति।*

***भावार्थः*** *- इयं पुरो दृश्यमाना कानचित् नटी जलं वहति। करिष्यमाणाय सुखाद्यङ्गप्रक्षालनायेति शेषः। इयमपरा काचन केशरादिसुगन्धिद्रव्यं पिनष्टि। इयमन्या विचित्रा स्रज उद्ग्रथते। इयञ्च काचिद् उलूखले पतनोत्पतनावसरे मुसलं श्रुतिमधुरेण हुमिति ध्वनिना अनुसरन्ति दृश्यते। अत्र स्वभावोक्तिरलङ्कारः पुष्पिताग्रावृत्तम्।*

भवतु, कुटुम्बिनीं तावदाहूय पृच्छामि।

(नेपथ्याभिमुखमवलोक्य।)

*नाटकप्रारंभाय नटीं संभावयन् सूत्रधारः तस्याः गुणस्तुत्या स्वाभिमुखतां संपादयितुमाह --*

**गुणवत्युपायनिलये स्थितिहेतोः साधिके त्रिवर्गस्य।**
**मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि ॥५॥**

***अन्वयः***:- *गुणवति उपायनिलये! स्थितिहेतोः त्रिवर्गस्य साधिके! मद्भवननीतिविद्ये आर्ये ! कार्यात् द्रुतम् उपेहि।*

***भावार्थः*** *– 'अत्र ऋतुं च कश्चित् प्रायेण वृत्तिं आश्रयेत्! इति नियमात् तृतीयाङ्के वर्णयिष्यमाणशरदृतूपादानं कृतमिति ध्वनितम्' तत्पक्षे एवमर्थः प्रतीयते। गुणवति = निर्मलस्वादुजलशीले! उपायनिलये = विजिगीषूणां सामाद्युपायसाधनशीले, स्थितिहेतोः = लोकोपकारिके त्रिवर्गस्य साधिके, क्षयस्थानं च वृद्धिं च त्रिवर्गः नीतिमद्भवतीति वेदिनाम्' इति विजयावसरप्रदातृत्वेन जिगीषूणां मनोरथसंपादिके, मद्भवननीतिविद्ये = राष्ट्रनीतिनिर्धारणशीले, आर्ये = ऋतुश्रेष्ठे, कार्याद्द्रुतमुपेहीति पूर्वोक्तोऽर्थः। एवमस्मिन् श्लोके श्लेषेण शरदागमोऽपि*

*सूच्यते। आर्यावृत्तम्। 'नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयाश्रयः' इति लक्षणात् अप्राकरणिकस्य शरदृत्वर्थरूपस्य श्लिष्टपदमहिम्ना प्रतीतेः श्लेषालङ्कारः।*

**नटी** - (प्रविश्य) आर्यपुत्र, इयमस्मि। आज्ञानियोगेन मामऽनुगृह्णात्वार्यः।

**सूत्रधारः** - आर्ये, तिष्ठतु तावदाज्ञानियोगः। कथय किमद्य भवत्या तत्रभवतां ब्राह्मणानामुपनिमन्त्रणेनैतत् कुटुम्बकमनुगृहीतम्, अथवा अभिमता भवनमतिथयः प्राप्ताः, यद् एष पाकविशेषारम्भः?

**नटी** - आर्य ! अद्यामन्त्रिता मया भगवन्तो ब्राह्मणाः।

**सूत्रधारः** - कथय कस्मिन् निमित्ते ।

**नटी** - उपरज्यति किल भगवान् चन्द्र इति।

**सूत्रधारः** - आर्ये, क एवमाह?

**नटी** - एवं खलु नगरवासी जनो मन्त्रयति।

**सूत्रधारः**- आर्ये ! कृतश्रमोऽस्मि चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे। तत् प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः, चन्द्रोपरागं प्रति तु केनापि विप्रलब्धाऽसि। पश्य-

*विप्रलम्भं प्रकटयितुं संप्रतिग्रहणासम्भवं दर्शयन्नाह क्रूरग्रह इति--*

**क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्।**
**अभिभवितुमिच्छति बलात्......**इत्यर्द्धोक्ते ।

(नेपथ्ये) **आः! क एष मयि स्थिते चन्द्रमभिभवितुमिच्छामि बलात्?**
**सूत्रधारः- रक्षत्येनं तु बुधयोगः ॥६॥**

***अन्वयः-*** *सकेतुः क्रूरग्रहः इदानीं सम्पूर्णमण्डलं चन्द्रं बलात् अभिभवितुम् इच्छति। तु बुधयोगः एनम् रक्षति।*

***भावार्थः-*** *'पूर्णिमाप्रतिपत्सन्धौ ग्रस्यते राहुणा शशी' इत्युक्तेः प्रतिपत्पञ्चदश्योरन्तरालकाले एव चन्द्रमण्डलस्य पूर्णतायां संभवेन इदानीं चासंपूर्णमण्डलतया न तद् योग्यकाल इति भावः। अतएव श्लोके 'बलात्' इति पदेनायोगकालत्वम् द्योतितमित्यवधेयम्। अभिभवितुम् = आक्रमितुम् ग्रसितुं वा, इच्छति = अभिलषति। ज्योतिःशास्त्रे रवेः समानक्रान्तिवृत्तस्थे चन्द्रे सूर्याचन्द्रमसोर्मध्यगतभूच्छाया आच्छादनम्,*

*तदेव ग्रहणमित्युक्तम्। भूमिच्छाययाच्छादनमपि पूर्णबिम्बस्यैवेति सिद्धान्तात्। इदानीम् चन्द्रस्य पूर्णत्वाभावात्न ग्रहणसंभव इति भावः। अनेन श्लोकेन प्रकरणप्रतिपाद्यस्य चन्द्रगुप्तं प्रति राक्षसेन समलयकेतुनाभियोगस्य श्लेषेण सूचनात्। श्लिष्टार्थमादायैव चाणक्यरूपपात्रप्रवेशो वर्णनीय इति। श्लिष्टार्थस्तावदभिधीयते।*

*अत्र 'क्रूरग्रह' इत्यारभ्य 'बलात्' पर्यन्तं पदं तथा रचितम् यथाऽर्थान्तिराक्षेपेण पात्रप्रवेशो भवेन्नाटकं च प्रयोगोन्मुखं प्रसरेत्।*

*चन्दपक्षे क्रूरग्रहः सः केतुः इदानीम् संपूर्णमण्डलम् चन्द्रमसं बलात् ग्रसितुमिच्छति। (इत्यर्द्धोक्ते= अपूर्णकथने)*

*चन्दगुप्तपक्षे - दृढाग्रहवान् राक्षसः इदिनीं मलयकेतुना सह सन्धिं विधाय संपूर्णराष्ट्रमण्डले एकच्छत्रतया विराजमानं चन्द्रगुप्तं बलात् पराजेतुमिच्छति। एवं सूत्रधारवाक्यसमाप्तौ रङ्गे प्रवेक्ष्यमाणस्य चाणक्याख्यापात्रस्य प्रवेशसूचनाय नटीं पृच्छति। आर्येति = धरणिगोचरः धरणिः गोचरो- विषयो देशो यस्य सः भूमिदेश इत्यर्थः। ग्रहाभियोगात् = राहोराक्रमणात्। यत् सत्यमिति धरणिस्थस्य चन्द्रग्रहणविकारत्वं न संभवतीति यदुच्यते तत्सत्यमित्यर्थः। किन्तु स्ववाक्यसमाप्तौ संलग्नेन मया कतमोऽसाविति नोपलक्षितः। नेपथ्यान्तर्गतत्वेन न वा दृष्टः। न वा स्वरविशेषेणानुमितः।*

*चाणक्यगुणवर्णनायाः समाप्तावपि नामग्रहणमात्रेण त्रासवर्णनं तस्य अतीव दुःसहकोपनतासूचनाय।*

(नेपथ्ये) आः, क एष मयि स्थिते चन्द्रमभिभवितुमिच्छति बलात् ?

**नटी** – आर्य ! कः पुरनेष धरणीगोचरो भूत्वा चन्द्रं ग्रहाभियोगाद्रक्षितु-मिच्छति ?

**सूत्रधारः** - आर्ये ! यत्सत्यं मयापि न उपलक्षितो भवतु भूयोऽभियुक्तः स्वरव्यक्तिमुपलप्स्ये। ('क्रूरग्रहः-' इत्यादि पुनस्तदेव पठति।)

(नेपथ्ये)

आः, क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति। बलात् ?

**सूत्रधारः** - (आकर्ण्य) आर्ये, ज्ञातम् !! कौटिल्यः--

(इत्यर्द्धोक्ते नटी भयं नाटयति)

सूत्रधारः-

कुटनितिज्ञः स एष कौटिल्यः

**कौटिल्यः कुटिलमतिः स एष येन**
**क्रोधाग्नौ प्रसभमदाहि नन्दवंशः।**
**चन्द्रस्य ग्रहणमिति श्रुतेः सनाम्नो**
**मौर्येन्दोर्द्विषदभियोग इत्यवैति । ॥७॥**

चन्द्रगुप्तः शत्रुणा मलयकेतुना आक्रम्यमानम् इति अवगच्छति

*अन्वयः- येन क्रोधाग्नौ नन्दवंशः प्रसभम् अदाहि, सः एषः कुटिलमतिः कौटिल्यः 'चन्द्रस्य ग्रहणम्' इति श्रुतेः सनाम्नः मौर्येन्दोः द्विषदभियोगः इति अवैति।*

*भावार्थः - सूत्रधारः कूटनीतिज्ञः स एष कौटिल्यः। येन स्वक्रोधाग्नौ नन्दवंशः प्रसभं भस्मीकृतः। किञ्च चन्द्रस्य ग्रहणमिति वाक्ये चन्द्रसदृशस्य नाम श्रुत्वा तदुपरि मलयकेतुसहितस्य द्विषदो राक्षसस्याक्रमणं संभाव्य सामर्षसंरम्भः सन् प्रगल्भमानो दृश्यते।*

तदित आवां गच्छावः । (इति निष्क्रान्तौ।)

इति प्रस्तावना।

(ततः प्रविशति मुक्तां शिखां परामृशन् चाणक्यः)

मुद्राराक्षसस्य नायकः चन्द्रगुप्तः

**चाणक्यः** - कथय। क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति। बलात्?

**आस्वादितद्विरदशोणितशोणशोभां**
**सन्ध्यारुणामिव कलां शशलाञ्छनस्य।**
**जृम्भाविदारितमुखस्य मुखात्स्फुरन्तीं**
**को हर्तुमिच्छति हरेःपरिभूय दंष्ट्राम् ॥८॥**

चाणक्यस्य कोपः

*अन्वयः - कः जृम्भाविदारितमुखस्य हरेः मुखात् आस्वादितद्विरदशोणित-शोणशोभां शशलाञ्छनस्य सन्ध्यारुणां कलाम् इव स्फुरन्तीं दष्ट्रां परिभूय हर्तुम् इच्छति।*

*भावार्थः - सद्यो निपातितस्य गजराजस्य शोणितपानेन शोणशोभा-मुद्वहन्तीं सायङ्काले उदीयमानस्य चन्द्रमण्डलस्य अरुणवर्णां कलामिव जृम्भाविदारितमुखस्य सिंहस्य मुखात् देदीप्यमानां दंष्ट्रां तमेव परिभूय उत्पाटयितुमिच्छति एतादृशः सः साहसिकः। 'मुक्तां शिखां स्पृशन्' इत्यनेन शिखामोचनापराधजनितनन्दवंशविनाशरूपं कार्यं समापितम् इदानीं प्रतिज्ञार्थसिद्धेः तत्संयमावसरः प्राप्तः इति तद् बन्धाय उद्यतमः*

*सूचितः किन्तु पुनरपि चन्द्रगुप्ताभिभवोक्त्या कोपोपशमनं न जातमिति दर्शयन्नाह—नन्दकुलेति। वसन्ततिलकं वृत्तम्। तद्यथा- 'उक्तां वसन्ततिलकं तभजा जगौ गः' इति।*

*अस्य श्लोकस्य गुप्तार्थः - राक्षसः सिंहवत् उग्रस्य मम (चाणक्यस्य) अपि अनादरं कृत्वा मम परिश्रमेण प्राप्तं मगधस्य राज्यपदं ग्रहीतुम् इच्छति।*

**अपि च-**

**नन्दकुलकालभुजगीं कोपानलबहुलनीलधूमलताम्।**
**अद्यापि बध्यमानां वध्यः को नेच्छति शिखां मे ? ॥९॥**

*अन्वयः- वध्यः कः नन्दकुलकालभुजगीं कोपानलबहुलनीलधूमलतां मे शिखाम् अद्य अपि बध्यमानो न इच्छति।*

चाणक्यस्य चूडां नन्दवंशध्वंसे बध्यमानां नाभिलषति

*नन्दकुलस्य विनाशार्थं कालरूपां सर्पिणीमिव कोपानलस्य घनीभूतां चञ्चलां धूमलतामिव मे शिखाम् कः वध्यः बद्धुमुपक्रम्यमाणां नेच्छति। अत्र शिखायां भुजगीत्वारोपात् रूपकालङ्कारम्, एवं कोपो अनलत्वारोपस्य शिखायां धूमलतात्वारोपे हेतुत्वात् परम्परितम् चेत्युभयोः सङ्करः। आर्यावृत्तम् ।*

**अपि च-**

**उल्लङ्घयन् मम समुज्ज्वलतः प्रतापं**
**कोपस्य नन्दकुलकाननधूमकेतोः ।**
**सद्यः परात्मपरिमाणविवेकमूढः**
**कः शालभेन विधिना लभतां विनाशम् ।।१०।।**

*अन्वयः - परात्मपरिणामविवेकमूढः कः समुज्ज्वलतः नन्दकुल-काननधूमकेतोः यमकोपस्य प्रतापम् उल्लङ्घयन् शालभेन विधिना सद्यः विनाशं लभताम्।*

कः पतङ्गोचितेन अग्निप्रवेशरूपेण व्यापारेण सद्यः विनाशं प्राप्नोतु

***भावार्थः** - भस्मीकृतनन्दवंशस्य ज्वाज्वलमानस्य मम क्रोधस्य प्रतापं अतिक्रमिष्यन् किञ्च परस्योन्नतिं आत्मनश्चावनतिमविगणयन् कः पतङ्गोचितेन अग्निप्रवेशरूपेण व्यापारेण सद्यः विनाशं प्राप्नोतु। अत्र कोपे धूमकेतुत्वारोपात् नन्दकुले काननत्वारोपाच्च परम्परितरूपकालङ्कारम्— शलभेनेति निदर्शना च। वसन्ततिलका वृत्तम्।*

शाङ्गर्रव, शाङ्गर्रव ।

**शिष्यः** - (प्रविश्य) उपाध्याय, आज्ञापयतु।

**चाणक्यः** - वत्स, उपवेष्टुमिच्छामि।

**शिष्यः** – उपाध्याय ! ननु इयं सन्निहितवेत्रासनैव द्वारप्रकोष्ठशाला। तदस्यामुपवेष्टुमर्हत्युपाध्यायः।

'नन्दकुलविनाश-जनितरोषो राक्षसः पर्वतकस्य पुत्रः मलयकेतुः च

मलयकेतुसहायेन राक्षसेन क्रियमाणं चन्दगुप्ताभिभवम्

**चाणक्यः**:- वत्स ! कार्याभिनियोग एवास्मानाकुलयति, न पुनरुपाध्यायसहभूः शिष्यजने दुःशीलता। (नाट्येनोपविश्यात्मगतम्) कथं प्रकाशतां गतोऽयमर्थः पौरेषु यथा किल 'नन्दकुलविनाशजनितरोषो राक्षसः पितृवधामर्षितेन सकलनन्दराज्यपरिपणनप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह संधाय तदुपगृहीतेन च महता म्लेच्छराजबलेन परिवृतो वृषलमभियोक्तुमुद्यत' इति। (विचिन्त्य) अथवा येन मया सर्वलोकप्रकाशं नन्दवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा प्रतिज्ञासरित् सोऽहमिदानीं प्रकाशीभवन्तमप्येनमर्थं न समर्थः किं प्रशमयितुम्? इति कुत एतत् ? यस्य मम-

*अथ श्लोकद्वयेन स्वसामर्थ्यं वर्णयन्नाह--*

**श्यामीकृत्याननेन्दूनरियुवतिदिशां संततैः शोकधूमैः**
**कामं मन्त्रिद्रुमेभ्यो नयपवनहृतं मोहभस्म प्रकीर्य।**
**दग्ध्वा संभ्रान्तपौरद्विजगणरहितान्नन्दवंशप्ररोहान्**
**दाह्याभावान्न खेदाज्ज्वलन इव वने शाम्यति क्रोधवह्निः ॥११॥**

*अन्वयः:- क्रोधवह्निः अरियुवतिदिशाम् आननेन्दून् सन्ततैः शोकधूमैः श्यामीकृत्य मन्त्रिद्रुमेभ्यः नयपवनहृतं मोहभस्म कामं प्रकीर्य सम्भ्रान्तपौरद्विजगणरहितान् नन्दवंशप्ररोहान् दग्ध्वा वने ज्वलन इव दाह्याभावात् शाम्यति। खेदात् तु न शाम्यति।*

चाणक्यस्य क्रोधाग्निः

*भावार्थः – यस्य मम क्रोधवह्निः नन्दवंशीयानां युवतिदिशां मुखचन्द्रान् सततं व्याप्नुवातैः शोकधूमैः निष्प्रभान् कृत्वा, किञ्च मन्त्रिरूपेभ्यो वृक्षेभ्यो नयपवननीतं मोहोत्मकं भस्मजालं प्रसार्य सज्जनप्रकृतिरूपैः पक्षिभिः रहितान् नन्दवंशवेणुप्ररोहान् दग्ध्वा खेदान्न शाम्यति किन्तु दाह्याभावात् शाम्यति। अत्र रूपक-उपमा-परिसंख्यालङ्काराणां सत्वात् सङ्करः।*

*स्रग्धरा वृत्तम्। तद्यथा - 'म्रभ्नैर्याणां त्रयेण त्रिमुनियतियुतं स्रग्धरा कीर्तितेयम्'।*

**अपि च-**

**शोचन्तोऽवनतैर्नराधिपभयाद् धिक्शब्दगर्भैर्मुखै-**
**र्मामग्रासनतोऽवकृष्टमवशं ये दृष्टवन्तः पुरा।**
**ते पश्यन्ति तथैव सम्प्रति जना नन्दं मया सान्वयं**
**सिहेनेव गजेन्द्रमद्रिशिखरात् सिंहासनात् पातितम् ॥१२॥**

*अन्वयः - पुरा ये नराधिपभयात् अवनतैः धिक्शब्दगर्भैः मुखैः शोचन्तः अवशं माम् अग्रासनतः अवकृष्टं दृष्टवन्तः, सम्प्रति ते जनाः सिंहेन गजेन्द्रम् अद्रिशिखरात् इव मया सान्वयं नन्दं सिंहासनात् तथा एव पातितं पश्यन्ति।*

*भावार्थः - पुरा ये जनाः नन्दराजभयात् नम्रीभूतैः स्वकीयान्तराले धिक् शब्दं कुर्वद्भिः मुखैः शोचन्तः अग्र्यासनतः आकृष्यमाणं मां दृष्टवन्तः ते एव जना संप्रति सिंहेन पर्वतशिखरात् पातितं गजेन्द्रमिव मया सिंहासनात् सान्वयं नन्दं पातितं पश्यन्तु। अत्र पूर्णोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम् ।सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडित्, इति लक्षणात्।*

सोऽहमिदानीमवसितप्रतिज्ञाभरोऽपि वृषलापेक्षया शस्त्रं धारयामि।

*राक्षससंग्रहणरूपकार्यबीजस्य स्वोद्योगस्य बीजन्यासादुपक्षेपात् शास्त्रधारणं मम आवश्यककर्तव्यं इत्याह येन मयेति--*

येन मया-

येन चाणक्येन भुवः हृदयरोगाः इव नवनन्दाः समुत्खाताः।

**समुत्खाता नन्दा नव हृदयरोगा इव भुवः**
**कृता मौर्ये लक्ष्मीः सरसि नलिनीव स्थिरपदा।**
**द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा**
**फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥१३॥**

*अन्वयः - (येन मया) भुवः हृदयरोगाः इव नवनन्दाः समुत्खाताः। सरसि नलिनी इव मौर्ये लक्ष्मीः स्थिरपदा कृता, कोपप्रीत्योः द्वयोः सारं द्वितयं फलम् अभियुक्तेन मनसा द्विषति च सुहृदि च तुल्यं विभक्तम्।*

*भावार्थः - येन मया नवनन्दाः हृदयस्थितविषयवासना इव भुवः उत्पाट्य समूलमुन्मूलिताः। किञ्च सरसि नलिनीव मौर्ये लक्ष्मीः अचला कृता, येन च मया निग्रहानुग्रहाभिनिवेशयुक्तेन मनसा द्वयोः कोपप्रीत्योः तुल्यं द्वितीय फलं द्विषति शत्रौ नन्दे सुहृदि चन्दगुप्ते च विभक्तम्।*

*एतच्च परिभावना नाम मुखसन्धेरङ्गम्। 'कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना' इति तल्लक्षणम्। हृदयरोगा इव नलिनीव' इति चोपमाद्वयम्। द्वितीयार्धगतेन यथासंख्येन विराजते। शिखरिणी वृत्तम्। तद्यथा- 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति लक्षणात्।*

राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः

अथवा अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य? किं वा स्थैर्यमुत्पादितं चन्द्रगुप्तलक्ष्म्याः। (विचिन्त्य) अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः। स खलु कस्मिंश्चिदपि जीवति नन्दान्वयावयवे, वृषलस्य साचिव्यं ग्राहयितुं न शक्यते। तदभियोगं प्रति निरुद्योगोऽस्माभिरवस्थापयितुं शक्य इति अनयैव बुद्ध्या तपोवनगतोऽपि घातितस्तपस्वी नन्दवंशीयः सर्वार्थसिद्धिः। यावदसौ मलयकेतुमङ्गीकृत्यास्मदुच्छेदाय विपुलतरं प्रयत्नमुपदर्शयत्येव। (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) साधु, अमात्य राक्षस, साधु। साधु अमात्य राक्षस! मन्त्रि बृहस्पते! साधु। कुतः?

ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते

**ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते**
**तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया।**
**भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया**
**भक्त्या कार्यधुरं वहन्ति बहवस्ते दुर्लभास्त्वादृशाः ॥१४॥**

*अन्वयः - अयं लोकः ऐश्वर्यात् अनपेतम् ईश्वरम् अर्थतः सेवते। ये पुनः विपत्तिषु तम् अनुगच्छन्ति ते तत्प्रतिष्ठाऽऽशया। त्वादृशाः कृतिनः ये भर्तुः प्रलये अपि पूर्वसुकृतासङ्गेन निःसङ्गया भक्त्या कार्यधुरां वहन्ति, ते दुर्लभाः।*

पूर्वसुकृतासङ्गेन निःसङ्गया भक्त्या कार्यधुरां वहन्ति, ते दुर्लभाः

*भावार्थः - अयं सर्वोऽपि लोकः प्रभुत्वादप्रच्युतं सर्वैश्वर्यसमन्वितं स्वामिनमर्थप्रयोजनमुद्दिश्यैव परिचरति। ये तु विपत्तिकाले तादृशं धनरहितं स्वामिनं सेवन्ते ते निःस्वार्थभावनया अपि तु नरस्य मत्स्वामिनः राज्याप्तिर्भविष्यतीत्याशया सेवन्ते। किन्तु त्वादृशाः सत्सेवकाः स्वामिनि निस्वार्थभावनया स्वकीयं कार्यभारं वहन्ति। अतः दुर्लभाः।*

*अत्र व्यतिरेकालङ्कारः। शार्दूलविक्रीडितं वृत्तम् । सूर्याश्वैः यदि मः सजौ सततगाः शार्दूलविक्रीडितम्।*

अत एवास्माकं त्वत्संग्रहे प्रयत्नः, कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति । कुतः?-

प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये

**अप्राज्ञेन च कातरेण च गुणः स्यात् भक्तियुक्तेन कः**
**प्रज्ञाविक्रमशालिनोऽपि हि भवेत्किं भक्तिहीनात्फलम्।**
**प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये**
**ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥१५॥**

*अन्वयः - अप्राज्ञेन च कातरेण च सानुरागेण कः गुणः स्यात्? हि प्रज्ञाविक्रमशालिनः अपि भक्तिहीनात् किं फलं भवेत्? येषां प्रज्ञाविक्रमभक्तयः समुदिताः गुणाः ते भृत्याः नृपतेः सम्पत्सु आपत्सु च भूतये इतरे कलत्रम्।*

राक्षसं प्रति प्रशंसावचनम्

*भावार्थः - अनुरागवता राज्ञि भक्तिमुद्वहता निर्विक्रमेण महामूर्खेण च सेवकेन राज्ञः कोऽपि लाभो न भवति। प्रज्ञाविक्रमोभययुतेन अनुरागरहितेन सेवकेनापि राज्ञः किमपि प्रयोजनं न सिद्ध्यति। किन्तु प्रज्ञा विक्रमः भक्तिश्चेति समुदिता त्रयो गुणाः यस्मिन् वसन्ति ते भृत्याः संपत्सु आपत्सु च राज्ञां श्रेयसे भवन्ति। इतरे निर्विक्रमाः अनुरागवन्तः प्रज्ञाविक्रमशालिनः अपि निरनुरागाः कलत्रमिव राज्ञा भरणीयाः भवन्ति। न राजा तैः सेव्यते किन्तु राज्ञा एव ते सेव्या इति भावः। अत्र व्यतिरेकालङ्कारः। शार्दूलविक्रीडितं वृत्तम् ।*

तन्मयाऽप्यस्मिन्वस्तुनि न शयानेन स्थीयते, यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः। कथमिति। अत्र तावद् वृषलपर्वतकयोरन्यतरविनाशेनापि चाणक्यस्यापकृतं भवतीति—'विषकन्यया राक्षसेनास्माकमत्यन्तोपकारि मित्रं घातितः तपस्वी पर्वतेश्वर' इति संचारितो जगति जनापवादः। लोकप्रत्ययार्थमस्यैवार्थस्याभिव्यक्तये—'पिता ते चाणक्येन घातित' इति रहसि त्रासयित्वा भागुरायणेनापवाहितः पर्वतकपुत्रो मलयकेतुः। शक्यः खलु एव राक्षसमतिपरिगृहीतोऽपि व्युत्तिष्ठमानो बुद्ध्या निवारयितुम्। न पुनरस्य निग्रहात् पर्वतकवधोत्पन्नमयशः प्रकाशीभवत् प्रमार्ष्टुमलमिति। अन्यच्च, नियुक्ताश्च मया स्वपक्ष-परपक्षयोः अनुरक्तापरक्तजनजिज्ञासया बहुविधदेशवेषभाषाचारसंचारवेदिनो नानाव्यञ्जनाः प्रणिधयः। अन्विष्यन्ते च कुसुमपुरवासिनां नन्दामात्यसुहृदां निपुणं प्रचारगतयः। तत्तत्कारणमुत्पाद्य कृतकृत्यतामापादिताश्चन्द्रगुप्तसहोत्थायिनो भद्रभट-प्रभृतयः प्रधानपुरुषाः। शत्रुप्रयुक्तानां च तीक्ष्णरसदायिनां प्रतिविधानं प्रति अप्रमादिनः परीक्षितभक्तयः क्षितिपतिप्रत्यासन्ना नियुक्ता-स्तत्राप्तपुरुषाः। अस्ति चास्माकं सहाध्यायि मित्रम् इन्दुशर्मा नाम ब्राह्मणः। स चौशनस्यां दण्डनीत्यां चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः। स च मया क्षपणकलिङ्गधारी नन्दवधप्रतिज्ञानन्तरमेव कुसुमपुरमुपनीय सर्वनन्दामात्यैः सह सख्यं ग्राहितः। विशेषतश्च तस्मिन् राक्षसः समुत्पन्नविश्रम्भः। तेनेदानीं महत् प्रयोजनमनुष्ठेयं भविष्यति। तदेवमस्मत्तो न किंचित् परिहास्यते। वृषल एव केवलं प्रधानप्रकृतिः

चाणक्यमित्रम् इन्दुशर्मा

अस्मासु स्वारोपितराज्यतन्त्रभारः सततमुदास्ते। अथवा यत् स्वयमभियोगदुःखैरसाधारणैरप्राकृतं तदेव राज्यं सुखयति। कुतः-

*स्वबाहुबलार्जितसंपत्संपन्नानां वीराणामपि स्वयमाहृतभोगे दुःखसाक्षात्कारो अवश्यमेव भवतीति लौकिकदृष्टान्तेन समर्थयति स्वयमिति।*

**स्वयमाहृत्य भुञ्जाना बलिनोपि स्वभावतः।**
**गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥१६॥**

*अन्वयः- स्वयम् आहृत्य भुञ्जानाः नरेन्द्राः च गजेन्द्राः च स्वभावतः बलिनः अपि प्रायः दुःखिताः सीदन्ति।*

*भावार्थः - निसर्गतः शक्तिमन्तोऽपि गजेन्द्रा नरेन्द्राश्च आत्मनैव तत्तद् पिप्पलकदल्यादि भोजनादिवस्तुसंभारं तन्त्रादिसंभारं च संभृत्य भुञ्जाना तत्तदर्थजातसंग्रहव्यापृततया तत्तद्दुखमनुभवन्तः प्रायः सीदन्ति।*

*अत्र प्रस्तुतानां स्वयं राज्यमुपाहृत्य भुञ्जानानां भूपानां, अप्रस्तुतानां स्वयं संगृह्य कदल्यादिकश्मनतां गजेन्द्राणां च बाहुल्येनावसादनरूपैकक्रिया सम्बन्धात् दीपकालङ्कारः। अप्रस्तुत-प्रस्तुतयोर्दीपकं तु निगद्यते। 'अथ कारकमेकं स्यात् अनेकासु क्रियासु च' इति लक्षणात् पथ्यावक्त्रं वृत्तम्।*

(ततः प्रविशति सह यमपटेन चरः)

*इदानीं स्वात्मानं यमभक्तिपरं प्रकटयितुं स्वाभीष्टदेवस्य यमस्य सर्वदेवप्राधान्यरूपां स्तुतिं वर्णयन्नाह--*

चरः-

यमपटचरः निपुणकः चाणक्यचरः

**प्रणमत यमस्य चरणौ किं कार्यं दैवतैरन्यैः।**
**एष खल्वन्यभक्तानां हरति जीवं परिस्फुरन्तम् ॥१७॥**

*अन्वयः- यमस्य चरणौ प्रणमत, अन्यैः दैवतैः किं कार्यम्? एषः खलु अन्यभक्तानां परिस्फुरन्तं जीवं हरति।*

यमस्य चरणौ प्रणमत अन्यैः देवतैः किं कार्यम्?

*भावार्थः – अयि आर्याः केवलं कृतान्तं भजत। अन्यैर्हरिहरादिभिर्देवैः किं कार्यम् ? यतः एष यमः अन्यदेवभक्तानाम् अन्तकाले परिस्फुरतान् क्लिश्यमानान् प्राणान् हरति। तस्मिन् समये केऽपि देवाः प्राणान् रक्षितुं समर्था न भवन्ति। अतः सर्वदेवप्राधान्याद् यमस्य सेवा सर्वदैव कर्तव्या।*

*अत्र पूर्वार्धे वर्णितं यमचरणमात्रसेवोपदेशरूपकार्यं प्रति उत्तरार्धगतान्यदेवभक्तजीवननाशकत्वरूपवाक्यार्थस्य हेतुतया काव्यलिङ्गालङ्कारः। तदुक्तम्- 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति। आर्यावृत्तम्।*

**अपि च-**

यमः सर्वलोकं नाशयति। तेन यमराजेन जीवामः

**पुरुषस्य जीवितव्यं विषमाद् भवति भक्तिगृहीतात्।**
**मारयति सर्वलोकं यस्तेन यमेन जीवामः ॥१८॥**

*अन्वयः - भक्तिगृहीतात् विषमात् पुरुषस्य जीवितव्यं भवति, यः सर्वलोकं मारयति, तेन यमेन जीवामः।*

*भावार्थः - भक्त्या वशीकृतान् क्रूरदेवादपि यमात् प्राणिमात्रस्य जीवनरक्षणादिकार्यं भवन्येव। यः समस्तं चराचरात्मकमिदं लोकं मारयति। वयं तत्र भक्त्या स्वजीवनभारं निक्षिप्य तस्यानुकम्पया जीवामः।*

तस्मादिदं गृहं प्रविश्य यमपटं दर्शयन् गीतानि गायामि। (इति परिक्रामति।)

**शिष्यः** - (विलोक्य) भद्र, न प्रवेष्टव्यम्।

**चरः** - अहो ब्राह्मण ! कस्येदं गृहम् ?

**शिष्यः** - अस्माकमुपाध्यायस्य सुगृहीतनाम्न आर्यचाणक्यस्य।

**चरः** - (विहस्य) अहो ब्राह्मण ! आत्मीयस्यैव मम धर्मभ्रातुर्गृहं भवति। तस्माद् देहि मे प्रवेशं यावत् तवोपाध्यायस्य यमपटं धर्ममुपदिशामि।

**शिष्यः** - (सक्रोधम्।) धिङ् मूर्ख, किं भवान् अस्मदुपाध्यायादपि धर्मवित्तरः।

नहि सर्वः सर्वं जानाति

**चरः** - अहो ब्राह्मण ! मा कुप्य; न हि खलु सर्वः सर्वं जानाति। तत् किमपि ते उपाध्यायो जानाति, किमपि अस्मादृशा जानन्ति।

**शिष्यः** - (सक्रोधम्) मूर्ख, सर्वज्ञतामुपाध्यायस्य चोरयितुमिच्छसि।

**चरः** - अहो ब्राह्मण ! यदि तवोपाध्यायः सर्वं जानाति तर्हि जानातु तावत् कस्य चन्द्रोऽनभिमत इति।

शिष्य: - मूर्ख, किमनेन ज्ञातेन गुरोर्भविष्यति ?

चरः - अहो ब्राह्मण ! तवोपाध्याय एव ज्ञास्यति यदेनेन ज्ञातेन भवति, ऋजुबुद्धिस्त्वं तावद् जानासि कमलानां चन्द्रोऽनभिमत इति। ननु पश्य--

**कमलानां मनोहराणामपि रूपाद्विसंवदति शीलम्।**
**संपूर्णमण्डलेऽपि यानि चन्द्रे विरुद्धानि ॥१९॥**

*अन्वयः - मनोहराणाम् अपि कमलानां शीलं रूपात् विसंवदति, यानि सम्पूर्णमण्डले अपि चन्द्रे विरुद्धानि।*

कमलानि सम्पूर्णमण्डले अपि चन्द्रे विपरीतानि भवन्ति

*भावार्थः - षोडशकलासमन्विते चन्द्रे यानीमानि मनोहराणि कमलानि नानुरक्तानि प्रत्युत विरक्तानि प्रद्वेषभाञ्जि वा भवन्ति तेन ज्ञायते यत् रम्याकृतीनामपि कमलानां स्वभावाचरितं रूपाद्विरुद्धमिति।*

*एतेन पद्येन मनोहरगुणयुक्तानामपि राक्षसपक्षपातिनां जनानां शीलं चन्द्रगुप्ते राज्ञि भूते विरुद्धमाचरदिति ध्वनितम्। किञ्च संपूर्णमण्डलेऽपि चन्द्रगुप्ते तत्र प्रजानां विरागः अनुचितः इत्यपि सूच्यते। अस्मिन् पद्ये अप्रस्तुतात् कमलानां संपूर्णमण्डलचन्द्रे विरुद्धाचरणरूपात् सामान्यात् पूर्णमण्डलचन्द्रगुप्ते प्रजानां विरागप्रदर्शनात्मकान् औचित्यरूपविशेषस्य अवगमात् अप्रस्तुतप्रशंसालङ्कारः। आर्यावृत्तम्।*

**चाणक्यः** - (आकर्ण्य आत्मगतम्।) अये ! चन्द्रगुप्ताद् अपरक्तान् पुरुषान् जानामि इति उपक्षिप्तमनेन।

**शिष्य:** - मूर्ख ! किमिदमसंबद्धमभिधीयते?

**चरः** - अहो ब्राह्मण ! सुसम्बद्धमेवैतद् भवेत् ?

**शिष्यः** - यदि किं स्यात् ?

**चरः** - यदि श्रृण्वन्तं जानन्तञ्च जनं लभे।

लप्स्यसे श्रोतारं ज्ञातारं च

**चाणक्यः** – (विलोक्य) भद्र ! सुखं प्रविश लप्स्यसे श्रोतारं ज्ञातारं च।

**चरः** - एष प्रविशामि। जयतु जयत्वार्यः।

**चाणक्यः** - (विलोक्य आत्मगतम्।) कथं प्रभूतत्वात् कार्याणां कस्य पराज्ञानो नियुक्तो निपुणकः इति न ज्ञायते। आं ज्ञातम्! कथमयं प्रकृतिचित्तपरिज्ञाने नियुक्तो निपुणकः (प्रकाशम्।) भद्र ! स्वागतम् उपविश्यताम्।

चरः - यदार्य आज्ञापयतीति (भूमावुपविशति)

चाणक्यः – भद्र ! उपवर्णय इदानीं स्वनियोगवृत्तान्तम्। अपि वृषलमनुरक्ताः प्रकृतयः?

चरः चाणक्यं प्रति स्वनियोगवृत्तान्तम् उपवर्णयति

चरः - अथ किम्। आर्येण खलु तेषु तेषु विरागकारणेषु परिहृतेषु (परिहियमाणेषु) सुगृहीतनामधेये देवे चन्द्रगुप्ते दृढमनुरक्ताः प्रकृतयः। किन्तु पुनः सन्त्यत्र नगरे अमात्यराक्षसेन सह प्रथमं समुत्पन्नस्नेहबहुमानास्त्रयः पुरुषाः देवस्य चन्द्रश्रियः श्रियं न सहन्ते।

चाणक्यः - (सक्रोधम्) ननु वक्तव्यं 'स्वजीवितं न सहन्त' इति। भद्र, अपि ज्ञायन्ते नामधेयतः?

चरः - कथमज्ञातनामधेया आर्यस्य निवेद्यन्ते?

चाणक्यः - तेन हि श्रोतुमिच्छामि।।

चाणक्यमित्रम् इन्दुशर्मनामकं ब्राह्मणः जीवसिद्धिनामक्षपणक रुपः

चरः - शृणोत्वार्यः। प्रथमं तावदार्यस्य रिपुपक्षे बद्धपक्षपातः क्षपणकः। जीवसिद्धिः।

चाणक्यः - (सहर्षमात्मगतम्।) अस्मद्रिपुपक्षे बद्धपक्षपातः क्षपणकः। (प्रकाशम्)किन्नामधेयो हि सः?

चरः - जीवसिद्धिर्नाम।

चाणक्यः – 'अस्मद्रिपुपक्षे बद्धपक्षपातः क्षपणक' इति कथमवगतं भवता?

चरः- येन सा अमात्यराक्षसप्रयुक्ता विषकन्या देवे पर्वतेश्वरे समावेशिता।

चाणक्यः - (स्वगतम्) जीवसिद्धिरेष तावत् अस्मत्प्रणिधिः। (प्रकाशम्) भद्र ! अथ अपरः कः।

राक्षसस्य मित्रं शकटदासः

चरः- आर्य! अपरः खलु अमात्यराक्षसस्य प्रियवयस्यः कायस्थः शकटदासो नाम।

न युक्तं प्राकृतमपि रिपुमवज्ञातुम्।

चाणक्यः - (विहस्यात्मगतम्) कायस्थ इति लघ्वी मात्रा। तथापि न युक्तं प्राकृतमपि रिपुमवज्ञातुम्। तस्मिन् मया सुहृच्छद्मना सिद्धार्थको निक्षिप्तः। (प्रकाशम्) भद्र! तृतीयं श्रोतुमिच्छामि।

राक्षसस्य परिवारः चन्दनदासस्य गृहे न्यासरूपेण संरक्षितः

चरः- तृतीयोऽपि अमात्यराक्षसस्य द्वितीयमिव हृदयं पुष्पपुरवासी मणिकारश्रेष्ठी चन्दनदासो नाम। यस्य गेहे कलत्रं न्यासीकृत्य आमात्यराक्षसो नगरादपक्रान्तः।

**चाणक्यः** - (आत्मगतम्) नूनं सुहृत्तमः। न हि अनात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यति। (प्रकाशम्।) भद्र! 'चन्दनदासस्य गृहे राक्षसेन कलत्रं न्यासीकृतमि' ति कथमवगम्यते भवता?

**चरः** – आर्य ! इयमङ्गुलिमुद्रा आर्यमवगतार्थं करिष्यति। (इत्यर्पयति)

**चाणक्यः** – (मुद्रामवलोक्य गृहीत्वा राक्षसस्य नाम वाचयित्वा च सहर्षं स्वगतम्।) ननु राक्षस एव अस्मदङ्गुलिप्रणयी संवृत्त इति। (प्रकाशम्।) भद्र ! अङ्गुलिमुद्राधिगमं विस्तरेण श्रोतुमिच्छामि।

**चरः** - शृणोत्वार्यः, अस्ति तावदहमार्येण पौरजनचरित्रदर्शने नियुक्तः, ततः परगृहप्रवेशे परस्यानाशङ्कनीयेनानेन यमपटेन आहिण्डमानो मणिकारश्रेष्ठिनश्चन्दनदासस्य गृहं प्रविष्टोऽस्मि, तत्र यमपटं प्रसार्य प्रवृत्तोऽस्मि गीतानि गातुम्--'

**चाणक्यः** - ततस्ततः।

राक्षसस्य मुद्रा चन्दनदासगृहतः प्राप्यते

**चरः** - ततश्च एकस्मात् आवरकात् पञ्चवर्षदेशीयः प्रियदर्शनीय-शरीराकृतिः कुमारको बालजनसुलभकौतूहलोत्फुल्लनयनयुगलको निष्क्रमितुं प्रवृत्तः। ततः 'हा निर्गतः हा निर्गतः' इति शङ्का-परिग्रहनिवेदयिता । तस्यैव आवरकस्याभ्यन्तरे स्त्रीजनस्य उत्थितो महान् कलकलः। तत ईषद्वारदेशदापितमुख्या एकया स्त्रिया स कुमारको निष्क्रामन्नेव निर्भर्त्स्यावलम्बितः कोमलया बाहुलतया। तस्याश्च कुमारसंरोधसम्भ्रमप्रचलिताङ्गुलेः करात् पुरुषाङ्गुलिपरिणाहप्रमाण-घटिता। विगलितेयमङ्गुलिमुद्रिका देहलीबन्धे निपतिता, तया स्त्रिया अनवबुध्यमानैव मम चरणपार्श्वे समागत्य प्रणामनिभृता नववधूरिव निश्चला संवृत्ता; मयापि अमात्यराक्षसस्य नामाङ्कितेति आर्यस्य पादमूलं प्रापिता, तस्मात् एषोऽस्या मुद्राय आगम इति।

**चाणक्यः** – भद्र ! श्रुतम्। अपसर, न चिरादस्य परिश्रमस्यानुरूपं फलमधिगमिष्यसि।

**चरः** - यदार्य आज्ञापयति इति। (इति निष्क्रान्तः।)

**चाणक्यः** - शाङ्र्गरव, शाङ्र्गरव।

**शिष्यः** – (प्रविश्य) उपाध्याय ! आज्ञापय ।

**चाणक्य** - वत्स, मसीभाजनं पत्रञ्चोपानय।

शिष्यः – यदाज्ञापयत्युपाध्यायः। (इति निष्क्रम्य पुनः प्रविश्य)उपाध्याय! इदं मसीभाजनं पत्रञ्च।

चाणक्यः - (गृहीत्वा स्वगतम्।) किमत्र लिखामि ? अनेन खलु लेखेन राक्षसो जेतव्यः।

प्रतिहारीः - (प्रविश्य) जयतु जयत्वार्यः।

चाणक्यः - (सहर्षमात्मगतम्।) गृहीतोऽयं जयशब्दः। (प्रकाशम्।) शोणोत्तरे!

किमागमनप्रयोजनम् ?

पर्वतेश्वरस्य धारितपूर्वाण्याभरणानि गुणवतां ब्राह्मणानां प्रतिपादयामि

प्रतीहारी – आर्य ! कमलमुकुलाकारमञ्जलिं शीर्षे निवेश्य देवश्चन्द्रश्रीः आर्यं विज्ञापयति—'इच्छाम्यहमार्येणाभ्यनुज्ञातो देवस्य पर्वतेश्वरस्य पारलौकिकं कर्तुम्, तेन च धारितपूर्वाण्याभरणानि गुणवतां ब्राह्मणानां प्रतिपादयामि' इति।

वृषलः नाम मुरापुत्रचन्द्रगुप्तमौर्यः

चाणक्यः - (सहर्षमात्मगतम्) साधु वृषल ! ममैव हृदयेन सह संमन्त्र्य सन्दिष्टवानसि। (प्रकाशम्) शोणोत्तरे, उच्यतामस्मद्वचनाद् वृषलः। साधु, वत्स ! अभिज्ञः खल्वसि लोकव्यवहाराणाम्, तदनुष्ठीयतामात्मनोऽभिप्रायः, किन्तु पर्वतेश्वरेधृतपूर्वाणि भूषणानि गुणवन्ति गुणवद्भ्य एव ब्राह्मणेभ्यः प्रतिपादनीयानि। तद् एषोऽहं स्वयं परीक्षितगुणान् ब्राह्मणान् प्रेषयामि।

प्रतीहारी - यदार्य आज्ञापयतीति। (निष्क्रान्ता।)

चाणक्यः - शाङ्र्गरव ! शाङ्र्गरव! उच्यन्तामस्मद्वचनाद्विश्वावसुप्रभृतयस्त्रयो भ्रातरो यथा—'वृषलात्प्रतिगृह्याभरणानि भवद्भिरहं द्रष्टव्य' इति।

शिष्यः – यदाज्ञापयत्युपाध्यायः। (निष्क्रान्तः।)

म्लेच्छराजबलस्य मध्यात् पञ्च राजानः परया भक्त्या राक्षसमनुवर्तन्ते

चाणक्यः - (स्वगतम्) उत्तरोऽयं लेखार्थः। पूर्वः कतमोऽस्तु। (विचिन्त्य) आं! ज्ञातम्; उपलब्धवानस्मि प्रणिधिभ्यः यथा तस्य म्लेच्छराजबलस्य मध्यात् प्रधानतमाः पञ्च राजानः परया भक्त्या राक्षसमनुवर्तन्ते। ते यथा-

*तानेव दर्शयन् तेषु कर्त्तव्यदोषारोपणस्याशक्यसमुच्छेदतामाह--*

**कौलूतश्चित्रवर्मा मलयनरपतिः सिंहनादो नृसिंहः।**

**काश्मीरः पुष्कराक्षः क्षतरिपुमहिमा सैन्धवः सिन्धुषेणः।**

**मेघाक्षः पञ्चमोऽस्मिन् पृथुतुरगबलः पारसीकाधिराजो**

**नामान्येषां लिखामि ध्रुवमहमधुना चित्रगुप्तः प्रमाष्टुः॥२०॥**

*अन्वयः - कौलूतः चित्रवर्मा मलयनरपतिः नृसिंहः सिंहनादः, काश्मीरः पुष्कराक्षः क्षतरिपुमहिमा सैन्धवः सिन्धुषेणः पञ्चमः पृथुतुरगबलः पारसीकाधिराजः मेघाक्षः एषाम् अस्मिन् अधुना अहं नामानि लिखामि, चित्रगुप्तः प्रमाष्टुः।*

*भावार्थः - अहमेवैतेषां शासिता न च यमश्चित्रगुप्तो वा अतः चित्रगुप्तः स्वलिपिं संशोध्य एषु स्वशासनाधिकारं त्यजतु मारणार्थम् एषु तत्प्रयासो विफल इति भावः यद्वा अस्मिन् पत्रे एतेषां नामोल्लेखनेन एते मरिष्यन्ति। चित्रगुप्तः जीवितत्वेन लिखितानामेषां नामानि स्वलिप्यां स्खलितमिदमिति पुनः संशोधयतु। स्रग्धरा वृत्तम्।*

(विचिन्त्य) अथवा न लिखामि। सर्वमनभिव्यक्तमेव तावदास्ताम्।

(प्रकाशम्) शाङ्गर्रव! शाङ्गर्रव!

**शिष्यः** - (प्रविश्य) उपाध्याय! आज्ञापय।

श्रोत्रियाक्षराणि प्रयत्नेन लिखितान्यपि नियतमस्फुटानि भवन्ति

**चाणक्यः** – वत्स! श्रोत्रियाक्षराणि प्रयत्नेन लिखितान्यपि नियतमस्फुटानि भवन्ति। तदुच्यतामस्मद्वचनात् सिद्धार्थकः। (कर्णे एवमिति) 'एभिरक्षरैः केनापि, किमपि, कस्यापि, स्वयं वाच्यम् इति, अदत्तबाह्यनामानं लेखं शकटदासेन लेखयित्वा मामुपतिष्ठस्व, न चाख्येयमस्मै 'चाणक्यो लेखयती'ति।

सिद्धार्थकप्रयासेन कपटलेखः शकटदासेन लिखितः स्वहस्तेन

**शिष्यः** - तथेति। (निष्क्रान्तः।)

**चाणक्यः** - (स्वगतम्।) हन्त! जितो मलयकेतुः।

**सिद्धार्थकः** - (लेखहस्तः प्रविश्य) जयतु जयत्वार्यः। आर्य! अयं सः शकटदासेन लिखितो लेखः।

**चाणक्यः** - (गृहीत्वा निरीक्ष्य) अहो! दर्शनीयताक्षराणाम् (इत्यनुवाच्य) भद्र! अनया मुद्रया मुद्रयैनम्।

**सिद्धार्थकः** - (तथा कृत्वा।) आर्य! अयं स मुद्रितो लेखः, किमपरमनुष्ठी-यताम्।

कस्मिंश्चित् आत्मनाऽनुष्ठेये कर्मणि सिद्धार्थकं व्यापारयितु मिच्छामि

**चाणक्यः** – भद्र ! कस्मिंश्चित् आत्मनाऽनुष्ठेये कर्मणि त्वां व्यापारयितु-मिच्छामि।

**सिद्धार्थकः** - (सहर्षम्।) आर्य ! अनुगृहीतोऽस्मि, आज्ञापयतु आर्यः, किमनेन दासजनेन आर्यस्यानुष्ठातव्यम् ?

**चाणक्यः** - भद्र ! प्रथमं तावत् वध्यस्थानं गत्वा घातकाः सरोषं दक्षिणाक्षिसङ्कोचसंज्ञां ग्राहयितव्याः, ततस्तेषु गृहीतसंज्ञेषु भयापदेशादितस्ततः प्रद्रुतेषु शकटदासो वध्यस्थानादपनीय राक्षसं प्रापयितव्यः, तस्माच्च सुहृत्प्राणरक्षणपरितुष्टात् पारितोषिकं ग्राह्यम्। राक्षस एव कञ्चित्कालं (कर्णे एवमेवम्) सेवितव्यः, ततः प्रत्यासन्नेषु त्वया प्रयोजनमिदमनुष्ठेयम्।

**सिद्धार्थकः** - यदार्य आज्ञापयतीति ।

चाणक्यशिष्यः शाङ्र्गरवः

**चाणक्यः** - शाङ्र्गरव ! शाऽङ्र्गरव !!

**शिष्यः** - (प्रविश्य) उपाध्याय ! आज्ञापय ।

चाणक्यः कस्मिंश्चित् कर्माणि नियोजयितुं इच्छामि

**चाणक्यः** – उच्यतां मद्वचनात् कालपाशिको दण्डपाशिकश्च, यथा वृषलः समाज्ञापयति "य एष क्षपणको जीवसिद्धिर्नाम राक्षसप्रयुक्तो विषकन्यया पर्वतेश्वरं घातितवान्; स एनमेव दोषं प्रख्याप्य सनिकारं नगरात् निर्वास्यताम्" इति।

**शिष्यः** - तथेति। (इति परिक्रामति।)

**चाणक्यः** – वत्स ! तिष्ठ तिष्ठ। योऽयमपरः, कायस्थः शकटदासो नाम राक्षसप्रयुक्तो नित्यमस्मच्छरीरमभिद्रोग्धुमिह प्रयतते, स चाप्येनं दोषं प्रख्याप्य, शूलमारोप्यतां, गृहजनश्चास्य बन्धनागारे प्रवेश्यतामिति।

**शिष्यः** - तथेति। (इति निष्क्रान्तः।)

**चाणक्यः** - (चिन्तां नाटयित्वा स्वगतम्) अपि नाम दुरात्मा राक्षसो गृह्येत?

**सिद्धार्थकः** – आर्य ! गृहीतः।

**चाणक्यः** - (सहर्षमात्मगतम्।) हन्त ! गृहीतो राक्षसः। (प्रकाशम्।) भद्र ! कोऽयं गृहीतः?

**सिद्धार्थकः** - गृहीतो मया आर्यस्य सन्देशः, तद् गमिष्याम्यहं कार्यसिद्ध्यै।

**चाणक्यः** - (साङ्गुलिमुद्रं लेखमर्पयित्वा।) भद्र ! सिद्धार्थक ! गम्यताम्, अस्तु ते कार्यसिद्धिः।

**सिद्धार्थकः** - तथेति। (प्रणम्य निष्क्रान्तः।) यदार्य आज्ञापयतीति।

**शिष्यः** - (प्रविश्य) उपाध्याय ! कालपाशिको दण्डपाशिकश्च उपाध्यायं विज्ञापयतः 'इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनमि'ति।

**चाणक्यः** - शोभनम्। वत्स ! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

**शिष्यः** - यदाज्ञापयत्युपाध्यायः। (इति निष्क्रम्य चन्दनदासेन सह पुनः प्रविश्य।) इत इतः श्रेष्ठिन्!

**चन्दनदासः**- (स्वगतम्)

निर्दोषस्य लोकस्य अपि शङ्का वर्द्धते

**चाणक्येऽस्मिन्नकरुणे सहसा शब्दायितस्यापि जनस्य।**
**निर्दोषस्यापि शङ्का किम्पुनर्मम जातदोषस्य ।।२१।।**

*अन्वयः - अकरुणे अस्मिन् चाणक्ये सहसा शब्दायितस्य निर्दोषस्य लोकस्य अपि शङ्का वर्द्धते, जातदोषस्य किम् ?*

*भावार्थः - हन्त ! सर्वथा निर्दये चाणक्ये सति तेन आहूतस्य निरपराधस्य अपि जनस्य हृदि 'न जाने किं भविष्यति' इत्यादिरूपं भयं अकस्माद् वर्धते राक्षसकलत्ररक्षणादिना कृतराजापराधस्य अपराधिनः मम पुनः कथैव का? सुतरामह तस्माद्बिभेमि इत्यर्थः।*

तद्भणिता मया धनसेनप्रमुखास्त्रयो वणिजका 'कदापि चाणक्यहतको गेहं मे विचिनोति तदवहिता निर्वहत भर्तुः अमात्यराक्षसस्य गृहजनम्, मम तावद् यद्भवति तद्भवतु' इति।

**शिष्यः** - भोः श्रेष्ठिन्, इत इतः।

**चन्दनदासः** – अयमागतोऽस्मि।

(उभौ परिक्रामतः।)

**शिष्यः** - उपाध्याय, अयं श्रेष्ठी चन्दनदासः।

**चन्दनदासः** - (उपसृत्य।) जयतु, जयत्वार्यः।

अनुचित उपचारो हृदयस्य परिभवादपि दुःखम् उत्पादयति

अत्यादरः शङ्कनीयः

शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रियाऽधिकं नन्दन्ति प्रकृतयः

**चाणक्यः** - (नाट्येनावलोक्य।) भो श्रेष्ठिन् ! स्वागतम्। इदमासनमास्यताम्।

**चन्दनदासः** - (प्रणम्य) - किं न जानाति आर्यः, यथानुचित उपचारः परिभवादपि महद्दुःखमुत्पादयति? तद् इहैव अहमुचितायां भूमावुपविशामि।

**चाणक्यः** - भोः श्रेष्ठिन्! मा मैवम्, उचितमेवैतत् अस्मद्विधैः सह भवतः, तदुपविश्यतामासन एव।

**चन्दनदासः** - (स्वगतम्।) उपक्षिप्तमनेन दुष्टेन किमपि। यदार्य आज्ञापयति। (इति उपविष्टः।)

**चाणक्यः** - भोः श्रेष्ठिन् चन्दनदासः, अपि प्रचीयन्ते सव्यवहाराणां वृद्धिलाभाः?

**चन्दनदासः** - (स्वगतम्।) अत्यादरः शङ्कनीयः (प्रकाशम्) आर्य! अथ किम्, आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।

**चाणक्यः** - भोः श्रेष्ठिन्! अपि कदाचिद् चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणान् अधुना स्मारयन्ति प्रकृतीः?

**चन्दनदासः** - (कर्णौ पिधाय।) शान्तं पापम्। शारदनिशासमुद्गतेनेव (पूर्ण) पूर्णिमाचन्द्रेण चन्द्रश्रियाऽधिकं नन्दन्ति प्रकृतयः।

**चाणक्यः** - भो श्रेष्ठिन्! यद्येवं, प्रीताभ्यः प्रकृतिभ्यः प्रियमिच्छन्ति राजानः।

**चन्दनदासः** – आज्ञापयतु आर्यः किं अर्थजातमस्माज्जनादिष्यत इति।

**चाणक्यः** - भोः श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। यतो नन्दस्यैवार्थरुचेरर्थसंबंधः प्रीतिमुत्पादयति, चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

**चन्दनदासः** - (सहर्षम्।) आर्य! अनुगृहीतोऽस्मि।

**चाणक्यः** - भोः श्रेष्ठिन्! स चापरिक्लेशः कथमाविर्भवतीति न पुनः प्रष्टव्याः स्मो भवता ?

**चन्दनदासः** - आज्ञापयत्वार्यः।

**चाणक्यः** - संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्तितव्यम्।

कीदृशः तृणानाम् अग्निना सह विरोधः

**चन्दनदासः** – आर्य ! कः पुनरधन्य (राज्ञा विरुद्ध इति), आर्येणावगम्यते।

**चाणक्यः** - भवान् एव तावत् प्रथमः।

**चन्दनदासः** - (कर्णौ पिधाय) शान्तं पापं, शान्तं पापम्। कीदृशस्तृणानामग्निना सह विरोधः।

**चाणक्यः**- अयमीदृशो विरोधः, यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहमभिनीय रक्षसि ।

**चन्दनदासः** - आर्य, अलीकमेतत् केनाप्यनभिज्ञेन आर्यस्य निवेदितम्।

**चाणक्यः** - भोः श्रेष्ठिन्, अलमाशङ्कया। भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

**चन्दनदासः** - एवं नु इदम्। तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः।

**चाणक्यः** – 'प्रथमम् अनृतम्, इदानीम् आसीदि'ति परस्परविरोधिनी वचने।

**चन्दनदासः** - एतावदेवास्ति मे वाक्छलम्।

**चाणक्यः** - भोः श्रेष्ठिन्! चन्द्रगुप्ते राजनि न परिग्रहः छलानां, तत् समर्पय राक्षसस्य गृहजनम् अच्छलं भवतु भवतः ।

**चन्दनदासः** - आर्य, ननु विज्ञापयामि, तस्मिन्समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति।

**चाणक्यः** – अथ इदानीं क्व गतः ?

**चन्दनदासः**- न जानामि कुत्र गतः? इति।

शिरसि भयमतिदूरे तत्प्रतीकारः

**चाणक्यः**- (स्मितं कृत्वा) कथं न ज्ञायते नाम? भो श्रेष्ठिन् ! शिरसि भय-मतिदूरे तत्प्रतीकारः। अन्यच्च नन्दमिव विष्णुगुप्तः--(अर्द्धोक्तौ लज्जां नाटयति।)

*राजद्रोहिणा सह संधानादसह्यविक्रमो राजदण्डः सन्निहितः निवृत्युपायः पुनरसन्निहित इति भावः। राक्षसेन चन्द्रगुप्तहननप्रत्याशा तु दूरवर्तिनी। फलयिष्यति न वा इति सन्देह इति भावः।*

चन्दनदासः - (स्वगतम्।)

उपरि घनरटितं
घनम्, दयिता दूरे

उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम् ?
हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ।।२२।।

*अन्वयः - उपरि घनरटितं घनम्, दयिता दूरे, एतत् किम् आपतितम् ? सर्पः शीर्षे समाविष्टः दिव्यौषधयः हिमवति (सन्तीति )।*

*भावार्थः - ऊर्ध्वम् सान्द्रघनगर्जितं वियोगिजनासह्यं भवति विरह-प्रशमनौपयिकी दयिता च दूरे तिष्ठति अकस्मात् किमेतदुपस्थितम् एवम् दंशनार्थं सर्पः शिरसि तिष्ठति, तत्प्रतीकारक्षमाश्च दिव्यौषधयः हिमवति वर्तन्ते। राक्षसकलत्ररक्षणेन कृतापराधस्य मम मृत्युरुपस्थितः, तस्य प्रतीकारः राक्षसेन चन्द्रगुप्तहननम् तत्प्रत्याशा दूरवर्त्तिनी, फलिष्यति वा न वा इति संशय एव । शार्दूलविक्रीडितं वृत्तम्।*

**चाणक्यः** - चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मैवं मंस्थाः। पश्य--

**विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्वक्रनासादिभि-**
**र्नन्दे जीवति या तदा न गमिता स्थैर्यं चलन्ती मुहुः।**
**तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्**
**कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत् पृथक् ?।।२३॥**

*अन्वयः - तदा नन्दे जीवति मुहुः चलन्ती या श्रीः विक्रान्तैः नयशालिभिः वक्रनासादिभिः सुसचिवैः स्थैर्यं न गमिता। द्युतिम् इव एकत्वम् उपागतं जगत् प्रह्लादयन्तीं तां चन्द्रात् इव चन्द्रगुप्तनृपतेः पृथक् कर्तुं कः व्यवस्येत्?*

*भावार्थः- तदा नवसु नन्देषु जीवत्सु सन्मन्त्रिभिः वक्रनासादिभिः सञ्चालिताऽपि सती या श्रीः स्थैर्यं न गमिता अधुना मया सन्नीत्या चन्द्रगुप्ते एकत्वमुपागम्य दृढतया संस्थापितां तां लोकमाह्लादयन्तीं श्रियं चन्द्रात् चन्द्रिकामिव कः पृथक्कृत्य सञ्चालयेत्। अत्रोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥*

फलेन संवादितं
शोभते ते
विकत्थितम्।

**चन्दनदासः** - (स्वगतम्।) फलेन संवादितं शोभते ते विकत्थितम्।

(नेपथ्ये कलकलः।)

**चाणक्यः** - शाङ्र्गरव, ज्ञायतां किमेतत्?

**शिष्यः**:- यदाज्ञापयत्युपाध्यायः (निष्क्रम्य पुनः प्रविश्य) उपाध्याय! एष राज्ञश्चन्द्रगुप्तस्याज्ञया राजापथ्यकारी क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वास्यते।

**चाणक्यः** - क्षपणकः? अहह !! अथवा अनुभवतु राजाऽपथ्यकारित्वस्य फलम्। भोः श्रेष्ठिन् चन्दनदास! एवमयं राजाऽपथ्यकारिषु तीक्ष्णदण्डो राजा, तत् क्रियतां पथ्यं सुहृद्वचः, समर्प्यतां राक्षसगृहजनः, चिरमनुभूयन्तां विचित्रा राजप्रसादः।

**चन्दनदासः** - नास्ति मे गेहे अमात्यराक्षसगृहजनः।

(नेपथ्ये पुनः कलकलः)

**चाणक्यः** - शाङ्र्गरव, ज्ञायतां, पुनः किमेतत् ?

**शिष्यः** - यदाज्ञापयत्युपाध्यायः (इति निष्क्रम्य पुनः प्रविश्य) उपाध्याय! असौ राजाऽऽज्ञया राजाऽपथ्यकारी कायस्थः शकटदासः शूलमारोपयितुं नीयते।

**चाणक्यः** – स्वकर्मफलभाक् भवतु। भोः श्रेष्ठिन्! एवमयं राजाऽपथ्यकारिषु तीक्ष्णदण्डो राजा, न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः, तद् रक्ष परकलत्रेणात्मनः कलत्रं जीवितञ्च ।

**चन्दनदासः** - आर्य! किं मे भयं दर्शयसि? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्।

**चाणक्यः** - चन्दनदास! एष ते निश्चयः?

**चन्दनदासः** – बाढम्, एष मे स्थिरो निश्चयः।

**चाणक्यः** - (स्वगतम्।) साधु चन्दनदास! साधु—

*चाणक्यश्चन्दनदासस्य दृढतामवगम्य तं मनसा स्तौति--*

परसंवेदने अर्थलाभेषु सुलभेषु इदानीं दुष्करम्

**सुलभेष्वर्थलाभेषु परसंवेदने जने ।**
**क इदं दुष्करं कुर्यादिदानीं शिबिना विना ।।२४।।**

*अन्वयः - परसंवेदने अर्थलाभेषु सुलभेषु इदानीं दुष्करं शिबिना विना कः जनः कुर्यात् ?*

*भावार्थः - राजप्रासादादिसमीहितसिद्ध्यादिषु सुखेन प्राप्येषु अपि अस्मिन् कलियुगे शिबिराजानं विहाय त्वदन्यः कोऽपि नास्ति यः परकलत्ररक्षणार्थं जीवनमपि दातुम् शक्नुयादित्यर्थः। अनुष्टुप् वृत्तम्।*

(प्रकाशम्) चन्दनदास! एष ते निश्चयः?

**चन्दनदासः** – बाढम् (बाढम्)।

**चाणक्यः** - (सक्रोधम्।) दुरात्मन्, दुष्टवणिक्! अनुभूयतां तर्हि राजकोपः।

**चन्दनदासः** - (बाहू प्रसार्य) सज्जोऽस्मि। अनुतिष्ठत्वार्य आत्मनोऽधिकारस्यानुरूपम्।

**चाणक्यः** - (सक्रोधम्) शाङ्र्गरव! उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकश्च—'शीघ्रमयं दुष्टवणिक् निगृह्यताम्', अथवा—तिष्ठतु, उच्यतां दुर्गपालो विजयपालश्च---'गृहीतगृहसारमेनं सपुत्रकलत्रं संयम्य रक्ष तावत्, यावत् मया वृषलाय कथ्यते। स एवास्य प्राणहरं दण्डमाज्ञापयिष्यति।

'दिष्ट्या मित्रकार्येण मे विनाशो न पुरुषदोषेण'

**शिष्यः** - यदाज्ञापयत्युपाध्यायः। श्रेष्ठिन्! इत इतः।

**चन्दनदासः** – (उत्थाय) आर्यो! अयमागच्छामि। (स्वगतम्) दिष्ट्या मित्रकार्येण मे विनाशो जनितः न पुनः पुरुषदोषेण।

**चाणक्यः** - (सहर्षम्) हन्त! लब्ध इदानीं राक्षसः। कुतः?

*चन्दनदासस्य स्वमरणस्वीकरणमाकर्ण्य जातहर्षश्चाणक्यः राक्षसग्रहणं निश्चत्वान् आह-*

**त्यजत्यप्रियवत्प्राणान्यथा तस्यायमापदि ।**
**तथैवास्यापदि प्राणा नूनं तस्यापि न प्रियाः ।।२५।।**

*अन्वयः- यथा तस्य आपदि अयं प्राणान् अप्रियवत् त्यजति तथा एव अस्य आपदि तस्य अपि प्राणाः नूनं न प्रियाः।*

***भावार्थः*** *- येन प्रकारेण राक्षसस्य संकटकाले अयं चन्दनदासः स्वप्राणान् तृणवत् जहाति, तथैव चन्दनदासस्य संकटे समुपस्थिते राक्षसोऽपि आत्मनोऽभिलषितं जीवितम् तृणीकृत्य त्वक्ष्यति। चन्दनदासं मोचयितुम् राक्षसः अवश्यमेवात्मानमर्पयिष्यतीति भावः। अनुष्टुप् वृत्तम्।*

( नेपथ्ये कलकलः)

**चाणक्यः** - शाङ्र्गरव!

**शिष्यः** - (प्रविश्य।) उपाध्याय! आज्ञापयतु।

**चाणक्यः** - ज्ञायतां किमेतत् ?

शकटदासं वध्यमानं वध्यभूमेरादाय समपक्रान्तः सिद्धार्थकः

**शिष्यः** - (निष्क्रम्य विभाव्य पुनः प्रविश्य सम्भ्रान्तः) उपाध्याय! एष खलु शकटदासं वध्यमानं वध्यभूमेरादाय समपक्रान्तः सिद्धार्थकः।

**चाणक्यः** - (स्वगतम्) साधु सिद्धार्थक! साधु! कृतः कार्यारम्भः। (प्रकाशम्) प्रसह्य किमपक्रान्तः? (सक्रोधम्) वत्स! उच्यतां भागुरायणो यथा त्वरितमेनं संभावयेदे'ति।

**शिष्यः** - ( पुनस्तथा कृत्वा प्रविश्य सविषादम्) उपाध्याय! हा धिक् कष्टम्, अप्रक्रान्तो भागुरायणोऽपि।

**चाणक्यः** - (स्वगतम्।) व्रजतु कार्यसिद्धये। (प्रकाशम्। सक्रोधमिव) वत्स! उच्यन्तामस्माद्वचनाद् भद्रभट-पुरुषदत्त-डिङ्गरात-बलगुप्त-राजसेन-रोहिताक्ष-विजयवर्माणः शीघ्रमुपसृत्य गृह्यतां दुरात्मा भागुरायणः।

**शिष्यः** – यदाज्ञापयत्युपाध्यायः। (इति निष्क्रम्य पुनः प्रविश्य सविषादम्।) उपाध्याय! हा धिक् कष्टम् सर्वमेव तन्त्रमाकुलीभूतम्। तेऽपि खलु भद्रभटप्रभृतयः प्रथममुषस्येवापक्रान्ताः।

**चाणक्यः** - (स्वगतम्।) सर्वेषामेव शिवाः पन्थानः सन्तु। (प्रकाशम्) वत्स, अलं विषादेन। पश्य-

*अहं स्वबुद्धिबलेन सर्वम् स्वकार्यम् संपादयितुम् समर्थ इति भावः --*

अहं स्वबुद्धिबलेन सर्वं स्वकार्यं संपादयितुं समर्थ इति भावः

**ये याताः किमपि प्रधार्य हृदये पूर्वं गता एव ते**

**ये तिष्ठन्ति भवन्तु तेऽपि गमने कामं प्रकामोद्यमाः।**

**एका केवलमर्थसाधनविधौ सेनाशतेभ्योऽधिका**

**नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मा गान्मम ॥२६॥**

*अन्वयः - ये पूर्वं किमपि हृदये प्रधार्य याताः, ते गताः एव । ये तिष्ठन्ति प्रकामोद्यमाः, ते अपि गमने कामं भवन्तु तु। साधनविधौ सेनाशतेभ्यः अधिकाः नन्दोन्मूलनदृष्टवीर्यमहिमा केवलम् एका मम बुद्धिः एव मा गात्।*

*भावार्थः - ये भागुरायणप्रभृतयः किमपि स्वाभीष्टं मनसि विचिन्त्य स्वपक्षं प्रविहाय परपक्षे गताः ते पूर्वमेव गताः। ये जनाः अव तिष्ठन्ति तेऽपि अस्मत्पक्षं प्रविहाय स्वाभिलषितसिद्ध्यर्थं शत्रुपक्षे गन्तुं बहुलोत्साहवन्तः भवन्तु। तैर्विनाऽपि अस्मत्कार्यं भविष्यत्येव। सान्वयस्य नन्दस्य उन्मूलनेन सर्वलोकसमक्षं प्रकटितमहिमाशालिनी, राजतन्त्रसाधनकर्मणि सेनाशते-भ्योऽधिकसमर्था द्वितीया मे बुद्धिः केवलम् मा विहाय शत्रुन् न भजतादिति। यतः सर्वकार्यजातं तथैव साधयिष्यते। अत्र संसृष्टिरलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ।*

(उत्थाय प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा।) एष खलु दुरात्मनो भद्रभटप्रभृतीनाहरामि। (आत्मगतम्) दुरात्मन् राक्षस! क्वेदानीं यास्यसि? एषोऽहमचिरात् भवन्तम्-

*अधुना स्वबुद्धिकौशलेन नीतिविदो राक्षसस्य वशीकरणं प्रतिपादयति कौटिल्यः--*

स्वच्छन्दमेकचरमुज्ज्वलदानशक्ति-

मुत्सेकिना मदबलेन विगाहमानम्।

बुद्धया निगृह्य वृषलस्य कृते क्रियाया-

मारण्यकं गजमिव प्रगुणीकरोमि ॥२७॥

*अन्वयः - उज्ज्वलदानशक्तिम् एकचरं स्वच्छन्दम् उत्सेकिना मदबलेन विगाहमानम् आरण्यकं गजम् इव बुद्ध्या निगृह्य वृषलस्य कृते क्रियायां प्रगुणीकरोमि।*

*भावार्थः - एषोऽहं बहुधनत्यागशीलम्। स्वपक्षमध्ये प्रधानतयाऽवस्थितं निरङ्कुशं प्रगल्भमानं प्रवर्धमानेनाहङ्कारेण चन्द्रगुप्ताभिमर्षणाय विचेष्टमानं त्वां राक्षसं निरन्तरमदजलस्राविणम् यूथरहितम्। निरङ्कुशं प्रवर्धमानेन मदजलेन वनमाहिण्डमानं वनभवं गजमिव स्वबुद्धिकौशलेन नीत्या वा वशीकृत्य चन्द्रगुप्तसाचिव्यं स्थापयामि। अत्रोपमालङ्कारः। वसन्ततिलका वृत्तम्।*

(इति निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः ।

# Summarised Overview

महाकविना विशाखदत्तेन लिखितं संस्कृतनाटकं भवति मुदाराक्षसम्। वराहमिहिरात् पूर्वं पञ्चमशताब्द्यां विशाखदत्तस्य समयः स्वीकरणीयम् इति न्यायसङ्गतं प्रतिभाति। मुद्राराक्षसे सप्त अङ्काः सन्ति। राजनीतिविषयकमस्ति मुद्राराक्षसम्। 'मुद्रया गृहीतं राक्षसमधिकृत्य कृतो ग्रन्थः मुदाराक्षसम्'। नाटके प्रथमाङ्कस्य संज्ञा मुद्रालाभः। मंगलाचरणे पूर्वरङ्गे शिवस्य स्तुतिः प्राप्यते अनन्तरं सूत्रधारः नट्याः ज्ञायते यत् चन्द्रग्रहणस्य अवसरे ब्राह्मणान् भोजनार्थं आमन्त्रितवती अस्ति इति। सूत्रधारः एतत् खण्डयति, चन्द्रग्रहणं न संभवति इति। चाणक्यः 'चन्द्रग्रहणम्' इति शब्दान् एव श्रोतुं समर्थः अस्ति। नामसादृश्यात् अवगच्छति यत् सः राक्षसः मलयकेतुः सः चन्द्रगुप्तम् (चन्द्रग्रहणम्) आक्रमणं कर्तुं गच्छति। चाणक्यः अतीव क्रुद्धः भवति। राज्ञश्चन्द्रगुप्तस्य राज्यशासनकाले महामात्यः चाणक्यः घोषयति यत् सः बहुगुणयुक्तं राक्षसं चन्द्रगुप्तस्य मन्त्रीपदं स्वीकर्तुम् इच्छति, येन चन्द्रगुप्तस्य राज्यं लक्ष्मीं स्थायित्वं कर्तुं शक्यते। चाणक्यः ईदृशलक्ष्यप्राप्त्यर्थं याः योजनाः आरब्धाः तेषां विषये अपि कथयति। मुद्राराक्षसे यमपटचरः निपुणकः चाणक्यचरः। चरः चाणक्यं प्रति स्वनियोगवृत्तान्तम् उपवर्णयति। नन्दसाम्राज्ये कुसुमपुरे नन्दस्य पराजयानन्तरं राजा चन्द्रगुप्तमौर्यस्य रक्षणार्थं तस्य समीपे बहवः विश्वसनीयाः सेवकाः नियुक्ताः भवन्ति। चन्द्रगुप्तमौर्यस्य राज्यशासनकाले महामात्यः चाणक्यः बाल्यकालस्य सहपाठिनं

इन्दुशर्मनामकं ब्राह्मणं जीवसिद्धनामक्षपणकरूपं गृह्णाति तथा च जीवसिद्धक्षपणकस्य नन्दस्य विनाशात् पूर्वमपि नन्दस्य मन्त्रिभिः सह मित्रतां करोति। अपरः राक्षसस्य मित्रं शकटदासं निरीक्षितुं चाणक्यः सिद्धार्थको निक्षिप्तः। तथापि न युक्तं प्राकृतमपि रिपुमवज्ञातुम्। तृतीयः राक्षसस्य मित्रं मणिकारश्रेष्ठी चन्दनदासः राक्षसस्य परिवारः तस्य गृहे न्यासरूपेण संरक्षितवान्। पर्वतकस्य आभूषणं विश्ववसु इत्यादिभ्यः त्रयेभ्यः भ्रातृभ्यः दीयते। चाणक्यः स्वस्य गुप्तचरस्य माध्यमेन राक्षसनाम्ना मुद्रां प्राप्नोति। यस्य साहाय्येन सः राक्षसस्य निकटमित्रं शकटदासं कोडितलेखं लिखितुं प्रेरयति, तत् लेखं राक्षसनाममुद्रया सह मुद्रयति च। अस्याः मुद्रायाः कारणात् राक्षसः पराजितः भवति। भद्रपटः, पुरुषदत्तः, डिङ्गरातः, बलगुप्तः, राजसेनः, लोहिताक्षः, विजयवर्मा इत्यादयः प्रमुखाः पुरुषाः राक्षसस्य समीपं प्रेष्यन्ते। परन्तु अन्ये चन्दगुप्तेन असन्तुष्टाः भूत्वा राक्षसस्य आश्रयं गतवन्तः इति मन्यन्ते।

# Assignments

उत्तरं लिखत।

1. विशाखदत्तस्य मुद्राराक्षसे अङ्काः कति? के च ते ?
2. केषां शास्त्राणां पण्डितो विशाखदत्तः आसीत् ?
3. किं विषयमधिकृत्य मुद्राराक्षसं विलिखितम् ?
4. राक्षससृहृत् कः?
5. नन्दस्य अमात्यः कः? नन्दस्य पराजयानन्तरं को राजा बभूव?
6. चन्द्रगुप्तः कीदृशः नायकः? मुद्राराक्षसे अङ्गीरसः कः?
7. मलयकेतोः पिता कः?
8. मुद्राराक्षसे पूर्वरङ्गे कस्य स्तुतिः प्राप्यते?
9. चन्दगुप्तस्य राज्यशासनकाले महामात्यः कः आसीत् ?
10. मुद्राराक्षसे 'मुद्रालाभाख्यः' अङ्कविशेषः कः?
11. मुद्राराक्षसे यमपटचरः निपुणकः कः?
12. मुद्राराक्षसे क्षपणकजीवसिद्धिः कः?
13. राक्षसस्य परिवारः कस्य गृहे न्यासरूपेण संरक्षतिः?

लघुटिप्पणिं लिखत।

1. ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते।
2. चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः ।

3. कुटिलमतिः कौटिल्यः।
4. न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ।
5. कायस्थ इति लध्वीमात्रा ।
6. श्रोत्रियाक्षराणि प्रयत्नलिखितान्यपि नियतमस्फुटानि भवन्ति ।
7. न युक्तं प्राकृतमपि रिपुमवज्ञातुम् ।
8. अत्यादरः शङ्कनीयः ।
9. अनुचित उपचारो हृदयस्य परिभवादपि दुःखमुत्पादयति ।
10. कीदृशस्तृणानामग्निना सह विरोधः ।
11. शिरसि भयमतिदूरे तत्प्रतिकारः ।
12. दिष्ट्या मित्रकार्येण मे विनाशो न पुरुषदोषेण ।
13. प्रज्ञ विक्रमभक्तयः समुदिता येषां गुणा भूतये ।
14. ते भृत्याः नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च ।
15. फलेन संवादितमस्य विकत्थनम् ।
16. नहि सर्वः सर्वं जानाति ।

### श्लोकं व्याख्यात

1. गुणवत्युपायनिलये स्थितिहेतोः साधिके त्रिवर्गस्य।
   मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि ॥५॥
2. आस्वादितद्विरदशोणितशोणशोभां
   सन्ध्यारुणामिव कलां शशलाञ्छनस्य।
   जृम्भाविदारितमुखस्य मुखात्स्फुरन्तीं
   को हर्तुमिच्छति हरेःपरिभूय दंष्ट्राम् ॥८॥
3. नन्दकुलकालभुजगीं कोपानलबहुलनीलधूमलताम्।
   अद्यापि बध्यमानां वध्यः को नेच्छति शिखां मे ? ॥९॥
4. स्वयमाहृत्य भुञ्जाना बलिनोपि स्वभावतः।
   गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥१६॥
5. प्रणमत यमस्य चरणौ किं कार्य दैवतैरन्यैः।
   एष खल्वन्यभक्तानां हरति जीवं परिस्फुरन्तम् ॥१७॥
6. पुरुषस्य जीवितव्यं विषमाद् भवति भक्तिगृहीतात्।
   मारयति सर्वलोकं यस्तेन यमेन जीवामः ॥१८॥
7. चाणक्येऽस्मिन्नकरुणे सहसा शब्दायितस्यापि जनस्य।
   निर्दोषस्यापि शङ्का किम्पुनर्मम जातदोषस्य ।।२१।।
8. उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम् ?
   हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ।।२२।।
9. सुलभेष्वर्थलाभेषु परसंवेदने जने ।
   क इदं दुष्करं कुर्यादिदानीं शिबिना विना ।।२४।।

**निबन्धात्मकप्रश्नौ ।**

1. दशरूपकेषु मुद्राराक्षसस्य स्थानम्।
2. प्रथमाङ्कस्य कथासारं स्ववाक्यैः लिखत।

# Suggested Readings


1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum


# References


1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वारणासि।
2. महाकवि-विशाखदत्तप्रणीतं मुद्राराक्षसम्, पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.
5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.


## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# मुद्राराक्षसे द्वितीयः अङ्कः।

## Learning Outcomes

- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् आर्जयति ।
- मुद्राराक्षसनाटकपठनद्वारा राजनैतिकनाटकानां सविशेषज्ञानम्।
- विशाखदत्तपरिचयः।
- संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यम्।
- चाणक्यस्य कूटनीतिनैपुण्यम्।
- श्लोकाना पठनेन आशयावगतिः।

## Background

विशाखदत्तः अर्थशास्त्र-शुक्रनीति-दर्शनशास्त्र-ज्योतिषशास्त्रेषु अतीवं पण्डितः आसीत्। विशाखदत्तप्रणीते मुद्राराक्षसे चाणक्यः नन्दसाम्राज्ये नन्दस्य निग्रहं कर्तुं चन्द्रगुप्तमौर्यम् उपकरोति। नन्दस्य अमात्यः एव राक्षसः। चन्द्रगुप्तः पर्वतकस्य सहायेन नन्दराज्यं जयति। कौटिल्यप्रयुक्तेन विषकन्याप्रयोगेण पर्वतकः मृत्युलाभमकरोत्। तस्य पुत्रः मलयकेतुः। नन्दस्य अमात्यः राक्षसः च मगधं जेतुं योजनां कुरुते। परं चाणक्यः मलयकेतुं जयति। नन्दस्य पराजयानन्तरं चन्द्रगुप्तमौर्यः राजा बभूव। चन्द्रगुप्तस्य मंन्त्री चाणक्यः। चन्द्रगुप्तः धीरोदात्तः नायकः। विशाखदत्तः राजवंशसम्भवात् राजनीतिषु पक्षपातो दृश्यते। संस्कृतस्य निखिलेभ्यः नाटककारेभ्यः भिन्नोऽयं विशाखदत्तो नाम नाट्यकारः यः कूटनीतिं, राजनीतिं च आश्रित्य मुद्राराक्षसं निर्मितवान्। नाटकेऽस्मिन् मुद्राराक्षसे द्वितीयाङ्कस्य संज्ञा राक्षसविचारः।

## Keywords

SGOU

आहितुण्डिकः, कञ्चुकी, सुगाङ्गः, विषकन्याप्रयोगः, चन्द्रलेखा, चन्द्रगुप्तस्य वधार्थं राक्षसस्य प्रतिज्ञा, कुसुमपुरवृत्तान्तम्, पर्वतेश्वरस्य भ्राता वैरोचकः, चाणक्यस्य कूटनीतिः, राक्षसस्य त्रीणि मित्राणि, राक्षसमुद्रा, मलयकेतोः पलायनम्।

# Discussion

**द्वितीयोऽङ्कः**

(ततः प्रविशति आहितुण्डिकः।)

*राक्षससमीपे स्वकार्यं साधयितुं चाणक्येन प्रयुक्तः, छद्मना आहितुण्डिकवेषधारी विराधगुप्तनामा पुरुषः स्वकीयस्य दुरवगाह-राजनीतिपरतया तस्यातिक्लेशकरत्वं दर्शयन्नाह---जानन्तीति।*

**आहितुण्डिकः-**

**जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति ।**
**ये मन्त्ररक्षणपरास्ते सर्पनराधिपावुपचरन्ति ।।१।।**

*अन्वयः- ये तन्त्रयुक्तिं यथास्थितं जानन्ति। मण्डलं च अभिलिखन्ति, मन्त्र-णपराः ते सर्पनराधिपो उपचरन्ति।*

*भावार्थः – ये जनाः सम्यक् विषौधधिप्रयोगं माहेन्द्रादिदैवतां यथायथं मण्डलेखनम्, गारुडादिमन्त्रसंरक्षणं च जानन्ति ते सर्पवशीकरण-व्यवहाराभिज्ञा सन्तः तमुपजीव्य जीवितुं शक्नुवन्ति। राजपक्षे ये स्वराष्ट्रचिन्तने न्यायानुसरणं राष्ट्रमण्डलरक्षार्थं विविच्य सन्धिविग्रहनिर्देशादिना पत्राचारं किं च राष्ट्ररक्षणार्थं सम्यङ् मन्त्रनिगूहनं च जानन्ति ते एव राजनीतिमनुसृत्य राजानं संसेव्य ततो जीवितुमर्हन्ति। अत्र तुल्ययोगितालङ्कारः। यमगाथा वृत्तम्।*

(आकाशे) आर्य! किं भणसि- कस्त्वमिति? आर्य! अहं खलु आहितुण्डिको जीर्णविषो नाम। किं भणसि- 'अहमपि अहिना खेलितुमिच्छामि' इति? अथ कतरां पुनरार्यो वृत्तिमुपजीवति? किं भणसि- 'राजकुलसेवक' इति। ननु खेलत्येव अर्थोऽहिना। किं भणसि कथमिति? 'अमन्त्रौषधिकुशलो

आहितुण्डिकः
राक्षसचरः

व्यालग्राही अगृहीताङ्कुशो मत्तगजावरोही, लब्धाधिकारो जितकाशी राजसेवक' इत्येते त्रयोऽवश्यं विनाशमनुभवन्ति। कथं दृष्टमात्रोऽतिक्रान्त एषः। आर्य किं त्वं भणसि-- 'किमेतेषु पेटकसमुद्गकेषु' इति। आर्य, आत्मजीविका संपादकाः सर्पाः। किं भणसि-- 'प्रेक्षितुमिच्छामि'ति? प्रसीदत्वार्यः। अस्थानं खलु एतत्। तद्यदि ते कौतूहलं तदेहि एतस्मिन्नावासे दर्शयामि। किं भणसि-- 'इदं खलु भर्तुरमात्यराक्षसस्य गृहम्। नास्तीह अस्मादृशानामिह प्रवेशः' इति। तेन हि गच्छत्वार्यः। कथमेषोऽपि अतिक्रान्तः?

(दिशोऽवलोक्य संस्कृतमाश्रित्य स्वगतम्) अहो! आश्चर्यम्। मति-परिगृहीतं चन्द्रगुप्तमवलोक्य विफलमिव राक्षसप्रयत्नमवगच्छामि। राक्षसमतिपरिगृहीतञ्च मलयकेतुमवलोक्य चलितमिवाधिराज्याच्चन्द्र-गुप्तमवगच्छामि। तथा हि-

*इदानीमुभयोर्बुद्धिकौशलं परस्परविमर्दकत्वमुपदर्शयन्नाह---*

कौटिल्यधीरज्जुनि-
बद्धमूर्ति मौर्यनृपस्य
लक्ष्मी स्थिरां मन्ये

**कौटिल्यधीरज्जुनिबद्धमूर्ति मन्ये स्थिरां मौर्यकुलस्य लक्ष्मीम्।**
**उपायहस्तैरपि राक्षसेन विकृष्यमाणामिव लक्षयामि ॥२॥**

*अन्वयः - कौटिल्यधीरज्जुनिबद्धमूर्ति मौर्यनृपस्य लक्ष्मीं स्थिरां मन्ये, अपि राक्षसेन उपायहस्तैः निकृष्यमाणाम् इव लक्ष्यामि।*

*भावार्थः - एकतः चन्द्रगुप्तश्रियं चाणक्यस्य बुद्धिरज्वा दृढतरबन्धनेन निबद्धामत एव निश्चलां तर्कयामि। अपरतः राक्षसेन सामादिभिः उपायभुजैः तां रज्वा बद्धामपि आकृष्यमाणामिव संभावयामि यतो रज्वा बद्धमपि वस्तु हस्तेनाकृतष्य एव। रज्जुबद्धमपि वस्तु हस्तेनाकृष्यते इति लोकसिद्धं संभावनम्। श्लोके बुद्धौ रज्वारोपेण, उपायेषु च करारोपेण अभेदारोपाद्रूपकद्वयम्। तेन मौर्यकुललक्ष्मीबन्धनस्य राक्षसकर्तृकाकर्षणस्य च संभावनाप्रतीत्योत्प्रेक्षाद्वयम्। अनयोरङ्गाङ्गिभावेन संकरः। तत्र रूपकलक्षणम् - 'रूपकं रूपितारोपे विषये निरपह्नवे' इति। उत्प्रेक्षा लक्षणम् 'भवेत् संभावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति। उपजातिवृत्तम्।*

तदेवमनयोः सुनयशालिनोः सचिवयोर्विरोधे संशयितेव नन्दकुल-लक्ष्मीर्लक्ष्यते। कुतः? –

*एवं राजलक्ष्म्याः संदिग्धतां वर्णयन्नाह--*

विरुद्धयोः
मन्त्रिमुख्ययोः
अन्तरे इह श्रीः
अनिश्चयात् स्थीयते

**विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे।**
**अनिश्चयाद् गजवशयेव भीतया गतागतैर्भृशमिव खिद्यते श्रिया ॥३॥**

*अन्वयः - महावने वनराजयोः इव भृशं विरुद्धयोः मन्त्रिमुख्ययोः अन्तरे इह अनिश्चयात् भीतया गजवशया इव श्रिया गतागतैः ध्रुवं खिद्यते इव।*

*भावार्थः - यथा महारण्ये आरण्यकहस्तिनोः मिथो जयार्थं युद्ध्यतोः जयपराजययोः निश्चयाभावाद् उभयोर्मध्यगतया करिण्या भीतया संस्थीयते। एवं परस्परजयार्थं युध्यतोः मन्त्रिमुख्ययोः चाणक्यराक्षसयोर्मध्ये स्थितया राजलक्ष्म्या अपि कदाचिन्मौर्यपक्षे गतिः कदाचिच्च ततो मलयकेतुपक्षे आगतिः एवं गतागतैः संशयितयैव भीतया स्थीयते ।*

*मन्त्रिणोर्वनगजयोः सादृश्यकथनात्, श्रियाश्च करिणीसाम्यकथनात् उपमाद्वयम्। तेन च राजलक्ष्म्याः खेदसंभावनावबोधादुत्प्रेक्षा। तदनयोः संसृष्टिः। रुचिरावृत्तम् 'जभौ सजौ गितिरुचिरा चतुर्ग्रहैः' इति तल्लक्षणात्।*

तद्यावत् अहममात्यराक्षसं पश्यामि। (इति परिक्रम्य स्थितः।)

(ततः प्रविशत्यासनस्थः स्वभवनगतः
पुरुषेणानुगम्यमानः सचिन्तो राक्षसः।)

*नयपराक्रमशालिनः स्वस्वामिनोः दुर्दैवेन विनाशं स्मरन् तत्प्रतीकाराकुलचेताः राक्षसः अनुशोचन्नाह--*

राक्षसः-- (ऊर्ध्वमवलोक्य सबाष्पम् ) कष्टं भोः ! कष्टम् -

इयं चित्रकर्मरचना
भित्तिं विना वर्तते

**वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां**
**नन्दानां विपुले कुलेऽकरुणया नीते नियत्या क्षयम् ।**
**चिन्ताऽऽवेशसमाकुलेन मनसा रात्रिन्दिवं जाग्रतः**
**सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्तते ।।४।।**

*अन्वयः - वृष्णीनाम् इव नीतिविक्रमगुणव्यापारशान्तद्विषां नन्दानां विपुले कुले अकरुणया नियत्या क्षयं नीते चिन्तावेशसमाकुलेन मनसा रात्रिन्दिवं जाग्रतः मम सा एव इयं चित्रकर्मरचना भित्तिं विना वर्तते॥*

*भावार्थः - वृष्णीनाम् इव नीतिविक्रमगुणव्यापारैः स्वशत्रून् वशीकृत्य प्रशान्तोपद्रवाणां नवनन्दानां विशालकुले दुर्भाग्यतया प्रणाशे जाते चिन्तावेशसमुद्विग्नेन अन्तःकरणेन अहर्निशं विगतनिद्रस्य संकल्पयतः विकल्पयतश्च ममायं आश्चर्यकरः समस्तव्यापारः आश्रयाभावात् यथा*

*चित्रकर्मरचना भित्तिं विना निराधारा भवति तथैव वर्तते किञ्चित् कर्तुमसमर्थोऽहं हृदयप्रदेशे एव अवसीदामीत्यर्थः। अत्र विभावनालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

**अथवा –**

*स्वामिभक्त्युत्कर्षार्थं स्वनीतिप्रयोगं वर्णयन्नाह--*

आत्मप्रतिष्ठार्थिना स्वर्गगतः अपि देवः शात्रववधेन आराधितः स्यात्

**नेदं विस्मृतभक्तिना न विषयव्यापारमूढात्मना।**
**प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना।**
**अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते**
**देवः स्वर्गगतोऽपि शात्रववधेनाराधितः स्यादिति ॥५॥**

*अन्वयः- परदास्यम् एत्य नीतौ मनः अत्यर्थं निपुणं दीयते, इदं विस्तृतभक्तिना न विषयव्यासङ्गमूढात्मना, न च प्राणच्युतिभीरुणा मया न आत्मप्रतिष्ठार्थिना स्वर्गगतः अपि देवः शात्रववधेन आराधितः स्यात् इति।*

*भावार्थः – मया नन्दभक्तिं विस्मृत्य स्वार्थबुद्ध्या शत्रुपराजयाय नीतौ निपुणं मनो दीयत एतन्न शत्रुपराजयात् बहुसुखसाधनव्यापारान् लप्स्ये इति मनसि कृत्वा तत्र मनो दीयते इत्यपि न प्राणप्रच्छ्रुतिभीरुणा मयैतत्क्रियते इत्यपि न, किञ्च आत्मप्रतिष्ठाप्राप्तिमुद्दिश्यैव तत् क्रियते इत्यपि न किं तु शत्रुपराजयाय कायवाङ्मनोयोगपूर्वकं यदत्र राजनीतौ मलयकेतोः वशवर्तितामङ्गीकृत्य यन्मनो दीयते - तत् स्वर्गगतो मे देवो नन्दः मया कृतेन शत्रुपराजयकर्मणा परितुष्यत्विति उद्देश्येन क्रियते।*

(आकाशमवलोकयन् सास्त्रम्) भगवति कमलालये ! भृशम् अगुणज्ञाऽसि। कुतः ?

*लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात्। अन्तिकेऽपि स्थिता पत्युः छलेनान्यं निरीक्षते इति न्यायसरणिमनुस्मृत्य लक्ष्मीदोषं वर्णयन्नाह राक्षसः--*

आनन्दहेतुम् अपि देवं नन्दम् अपास्य वैरिणि मौर्यपुत्रे किं सक्ता असि?

**आनन्दहेतुमपि देवमपास्य नन्दं**
**सक्ताऽसि किं कथय वैरिणि मौर्यपुत्रे ?**
**दानाम्बुराजिरिव गन्धगजस्य नाशे**
**तत्रैव किं न चपले ! प्रलयं गताऽसि ?॥६॥**

*अन्वयः - चपले ! कथय, आनन्दहेतुम् अपि देवं नन्दम् अपास्य वैरिणि मौर्यपुत्रे किं सक्ता असि? गन्धगजस्य नाशे दानाम्बुराजिः इव तत्र एव किं प्रलयं गता असि ?*

***भावार्थः-*** *अयि चपले! सर्वविधभोगसुखप्रदं महाराजं नन्दम् अपास्य तच्छत्रौ चन्द्रगुप्तमौर्ये किमर्थं प्रणयपरायणा जाताऽसि। गन्धहस्तिनि तदीयमदधारेव तत्रैव नष्टे नन्दे तेनैव सह कथन्न मृतासि।*

*तादृशं गुणज्ञं पतिं विहाय यदन्यस्मिन् अगुणज्ञे पुरुषे अनुरक्तासि तदत्यन्तमनुचितमिति भावः। यदि अचेतना मदधारा स्वाश्रयभूते गन्धहस्तिनि मृते तत्रैव लीयते, तदा हे लक्ष्मि ! त्वं तु सचेतना, त्वया तु स्वाश्रये भर्तरि नन्दे मृते मरणमेवोचितम्। अत्रोपमापरिसंख्ययोरल-ङ्कारयोः संकरः। वसन्ततिलकावृत्तम् 'उक्ता वसन्ततिलका तभजाजगौ गः' इति तल्लक्षणम्।*

अपि च अनभिजाते !

*राक्षसः नन्दराजपरित्यागेन अधममौर्यकुलसमाश्रयणेन च श्रियोऽविनी-तत्वं संबोधयति--*

**पृथिव्यां कि दग्धाः प्रथितकुलजा भूमिपतयः**
**पतिं पापे मौर्यं यदसि कुलहीनं वृतवती ?**
**प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला**
**पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥७॥**

पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानवि-मुखी

*अन्वयः - हे पापे ! पृथिव्यां प्रथितकुलजाः भूमिपतयः दग्धाः किम्, यत् त्वं कुलहीनं मौर्यं पतिं वृतवती असि? वा काशप्रभवकुसुमप्रान्तचपला पुरन्ध्रीणां प्रज्ञा प्रकृत्या पुरुषगुणविज्ञानविमुखी।*

***भावार्थः*** *- अपि च कुलपांसिनि ! अयि पापाचारे लक्ष्मि ! महत्यामस्यां भुवि प्रसिद्धराजवंशेषु जाताः श्रेष्ठनृपतयः भस्मीभूताः किम्। यस्मात् कारणात् अधमं चन्द्रगुप्तं स्वामिनं वृतवत्यसि। अथवात्र ते न कोऽपि दोषः। स्त्रीणामेष स्वभावः यत् तासां काशप्रभवकुसुमप्रान्तचपला बुद्धिः प्रकृत्या पुरुषाणां गुणविज्ञाने नितरां निरवेक्षा भवति।*

अपि च। अविनीते ! तदहमाश्रयोन्मूलनेनैव त्वामकामां करोमि। (विचिन्त्य) मया तावत् सुहृत्तमस्य चन्दनदासस्य गृहे गृहजनं निक्षिप्य नगरान्निर्गच्छता न्याय्यमनुष्ठितम्। किं कारणमिति? कुसुमपुराभियोगं

प्रति अनुदासीनो राक्षस इति, तत्रस्थानामस्माभिः सह एककार्याणां देवपादोपजीविनां नोद्यमः शिथिलीभविष्यतीति। चन्द्रगुप्तशरीरमभिद्रोग्धुमस्मत्प्रयुक्तानां तीक्ष्णरसदायिनामुपसङ्ग्रहार्थं परकृत्योपजापार्थञ्च महता कोशसञ्चयेन स्थापितः शकटदासः। प्रतिक्षणमरातिवृत्तान्तोपलब्धये तत्संहतिभेदाय च व्यापारिताः सुहृदो जीवसिद्धिप्रभृतयस्तत्। किमत्र बहुना ?

*इदानीं दृढसंकल्पेन चन्द्रगुप्तमुन्मूलयितुं दैवानुकूलतां वाञ्छन्नाह राक्षसः--*

चन्द्रगुप्तस्य वधार्थं राक्षसस्य प्रतिज्ञा

**इष्टात्मजः सपदि सान्वय एव देवः**
**शार्दूलपोतमिव यं परिपुष्य नष्टः।**
**तस्यैव बुद्धिविशिखेन भिनद्मि मर्म**
**वर्मीभवेद्यदि न दैवमदृश्यमानम् ॥८॥**

*अन्वयः- इष्टात्मजः देवः यं शार्दूलपोतम् इव परिपोष्य सपदि सान्वयः नष्टः तस्य एव मर्म बुद्धिविशिखेन भिनद्मि, यदि अदृश्यरूपं दैवम् एव न वर्मीभवेत्।*

*भावार्थः - सुतवत्सलो देवो नन्दनृपतिः यं चन्द्रगुप्तं सिंहशावकमिव परिपाल्य सान्वय एव प्रणष्टः। अहं दारुणकूटनीतिव्यापारेण तस्यैव दुराचारिणो मौर्यस्य मर्मस्थानीयं अमात्यकोशादिजातं सर्वं भिनद्मि। हन्त! यदि अस्मिन् कार्ये अदृष्टतया वर्तमानं मौर्यस्य भाग्यं तस्य रक्षकं न भवेत्।*

(ततः प्रविशति कञ्चुकी)

*जरायां लोभस्य धर्मजयेच्छादृष्टान्तप्रसङ्गेन चाणक्यनीतिकौशलेन कुसुमपुरे मौर्यप्रतिष्ठापितायाः राजलक्ष्म्याः जयाय विशिष्टनीतिसमन्वितस्य राक्षसस्य पराभवं प्रकाशमान आह कञ्चुकी--*

**कञ्चुकी -**

**कामं नन्दमिव प्रमथ्य जरया चाणक्यनीत्या यथा**
**धर्मो मौर्य इव, क्रमेण नगरे नीतः प्रतिष्ठां मयि ।**
**तं सम्प्रत्युपचीयमानमपि मे लब्धान्तरः सेवया**
**लोभो राक्षसवज्जयाय यतते, जेतुं न शक्नोति च ॥९॥**

*अन्वयः- यथा चाणक्यनीत्या जरया नन्दम् इव कामं प्रमथ्य क्रमेण नगरे मौर्यः इव मयि धर्मः प्रतिष्ठां नीतः, सम्प्रति सेवया उपचीयमानं तम् अनु लब्धान्तरः राक्षसवत् मे लोभः जयाय यतते, च जेतुं न शक्नोति॥*

*भावार्थः - यथा चाणक्यकूटनीत्या नन्दं परिभूय समस्तं राजमण्डलं वशीकृत्य मौर्यश्चन्द्रगुप्तः कुसुमपुरराज्ये प्रतिष्ठापितः तथैव जरया मदीयं विषयाभिनिवेशं संम्मर्द्य तं मौर्यमिव मयि धर्मः प्रतिष्ठापितः संप्रति सेवया प्राप्तावकाशः राक्षसः यथा उपचीयमानं तं चन्द्रगुप्तं जेतुं यतते किन्तु जेतुं न शक्नोति, तथैव उपचीयमानं धर्मं मदीयो लोभः जेतुं यतते किन्तु जेतुं न शक्नोति।*

*अत्र 'मौर्य इव' 'राक्षसवत्' इति सादृश्यप्रतिपादनादुपमा। तथा प्रस्तुते कञ्चुकिलोभे अप्रस्तुतभटव्यवहारस्य जयेच्छादिकस्य समारोपणात् समासोक्तिश्च। शार्दूलविक्रीडितं छन्दः।*

(दृष्ट्वा) अयममात्यराक्षसः। (परिक्रम्य उपसृत्य च) इदममात्यराक्षसस्य गृहं प्रविशामि। (प्रविश्यावलोक्य च) अमात्य ! स्वस्ति भवते ।

मलयकेतोः कञ्चुकी भवति जाजलिः

राक्षसः- आर्य जाजले! अभिवादये। प्रियंवदक ! आसनम् अत्रभवत उपनय।

पुरुषः - इदमासनम्, उपविशत्वार्यः ।

कञ्चुकी मलयकेतुना प्रेषितानि आभरणानि राक्षसाय आनयति

कञ्चुकी - (नाट्येनोपविश्य) अमात्य! कुमारो मलयकेतुरमात्यं विज्ञापयति-- 'चिरात्प्रभृत्यार्यः परित्यक्तोचितशरीरसंस्कार इति पीड्यते मे हृदयम्। यद्यपि स्वामिगुणाः सहसा न शक्यन्ते विस्मर्त्तुम्, तथापि मद्विज्ञापनां मानयितुमर्हत्यार्यैः'। (इत्याभरणानि दर्शयित्वा) अमात्य! इमान्याभरणानि कुमारेण स्वशरीरादवतार्य प्रेषितानि, धारयितुमर्हत्यार्यः।

राक्षसः - आर्य जाजले! विज्ञाप्यतां मद्वचनात् कुमारः-- विस्मृता मया स्वामिगुणा भवद्गुणपक्षपातेन। किन्तु—

*राक्षसः मलयकेतुकृतेन बहुमानेन तदुपकर्तुं शत्रुसमुच्छेदपूर्वकं सिंहासने प्रतिष्ठापयितुं प्रतिजानान आह--*

निर्वीर्यैः एभिः अङ्गैः प्रतनुम् अपि संस्कारवचनां न वहामि।

**न तावन्निर्वोर्यैः परपरिभवाक्रान्तिकृपणै-**
**र्वहाम्यङ्गैरेभिः प्रतनुमपि संस्काररचनाम् ।**
**न यावन्निःशेषक्षपितरिपुचक्रम्य निहितं**
**सुगाङ्गे हेमाङ्कं नृवर! तव सिहासनमिदम् ॥१०॥**

*अन्वयः - हे नृवर ! यावत् निःशेषक्षपितरिपुचक्रस्य तव हेमाङ्कम् इदं सिहासनं सुगाङ्गे न निहितं तावत् परपरिभवाक्रान्तिकृपणैः निर्वीर्यैः एभिः अङ्गैः प्रतनुम् अपि संस्कारवचनां न वहामि।*

*भावार्थः - हे नृवर ! शत्रुकृतावमानदीनैः निरस्ततेजस्कैः एभिः अङ्गैः स्वल्पमपि आभूषणविन्यासं तावत् न धारयिष्यामि यावत् सर्वात्मना तव शत्रुसमूहं प्रणाश्य तवेदं सुवर्णसिंहासनं सुगाङ्गनामके राजप्रासादे न स्थापयामि । अत्र परिकरालङ्कारः। शिखरिणी वृत्तम् ।*

**कञ्चुकी-** अमात्य! त्वयि नेतरि सुलभमेतत् कुमारस्य, तत् प्रतिमान्यतां कुमारस्य प्रथमः प्रणयः।

**राक्षसः -** आर्य ! कुमार इवानतिक्रमणीयवचनो भवानपि, तदनुष्ठीयते

कुमारस्याज्ञा ।

**कञ्चुकी -** (नाट्येन भूषणानि परिधाप्य) स्वस्ति भवते, साधयाम्यहम्।

**राक्षसः -** आर्य ! अभिवादये । (कञ्चुकी निष्क्रान्तः) प्रियंवदंक ! जायतां कोऽयमस्मद्दर्शनार्थी द्वारि तिष्ठति ?

**प्रियंवदकः -** (परिक्रम्याहितुण्डिकं दृष्ट्वा) यदार्य आज्ञापयतीति । ननु आर्य ! कस्त्वम् ?

**आहितुण्डिकः -** भद्र! अहं खल्वाहितुण्डिको जीर्णविषो नाम। इच्छाम्यमात्यराक्षसस्य पुरतः सर्वैः खेलितुम्।

**प्रियंवदकः -** (राक्षसमुपसृत्य )तिष्ठ, यावदमात्यस्य निवेदयामि। आर्य ! एष खलु सर्पोपजीवी इच्छति सर्पैरमात्यस्य पुरतः खेलितुम्।

**राक्षसः -** (वामाक्षिस्पन्दनं सूचयित्वा आत्मगतम्) कथं प्रथममेव सर्पदर्शनम् ? (प्रकाशम्) प्रियंवदक! न नः कुतूहलमस्ति सर्पदर्शने, तत् परितोष्य विसर्जयैनम्।

**प्रियंवदकः-** (परिक्रम्याहितुण्डिकमुपसृत्य) यदार्याऽऽज्ञापयति । भद्र! एष खलु ते अमात्योऽदर्शनेन प्रसादं करोति, न न पुनर्दर्शनेन ।

आहितुण्डिकः विराधगुप्तनामस्य वेषधारी राक्षसस्य गुप्तचरः

**आहितुण्डिकः -** (पत्रमर्पयति)। भद्र ! विज्ञापय मम वचनेनामात्यं-- 'न केवलमहं सर्वोपजीवी, प्राकृतकविः खल्वहम्, तस्माद् यदि मे दर्शनेनामात्यः प्रसादं न करोति, तदा एतदपि पत्रकं वाचयितुं प्रसीदतु'।

**प्रियंवदकः** - (पत्रं गृहीत्वा राक्षसमुपसृत्य) अमात्य! एष खलु अहितुण्डिको विज्ञापयति-- 'न केवलमहं सर्वोपजीवी, प्राकृतकविः खल्वहम्, तस्माद् यदि मे दर्शनेनामात्यः प्रसादं न करोति, तदा एतदपि पत्रकं वाचयितुं प्रसीदतु' इति ।

**राक्षसः** - (पत्रं गृहीत्वा वाचयति)

*भवन्नियुक्तः प्रणिधिरहम्। न भुजगोपजीवी। अतः शुभदर्शनाय अनुजानीहि इत्येवं अप्रस्तुतार्थलेखनमुखेन प्रतिपादयितुमाह--*

**पीत्वा निरवशेषं कुसुमरसमात्मनः कुशलतया ।**
**यदुद्गिरति भ्रमरस्तदन्येषां करोति कार्यम् ॥११॥**

*अन्वयः - भ्रमरः आत्मनः कुशलतया निरवशेषं कुसुमरसं पीत्वा यत् उद्गिरति तत् अन्येषां कार्यं करोति।*

*भावार्थः - यथा भ्रमरः इतस्ततो गत्वा स्वनैपुण्येन पुष्पमकरन्दं पीत्वा यद् मधु उद्गिरति तद् देवपित्र्यादि सम्बन्धि कार्यं संपादयति तथा भवन्नियुक्तो दूतोऽहं स्वबुद्धिदक्षतया समरकुसुमपुरवृत्तान्तं ज्ञात्वा यद् वक्ष्यामि तत् स्वामिपादानां कार्यं संपादयामि। अत्राप्रस्तुतात् भ्रमरस्य स्वकौशलेन कुसुमरसपाननिमित्तकमधूद्गिरणात् प्रस्तुतस्य स्वनैपुण्येन कुसुमपुर-वृत्तान्तवेदिनः विराधगुप्तस्योद्गिरणप्रतीतेः अप्रस्तुतप्रशंसालङ्कारः। आर्यावृत्तम् च ।*

कुसुमपुरवृत्तान्तं सः जानाति

(आत्मगतम्) अये ! कुसुमपुरवृत्तान्तज्ञोऽहं भवत्प्रणिधिश्चेति गाथार्थः। आः! कार्यव्यग्रत्वान्मनसः, प्रभूतत्वाच्च प्रणिधीनां विस्मृतमः इदानीं स्मृतिरुपलब्धा। व्यक्तम्, आहितुण्डिकच्छद्मना कुसुमपुरादागतेन विराधगुप्तेनानेन भवितव्यम्। (प्रकाशम्) प्रियंवदक! प्रवेशयैनम्। सुकविरेषः। श्रोतव्यमस्मात् सुभाषितम् ।

**प्रियंवदकः** - (आहितुण्डिकमुपसृत्य) यदार्य आज्ञापयतीति। उपसर्पत्वार्यः।

**आहितुण्डिकः** - (नाट्येनोपसृत्यावलोक्य च संस्कृतमाश्रित्य स्वगतम्) अये! अयममात्यराक्षसस्तिष्ठति। स एषः –

*चन्द्रगुप्तमौर्ये समाश्रितापि राजलक्ष्मीः राक्षसप्रयत्नतः संशयितेव भयादद्यापि तं सम्पूर्णाङ्गतया नाश्रयतीति दर्शयन्नाह--*

**वामां बाहुलतां निवेश्य शिथिलं कण्ठे निवृत्तानना**
**स्कन्धे दक्षिणया बलान्निहितयाऽप्यङ्के पतन्त्या मुहुः ।**

**गाढालिङ्गनसङ्गपीडितसुखं यस्योद्यमाशङ्किनी**
**मौर्यस्योरसि नाधुनाऽपि कुरुते वामेतरं श्रीः स्तनम् ॥१२॥**

*अन्वयः - यस्य उद्यमाशङ्किनी श्रीः वामां बाहुलतां कण्ठे शिथिलं निवेश्य विवृताननना बलात् स्कन्धे निहितया अपि मुहुः अङ्के पतन्त्या दक्षिणया गाढालिङ्गनसङ्गपीडितमुखं वामेतरं स्तनम् अधुना अपि मौर्यस्य उरसि न कुरुते।*

*भावार्थः - महोद्यमशीलोऽयममात्यराक्षसः स एव यस्योद्योगभयाद्भीतेयं राज्यलक्ष्मीः चन्द्रगुप्तस्य कण्डे स्ववामां बाहुलतां शिथिलं समासज्यापि चकितचकिता परावृत्तमुखी सती प्रसह्य स्कन्धे प्रत्यर्पिततया क्रीडे पतन्त्या दक्षिणया बाहुलतया पीडितम् दृढतराश्लेषसङ्गपीडितचूचुकं दक्षिणं स्तनं चन्द्रगुप्तस्य वक्षसि अधुनापि न स्थापयति। उभाभ्यां बाहुभ्यां राक्षसोद्यमाशङ्किनी लक्ष्मीः चन्द्रगुप्तमाश्लिष्य सुखेन न स्वपितीति भावः।*

*अत्र मौर्ये नातिस्थिरायां प्रत्युत राक्षसप्रयत्नभयेन पुनश्चलितायां राजलक्ष्म्यां प्रस्तुतायाम् अप्रस्तुतायाः नायकभीतायाः कस्याश्चिन्नायिकायाः भयचकितत्वगाढालिङ्गनत्वादि कार्यारोपात् समासोक्तिः। शार्दूलविक्रीडितं छन्दः॥*

(प्रकाशम्) जयतु जयत्वमात्यः ।

**राक्षसः**- (विलोक्य) (इत्यर्द्धोक्ते विरूढस्मृतिः) प्रियंवदक! भुजङ्गैः इदानीं विनोदयामः, तद् विश्रम्यतां परिजनेन, त्वमपि स्वमधिकारमशून्यं कुरु ।

**प्रियंवदकः** - यदमात्य आज्ञापयतीति ।

(सपरिवारो निष्क्रान्तः)

**राक्षसः**- सखे! विराधगुप्त ! इदमासनमास्यताम्।

**विराधगुप्तः**- यदाज्ञापयत्यमात्य इति। (नाट्येनोपविष्टः।)

**राक्षसः**- (सखेदं निर्वर्ण्य ) अहो! देवपादपद्मोपजीविनो जनस्येयमवस्था? (इति रोदिति ।)

**विराधगुप्तः** – अमात्य ! अलं शोकेन, नातिचिरादमात्योऽस्मान् नूनं पुरातनीमवस्थामारोपयिष्यति ।

**राक्षसः** - सखे! विराधगुप्त ! वर्णय इदानीं कुसुमपुरवृत्तान्तम् ।

**विराधगुप्तः** - अमात्य ! विस्तीर्णः कुसुमपुरवृत्तान्तः, तदाज्ञापय - कुतः प्रभृति कथयामि ?

**राक्षसः** - सखे! चन्द्रगुप्तस्य तावत् नगरप्रवेशात्प्रभृति अस्मत्प्रयुक्तैस्तीक्ष्णरसदायिभिः किमनुष्ठितमित्यादितः श्रोतुमिच्छामि ।

विराधगुप्तः कुसुमपुरस्य कथां कथयति

**विराधगुप्तः** - एष कथयामि । अस्ति तावत् शक-यवन-किरात-काम्बोज-पारसीक-बाह्लीकप्रभृतिभिश्चाणक्यमतिगृहीतैश्चन्द्रगुप्त-पर्वतेश्वरबलैरुदधिभिरिव, प्रलयकालचलितसलिलैः समन्तादुपरुद्धं कुसुमपुरम् ।

**राक्षसः**- (शस्त्रमाकृष्य ससम्भ्रमम्) मयि स्थिते कः कुसुमपुरमुपरोत्स्यति ? प्रवीरक ! प्रवीरक ! क्षिप्रमिदानीम् –

*कुसुसपुरोपरोधवृत्तान्तं श्रुत्वा संक्षुब्धमानसः राक्षसः सोत्साहं अधिकारिणां तत्तत्स्थाने नियोगं वर्णयति--*

शत्रोः दुर्वले बले एकमनसः प्रहर्तुमनसः मया सह निर्यान्तु ।

**प्राकारं परितः शरासनधरैः क्षिप्रं परिक्रम्यतां**
**द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयताम् ।**
**मुक्त्वा मृत्युभयं प्रहर्तुमनसः शत्रोर्बले दुर्बले**
**ते निर्यान्तु, मया सहैकमनसो, येषामभीष्टं यशः ॥१३॥**

*अन्वयः - शरासनधरैः प्राकारं परितः क्षिप्रं परिक्रम्यताम्, प्रतिद्विपघटाभेदक्षमैः द्विरदैः द्वारेषु स्थीयताम्, येषां यशः अभीष्टम्, ते मृत्युभयं त्यक्त्वा शत्रोः दुर्बले बले एकमनसः प्रहर्तुमनसः मया सह निर्यान्तु।*

*भावार्थः - धनुर्धारिणः सैनिकाः दुर्गस्य प्राकारं परितः क्षिप्रं वाणवृष्टिं कुर्वन्तो गतागतं कुर्वन्तु। दुर्गस्य द्वारे शत्रुहस्तिसमूहसैन्यस्य भेदनदक्षाः अस्मद्धस्तिसमूहाः तिष्ठन्तु। किञ्च मृत्युभयं त्यक्त्वा तृणवत् दुर्बलं शत्रुवलं प्रहर्तुमनसः शत्रुविनाशमात्रप्रतिज्ञातार प्रवीरा पुरुषाः मया मह बहिर्दुर्गमायोधनाय सत्वरं वीरगतिकामनया यशसोऽभिलाषिणः चलन्तु। अत्र वीररसः। स्वभावोक्तिरलङ्कारः। शार्दूलविक्रीडितं छन्दः।*

**विराधगुप्तः**- अमात्य ! अलमावेगेन । वृत्तमिदं वर्ण्यते ।

**राक्षसः**- (निःश्वस्य ) कष्टं वृत्तमिदम् ? मया पुनर्ज्ञातं 'स एव कालो वर्त्तत' इति। (शस्त्रमुत्सृज्य सास्रम्) हा देव नन्द ! स्मरामि ते राक्षसम्प्रति प्रसादातिशयम् । यस्तु एवंविधकाले –

*स्वस्वामिनो नन्दस्य विनाशं चाणक्यस्य च सर्वथा जयलाभमनुस्मरन् विक्षुब्धहृदयो राक्षसः प्राक्कालीनं स्वं प्रति नन्दानुरागमनुस्मरन् अनुशोचति--*

महृम् आज्ञां प्रेषयन् प्रीतियोगात् नगरे राक्षसानां सहस्रम् इव स्थितम् अज्ञासीः

**यत्रैषा मेघनीला चलति गजघटा, राक्षसस्तत्र याया-**
**देतत् पारिप्लवाम्भःप्लुति तुरगबलं वार्यतां राक्षसेन ।**
**पत्तीनां राक्षसोऽन्तं नयतु बलमिति प्रेषयन्मह्यमाज्ञा-**
**मज्ञासीः स्नेहयोगात् स्थितमिह नगरे राक्षसानां सहस्रम् ॥१४॥**

*अन्वयः - यत्र एषा मेघनीला गजघटा चरति तत्र राक्षसः यायात्, पारिप्लवाम्भःप्लुतिः एतत् तुरगबलं राक्षसेन वार्यताम्, पत्तीनां बलं राक्षसः अन्तं नयतु, इति मह्यम् आज्ञां प्रेषयन् प्रीतियोगात् नगरे राक्षसानां सहस्रम् इव स्थितम् अज्ञासीः।*

***भावार्थः*** *- हे देवनन्द! पुरा कुसुमपुरोपरोधप्रसङ्गेषु--यत्र समरमुखे मेघनीलेव विभाव्यमाना एषा शत्रुहस्तिसेना तिष्ठति तां प्रमदर्यितुं राक्षसो गच्छेत्। यत्र च गिरिप्रस्रवणजलवद्द्रुततरगतानि अश्वबलानि तिष्ठन्ति, तानि राक्षसेन वारणीयानि। यत्र च शत्रूणां साङ्ग्रामिकं पदातिबलं तिष्ठति, तस्य अन्तं राक्षसो नयेत्। इत्येवं स्नेहेन मां सर्वत्र नियोजयन् एकं मां राक्षसं त्वं राक्षसानां सहस्रमज्ञासीः। त्वं हि सर्वविधकार्यसंपादकं मामिवामंस्थाः इत्यर्थः। अत्रोपमालङ्कारः। स्रग्धरा वृत्तम्।*

ततस्ततः?

**विराधगुप्तः** - ततः समन्तादुपरुद्धं पुष्पपुरमवलोक्य बहुदिवसप्रभृति महदुपरोधवैशसमुपरि पौराणां परिवर्त्तमानमसहमाने, तस्यामवस्थायां, पौरजनापेक्षया सुरङ्गामुपेत्यापक्रान्ते तपोवनाय देवे सर्वार्थसिद्धौ, स्वामिविरहात् सुशिथिलीकृतप्रयत्नेषु युष्मद्बलेषु जयघोषणाव्याघातादि-साहसानुमितान्तर्नगरवासिषु; पुनरपि नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिरपगतेषु युष्मासु, चन्द्रगुप्तनिधनाय युष्मत्प्रयुक्तया विषकन्यया घातिते तपस्विनि पर्वतेश्वरे—

*मौर्यविनाशाय अमोघस्य स्वपुरुषार्थस्य प्रतिकूलदैवेनान्यथाकरणं दृष्ट्वा राक्षसः उपमया सविस्मयं वर्णयति--*

**राक्षसः** - सखे ! पश्याश्चर्यम्--

कर्णेनेव विषाङ्गनैकपुरुषव्यापादिनी रक्षिता
हन्तुं शक्तिरिवार्जुनं बलवती, या चन्द्रगुप्तं मया।
सा विष्णोरिव विष्णुगुप्तहतकस्यात्यन्तिकश्रेयसे
हैडिम्बेयमिवैत्य पर्वतनृपं तद्वध्यमेवावधीत् ॥१५॥

*अन्वयः - कर्णेन इव मया अर्जुनम् इव चन्द्रगुप्तं हन्तुं बलवती एकपुरुष-व्यापादिनी शक्तिः इव या विषाङ्गना रक्षिता सा विष्णोः इव विष्णुगुप्तहतकस्य आत्यन्तिकश्रेयसे तद् वध्यं हैडिम्बेयम् इव पर्वतनृपम् एव एत्य अवधीत्।*

***भावार्थः*** *- मया हि एकपुरुषव्यापादिनी विषकन्या चन्द्रगुप्तं हन्तुं सुरक्षिता। सा खलु चाणक्यहतकस्य कल्याणाय चाणक्यवध्यं पर्वतकमेव अवधीत् यथा एकपुरुषव्यापादिनी इन्द्रप्रदत्ता शक्तिः, कर्णेन अर्जुनं हन्तुं सुरक्षिता-- किन्तु सा कृष्णकल्याणाय अर्जुनरक्षणाय च कृष्णवध्यं घटोत्कचमेवावधीत्। अत्रोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

विराधगुप्तः - अमात्य ! दैवस्यात्र कामचारः किमत्र क्रियते ?

राक्षसः - ततस्ततः ?

चन्द्रगुप्तस्य नन्दभवनप्रवेशनम्

विराधगुप्तः - ततः पितृवधपरित्रासादपक्रान्ते कुसुमपुरात् कुमारे मलयकेतौ, विश्वासिते च पर्वतकभ्रातरि वैरोचके, प्रकाशिते च चन्द्र-गुप्तस्य नन्दभवनप्रवेशे, चाणक्यहतकेनाहूयाभिहिताः कुसुमपुरनिवासिनः सर्व एव सूत्रधाराः- 'यथा सांवत्सरिकवचनादद्यैवार्धरात्रसमये एवाभिमतः चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यतीति, ततः प्रथमद्वारात्प्रभृति संस्क्रियतां राजभवनम्' इति। ततः सूत्रधारैरभिहितम्-- 'आर्य ! प्रथममेव देवस्य चन्द्रगुप्तस्य नन्दभवनप्रवेशमुपलभ्य सूत्रधारेण दारुवर्मणा कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतं प्रथमराजद्वारम्। इदानीमस्माभिरभ्यन्तरे संस्कारो विधेयः' इति। ततश्चाणक्यनटुना 'अनादिष्टेनैव दारुवर्मणा संस्कृतं राजभवनद्वारमिति परितुष्टेन, दारुवर्मणः सुचिरं दाक्ष्यमभिनन्द्याभिहितम्--'अचिरादस्य दाक्ष्यस्यानुरूपं फलमधिगमिष्यसि दारुवर्मन् !'

राक्षसः - (सोद्वेगम्) सखे! कुतश्चाणक्यवटोः परितोषः? अफलमनिष्टफलं वा दारुवर्मणः प्रयत्नमवगच्छामि। यदनेन बुद्धिमोहादथवा राजभक्तिप्रकर्षान्नियोगकालमप्रतीक्षमाणेन सञ्जनितश्चाणक्यवटोश्चेतसि बलवान् विकल्पः। ततस्ततः?

पर्वतेश्वरस्य भ्राता भवति वैरोचकः

विराधगुप्तः - ततश्चाणक्यहतकेन अनुकूललग्नवशादद्यार्द्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यतीति शिल्पिनः पौरांश्च गृहीतार्थान् कृत्वा तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोचकमेकासने चन्द्रगुप्तेन सहोपवेश्य कृतः पृथ्वीराज्यार्द्धभागः।

राक्षसः - किमतिसृष्टं पर्वतेश्वरभ्रात्रे वैरोचकाय पूर्वप्रतिश्रुतं राज्यार्द्धम्?

विराधगुप्तः-- अथ किम् ?

पर्वतेश्वरविनाशज-नितस्यायशसः परिहारार्थं यतितवान्

राक्षसः - (आत्मगतम्) नियतमतिधूर्त्तावटुना तस्यापि तपस्विनः कमप्युपांशुवधमाकलय्य पर्वतेश्वरविनाशजनितस्यायशसः परिहारार्थ-मेषा लोकप्रतिपत्तिरुपचरिता। (प्रकाशम्) ततस्ततः?

विराधगुप्तः- ततः प्रथममेव प्रकाशिते चन्द्रगुप्तस्यार्द्धरात्रे नन्दभवनप्रवेशे, कृताभिषेके च वैरोचके, विमलमुक्तागुणपरिक्षेपोपरचितचित्रपटवारबाण-प्रच्छादितशरीरे, मणिमयमुकुटनिबिडनियतरुचिरतरमौलौ सुरभिकुसुम-दामवैकक्षिकावभासितविपुलवक्षःस्थले, परिचिततमैरप्यनभिज्ञायमा-नाकृतौ चाणक्यहतकादेशाच्चन्द्रगुप्तोपवाह्यां चन्द्रलेखाभिधानां गजवशामारुह्य, चन्द्रगुप्तानुयायिना राजलोकेन अनुगम्यमाने, जवेन देवस्य नन्दस्य भवनं प्रविशति वैरोचके, युष्मत्प्रयुक्तेन सूत्रधारेण दारुवर्मणा, चन्द्रगुप्तोऽयमिति मन्यमानेन वैरोचकस्योपरि निपातनाय सज्जीकृतं यन्त्रतोरणम्। अत्रान्तरे बहिर्निगृहीतवाहनेषु स्थितेषु चन्द्रगुप्ता-नुयायिषु भूमिपालेषु, युष्मत्प्रयुक्तेनैव चन्द्रगुप्तनिषादिना वर्वरकेण, कनकदण्डान्तर्निहितामसिपुत्रिकामाक्रष्टुकामेन अवलम्बिता करेण कनकश्रृङ्खलावलम्बिनी कनकदण्डिका।

राक्षसः - उभयोरप्यस्थाने यत्नः। ततस्ततः ?

विराधगुप्तः - अथ जघनाभिघातमुत्प्रेक्षमाणा गजवधूरतिजवनतया गत्यन्तरमारूढवती। ततः प्रथमगत्यनुरोधप्रत्याकलितमुक्तेन प्रभ्रष्टलक्ष्यं

चन्द्रगुप्तमौर्यभ्रान्त्या वैरोधकस्य हन्ता दारुवर्मा

पतता यन्त्रतोरणेनाकृष्टकृपाणीव्यग्रपाणिरनासादयन्नेव चन्द्रगुप्तप्रत्याशया वैरोचकं, दारुवर्मणा हतस्तपस्वी वर्वरकः। ततो दारुवर्मणा, यन्त्रतोरणनिपातनादात्मवधमाकलय्य शीघ्रमेवोत्तुङ्गतोरणस्थानमारूढेन यन्त्रघट्टनबीजलोहकीलमादाय हस्तिनीगत एव हतस्तपस्वी वैरोचकः।

राक्षसः - कष्टम्! अनर्थद्वयमापतितम्; न हतश्चन्द्रगुप्तोऽसौ, हतौ वैरोचकवर्वरकौ। (सावेगमात्मगतम्) न तावुभौ हतौ, दैवेन वयमेव हताः। (प्रकाशम्) अथ स सूत्रधारो दारुवर्मा क्व?

विराधगुप्तः - वैरोचकपुरःसरेण पदातिलोकेन लोष्टघातं हतः।

विषप्रदानेन चन्द्रगुप्तमौर्यवधाय राक्षसेण नियुक्तः वैद्यः अभयदत्तः भवति

राक्षसः - (सास्रम्) कष्टम् ! अहो ! वत्सलेन सुहृदा दारुवर्मणा वियुक्ताः स्मः। अथ तत्रत्येन भिषजाऽभयदत्तेन किमनुष्ठितम्?

विराधगुप्तः - अमात्य ! सर्वमनुष्ठितम् ।

राक्षसः - (सहर्षम्) किं हतो दुरात्मा चन्द्रगुप्तः?

विराधगुप्तः - अमात्य ! दैवान्न हतः।

राक्षसः - (सविषादम्) ततः किमिदानीं कथयसि परितुष्टः-- 'सर्वमनुष्ठितम्' इति ?

'वृषल ! सविषमिवौषधं न पातव्यम्'

विराधगुप्तः - अमात्य ! कल्पितमनेन विषचूर्णमिश्रमौषधं चन्द्रगुप्ताय । तच्च प्रत्यक्षीकुर्वता चाणक्यहतकेन कनकभाजने वर्णान्तरमुपगतमुपलभ्याभिहितश्चन्द्रगुप्तः-- 'वृषल ! सविषमिवौषधं न पातव्यम्' इति ।

राक्षसः - शठः खल्वसौ पटुः। अथ स वैद्यः कथम्?

विराधगुप्तः - स खलु वैद्यस्तदेवौषधं पायित उपरतश्च ।

शयनाधिकृतं प्रमोदं जघान

राक्षसः - (सविषादम्) अहह ! महान् विज्ञानराशिरुपरतः। भद्र ! अथ तस्य शयनाधिकृतस्य प्रमोदकस्य किं वृत्तम् ?

विराधगुप्तः - आत्मविनाशः।

राक्षसः - (सोद्वेगम्) कथमिव?

**विराधगुप्तः** - स खलु मूर्खस्तं युष्माभिरतिसृष्टं महान्तमर्थराशिमवाप्य महतो व्ययेनोपभोक्तुमारब्धवान्। ततः 'कुतोऽयं भूयान् धनागमस्तव' इति पृच्छ्यमानोऽयं यदा वाक्यभेदान् बहूनकथयत्, तदा चाणक्यहतकादेशाद् विचित्रेण वधेन व्यापादितः।

बीभत्सकादयः मृताः

**राक्षसः**- (सोद्वेगम्) कथमत्रापि वयमेवोपहता दैवेन? अथ शयितस्य चन्द्रगुप्तस्य शरीरे प्रहर्तुमस्मत्प्रयुक्तानां नरपतिशयनगृहस्यान्तः-सुरङ्गायां निवसतां बीभत्सकादीनां को वृत्तान्तः?

**विराधगुप्तः** - अमात्य ! दारुणो वृत्तान्तः।

**राक्षसः** - (सावेगम्) कथं दारुणो वृत्तान्तः, न खलु विदिताः ते तत्र निवसन्तः चाणक्यहतकेन?

**विराधगुप्तः** - अथ किम् ?

**राक्षसः**- कथमिव?

**विराधगुप्तः**- प्राक् चन्द्रगुप्तप्रवेशात् प्रविष्टमात्रेणैव शयनगृहे चाणक्येन दुरात्मना समन्तादवलोकितः, ततस्तु एकस्माद् भित्तिच्छिद्राद् गृहीतभक्तावयवां निष्क्रामन्तीं पिपीलिकापङ्क्तिमवलोक्य पुरुषगर्भमेतद् गृहमिति गृहीतार्थेन दाहितं तदन्तःशयनगृहम्। तस्मिंश्च दह्यमाने धूमावरुद्धदृष्टयः प्रथममपिहितनिर्गमनमार्गमनधिगम्य सर्वे एव बीभत्स-कादयस्तत्रैव ज्वलनमुपगता उपरताश्च ।

**राक्षसः**- (सास्त्रम् ) सखे ! पश्य, चन्द्रगुप्तस्य दैवसम्पदा सर्व एव उपरताः। (सचिन्तम्) सखे ! दैवसम्पदं पश्य दुरात्मनश्चन्द्रगुप्तहतकस्य । कुतः?

*स्वाभीष्टसिद्धये स्वकीयं कृतमपि पौरुषं स्वश्रेयसे न भवति किन्तु तेनः दुर्दैववशतः रिपोरेव श्रेयः समुत्पाद्यते इत्याक्षिपन् दैवोत्कर्षं प्रदर्शयति राक्षसः--*

ये शस्त्रेषु च रसेषु प्रणिहिताः, ते तैः एव घातिताः

**कन्या तस्य वधाय या विषमयी गुढं प्रयुक्ता मया**
**दैवात् पर्वतकस्तया विनिहतो यस्तस्य राज्यार्द्धभाक् ।**
**ये शस्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिता**
**मौर्यस्यैव फलन्ति पश्य विविधश्रेयांसि मे नोतयः ॥१६॥**

*अन्वयः - मया तस्य वधाय या विषमयी कन्या गूढं प्रयुक्ता तया दैवात् सः पर्वतकः निहतः, यः तस्य राज्यार्द्धहृत् ये शस्त्रेषु च रसेषु प्रणिहिताः, ते तैः एव घातिताः, पश्य मन्नीतयः मौर्यस्य एव त्रिविधश्रेयांसि फलन्ति।*

*भावार्थः - मया चन्द्रगुप्तवधार्थं विषमयी या कन्या प्रेषिता तया सः पर्वतकः विनिहतः यः तस्य राज्यार्द्धश्रीग्रहीता आसीत्। अन्यच्च तस्य वधाय यन्त्रेषु रसेषु च ये ये विनियोजिताः तैः तैरुपायैर्विपर्यस्तैः सद्भिः ते एव घातिताः। इति पश्य। अतः मदीया नीतयः तस्य मौर्यस्य विविधानि मङ्गलानि एवं फलन्ति।*

*मत्कृतोपायैः तदीयानिष्टकरणं दूरे किन्तु ते मदीयानिष्टपूर्वकं तदीयश्रेयांसि संपादयन्ति। अत्र विषमालङ्कारः। 'यदारब्धस्य वैफल्यम-नर्थस्य च संभवः' इति साहित्यदर्पणवचनात्। शार्दूलविक्रीडितं वृत्तम्।*

**विराधगुप्तः** - अमात्य! तथापि प्रारब्धमपरित्याज्यमेव। पश्यतु –

*विद्वांसः प्रारब्धं कर्म न त्यजन्तीति, राक्षसमुत्साहयन्नाह विराधगुप्तः--*

प्रारब्धमुत्तमगुणा-
स्त्वमिवोद्वहन्ति

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥१७॥**

*अन्वयः - नीचैः खलु विघ्नभयेन न प्रारभ्यते, मध्याः प्रारभ्य विघ्नविहताः विरमन्ति, उत्तमगुणाः विघ्नैः पुनः पुनः प्रतिहन्यमानाः अपि प्रारब्धं त्वम् इव उद्वहन्ति।*

*भावार्थः - क्षुद्रजनाः समारब्धे कार्ये विघ्नं भविष्यतीत्याशंकया कार्यमेव न प्रारभन्ते। मध्यमजनाः कार्यं प्रारभ्य विघ्नैः बाधिताः सन्तः तत्कार्यं परित्यजन्ति। किञ्च महापुरुषाः कार्यं प्रारभ्य मुहुर्मुहुः विघ्नैः बाधिताः सन्तोऽपि तत् न परित्यजन्ति। अत्रोपमालङ्कारः । वसन्ततिलका वृत्तम् ॥*

किं शेषस्य भरव्यथा
न वपुषि? क्ष्मां न
क्षिपत्येष यत्

**अपि च -**

**किं शेषस्य भरव्यथा न वपुषि? क्ष्मां न क्षिपत्येष यत्,**

**किं वा नास्ति परिश्रमो दिनपतेः? आस्ते न यन्निश्चलः।**

**किन्त्वङ्गीकृतमुत्सृजन् कृपणवच्छलाघ्यो जनो लज्जते,**
**निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥१८॥**

निर्व्यूढम् एतत् सत्पुरुषाणाम् गोत्रव्रतम्

*अन्वयः - शेषस्य वपुषि किं भरव्यथा न यद् एषः क्ष्मां न क्षिपति, वा किं दिनपतेः परिश्रमः न अस्ति यत् निश्चलः न अस्ति, किन्तु श्लाघ्यः जनः अङ्गीकृतं कृपणवत् उत्सृजन् लज्जते, हि निर्व्यूढम् एतत् सतां गोत्रव्रतम्॥*

*भावार्थः - भूभारं धारयितुः नागराजस्य शिरः प्रदेशे भूभारधारणजन्यः शेषः किं न भवति यदेष स्वशिरसि स्थितां पृथ्वीं न पातयति। अपि च क्लेशो भवत्येव किं वा सूर्यस्य लोकत्रयस्य तमो निवारणार्थं सञ्चरतः परिश्रमो न भवति यत् सः निश्चलः सन् एकत्र स्थाने न तिष्ठति अपि तु परिश्रमो भवत्येव किं तु महान्तो जनाः कर्तव्यत्वेन अङ्गीकृतं कृपणवत् परित्यजन्तः लज्जन्ते। यतः कर्तव्यकार्येषु निर्वाह एव सज्जनानां कुलाचारपद्धतिः। अत्रार्थान्तरन्यासालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

**राक्षसः**- सखे ! प्रारब्धमपरित्याज्यमिति प्रत्यक्षमेवैतद्भवताम्। ततस्ततः?

**विराधगुप्तः** - ततःप्रभृति चाणक्यहतकश्चन्द्रगुप्तस्य शरीरे सहस्रगुणमप्रमत्तः एभ्य एव ईदृशं भवतीत्यन्विष्य निगृहीतवान् कुसुमपुरनिवासिनो युष्मदीयानाप्तपुरुषान् ।

**राक्षसः**- (सोद्वेगम्) वयस्य ! कथय, कथय के के निगृहीताः ?

क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः

**विराधगुप्तः** - अमात्य ! आदावेव तावत् क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः ।

**राक्षसः** - (आत्मगतम्) एतावत् सह्यं, न निष्परिग्रहं स्थानपरिभ्रंशः पीडयिष्यति । (प्रकाशम्) सखे ! कमपराधमुद्दिश्य निर्वासित एषः?

**विराधगुप्तः** - 'एष दुरात्मा राक्षसप्रयुक्तया विषकन्यया पर्वतेश्वरं घातितवान्' इति ।

**राक्षसः** - (स्वगतम्) साधु कौटिल्य ! साधु।

*अथेदानीं शत्रोश्चाणक्यस्य गुणान् प्रशंसन् तस्य नीतेरसाधारण्यं प्रतिपादयन् राक्षसः तमेव स्तौति--*

एकमपि नीतिबीजं बहुफलतामेति

**स्वस्मिन् परिहृतमयशः पातितमस्मासु घातितोऽर्धराज्यहरः।**
**एकमपि नीतिबीजं बहुफलतामेति यस्य तव ॥१९॥**

*अन्वयः - अर्द्धराज्यहरः घातितः अयशः परिहृतम् अस्मासु पातितं च, यस्य तव एकम् अपि नीतिबीजं बहुफलताम् एति।*

*भावार्थः - जीवसिद्धिं निर्वासितवता त्वया स्वकीयं पर्वतकवधजन्यं कलङ्कं दूरीकृतं तच्च अस्मासु समारोपितं राज्यार्द्धभागी पर्वतेश्वरः घातित। एवं तव एकं नीतिबीजं पूर्वोक्तफलत्रयाधायकतां प्राप्नोति अतस्त्वं साधुः। अत्र काव्यलिङ्ग- मलङ्कारः। आर्या वृत्तम् ॥*

(प्रकाशम्)ततस्ततः?

दारुवर्मा चन्द्रगुप्तवधार्थं प्रेरितवान् इति रोपेण शकटदासः शूलमारोपितः

**विराधगुप्तः** - ततः 'चन्द्रगुप्तशरीरमभिद्रोग्धुमनेन व्यापारिता दारुवर्मादय' इति नगरे प्रख्याप्य शकटदासः शूलमारोपितः।

**राक्षसः**- (सास्रम्) हा सखे ! शकटदास ! अयुक्तस्तवायमीदृशो मृत्युः !! अथवा, स्वाम्यर्थमुपरतो न शोच्यस्त्वमसि; वयमेवात्र शोच्याः, ये नन्दकुलविनाशेऽपि जीवितुमिच्छामः।

**विराधगुप्तः**-- अमात्य ! स्वाम्यर्थ एव साधयितव्यः इति प्रयतसे ।

**राक्षसः** - सखे !

*'स्वामिकार्यसाधनमेव साधीयः' इत्युद्देश्येनास्माकं जिजीविषा इति समर्थयमानः आह राक्षसः--*

परलोकगतो देवः कृतघ्नैर्नानुगम्यते

**अस्माभिरमुमेवार्थमालम्ब्य न जिजीविषाम्।**
**परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥२०॥**

*अन्वयः - अमुम् एव अर्थम् अवलम्ब्य जिजीविषां, न कृतघ्नैः अस्माभिः परलोकगतः देवः न अनुगम्यते॥*

*भावार्थः - स्वामिवैरनिर्यातनरूपप्रयोजनमवलम्ब्यैव यदस्माकं जीवनेच्छा वर्तते सापि न श्रेयसी, यतः तदुपकारं विस्मरद्भिरस्माभिः परलोकगतोः देवो नन्दः नानुम्रियते। अत्र काव्यलिङ्गमलङ्कारः। अनुष्टव्वृत्तम् ।*

**विराधगुप्तः** - अमात्य! नैतदेवम्। ('अस्माभिरमुमेवार्थमि'त्यादि पुनः पठति।)

ननु अयुक्ततरः सुहृद्रोहः।

राक्षसः - सखे ! कथ्यतामपरस्यापि सुहृद्व्यसनस्य श्रवणे सज्जोऽस्मि ।

विराधगुप्तः - तत एतदुपलभ्य, चन्दनदासेनोपारूढसाध्वसेनापवाहितममात्यकलत्रम्।

राक्षसः - सखे ! क्रूरस्य चाणक्यवटोविरुद्धमयुक्तमनुष्ठितं चन्दनदासेन।

विराधगुप्तः- अमात्य ! ननु अयुक्ततरः सुहृद्रोहः।

राक्षसः - ततस्ततः?

विराधगुप्तः - ततो याच्यमानेनापि यदा न सर्पितमनेनाऽमात्यकलत्रम्, ततः कुपितेन चाणक्यवटुना...।

राक्षसः - (सोद्वेगं) स खलु व्यापादितः?

विराधगुप्तः - अमात्य! न खलु व्यापादितः, किन्तु गृहीतगृहसारः सपुत्रकलत्रः संयम्य बन्धनागारे निक्षिप्तः।

राक्षसः - ततः किं परितुष्टः कथयसि - 'अपवाहितमनेन राक्षसकलत्रम्' इति? ननु वक्तव्यं 'संयतः सकलत्रो राक्षसः' इति।

(प्रविश्य पटाक्षेपेण पुरुषः) जयत्वार्यः। आर्य। एष खलु शकटदासः प्रतिहारभूमिमुपस्थितः।

राक्षसः - प्रियंवदक ! अपि सत्यम्?

प्रियंवदकः - किमलोकममात्यपादेषु विनिवेदयामि?

भव्यं रक्षति भवितव्यता।

राक्षसः - सखे! विराधगुप्त! कथमेतत् ?

विराधगुप्तः- अमात्य! स्यादेतदेवं, यतो भव्यं रक्षति भवितव्यता ।

राक्षसः- प्रियंवदक! यद्येवं, तत् कि चिरयसि? क्षिप्रं प्रवेशय तम्।
प्रियंवदकः- (निष्क्रान्तः) यदमात्य आज्ञापयतीति।

(ततः प्रविशति सिद्धार्थकेनानुगम्यमानः शकटदासः)

शकटदासः- (दृष्ट्वा आत्मगतम्)

*सहस्रमन्तरायसमूहमनुभूय मदीयं चित्तं यन्न भग्नं तत्र तस्य काठिन्यमेव हेतुरित्यत आह--*

शकटदासः सिद्धार्थकेन सह आगत्य तस्मै वार्तां कथयति

**दृष्ट्वा मौर्यमिव प्रतिष्ठितपदं शूलं धरित्र्यास्तले**
**तल्लक्ष्मीमिव चेतनाप्रमथिनीमुन्मुच्य वध्यस्रजम्।**
**श्रुत्वा स्वाम्युपरोधरौद्रविषमानाध्माततूर्यस्वनान्**
**न ध्वस्तं प्रथमाभिघातकठिनं मन्ये मदीयं मनः ॥२१॥**

*अन्वयः - प्रतिष्ठितपदं मौर्यम् इव धरित्र्याः स्थले शूलं दृष्ट्वा तल्लक्ष्मीम् इव चेतनाप्रमथिनीं वध्यस्रजम् उन्मुच्य स्वाम्युपरोधरौद्रविषयान् आघाततूर्यस्वनान् श्रुत्वा मदीयं यत् मनः न ध्वस्तम्, तत् प्रथमाभिघातकठिनं मन्ये॥*

*भावार्थः - भूमौ स्थिरसाम्राज्यं मौर्यमिव निखातमूलं शूलं दृष्ट्वा मनोहृदयविदारिणीं वध्यचिह्नभूतां करवीरादिनिर्मितां मालां मर्मघातिनीं तल्लक्ष्मीमिव परिधाय महाराजनन्दस्य राज्यभ्रंशमिव घोरान् अश्राव्यान् च वाद्यशब्दान् श्रुत्वा मदीयं मनः पूर्वपूर्वानुभूतानर्थपरम्परायाः सहनेन कठिनम् अतएव न विदीर्णं तेन जीवामीत्यर्थः। अत्रोपमोत्प्रेक्षयोः संसृष्टिरलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ।*

(नाट्येनावलोक्य सहर्षम्) अयममात्यराक्षसस्तिष्ठति। य एषः—

*नन्दस्य उपरते अपि तत्कार्यसाधनपरं राक्षसं प्रत्यक्षतो दृष्ट्वा आह शकटदासः--*

पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः

**अक्षीणभक्तिः क्षोणेऽपि नन्दे स्वाम्यर्थमुद्वहन् ।**
**पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ॥२२॥**

*अन्वयः - नन्दे क्षीणे अपि अक्षीणभक्तिः स्वाम्यर्थम् उद्वहन् पृथिव्याम् स्वामिभक्तानां परमे प्रमाणे स्थितः।*

*भावार्थः – नन्दे विनष्टेऽपि तत्र विहितात्यन्तानुरागः अयं राक्षसः स्वामिकार्यं संपादयन् अस्मिन् जगति स्वामिभक्तानां प्रथमकोटौ विराजमानः तिष्टति। अत्र विभावनाऽलङ्कारः। अनुष्टुव्वृत्तम् ।*

(उपसृत्य) जयत्वमात्यः।

**राक्षसः**- (विलोक्य सहर्षम्) सखे शकटदास! दिष्ट्या कौटिल्य-गोचरगतोऽपि दृष्टोऽसि, तत् परिष्वजस्व माम्।

(शकटदासस्तथा करोति ।)

**राक्षसः** - (तं परिष्वज्य) इदमत्रासनमास्यताम्।

**शकटदासः** - यदाज्ञापयत्यमात्यः। (इति नाट्येनोपविष्टः)

**राक्षसः** - सखे ! शकटदास ! अथ कोऽयमीदृशस्य मे हृदयानन्दस्य हेतुः?

**शकटदासः** - (सिद्धार्थकं निर्दिश्य ) अमात्य ! प्रियसुहृदा सिद्धार्थकेन घातकान् विद्राव्य वध्यस्थानादपवाहितोऽस्मि।

**राक्षसः** - (सहर्षम्) भद्र सिद्धार्थक ! काममपर्याप्तमिदमस्य प्रियस्य, तथापि गृह्यताम् । (इति स्वगात्रादवतार्य भूषणानि प्रयच्छति।)

प्राणदण्डेन दण्डितस्य शकटदासस्य प्राणरक्षकः सिद्धार्थकः

**सिद्धार्थकः**- (गृहीत्वा पादयोनिपत्य स्वगतम्) अयं खलु आर्योपदेशः। भवतु। तथा करिष्यामि। अमात्य! अत्र मे प्रथमप्रविष्टस्य नास्ति कोऽपि परिचितः, यत्रेमममात्यस्य प्रसादं निक्षिप्य निर्वृतो भविष्यामि; तदिच्छाम्यहमेतया मुद्रया मुद्रितममात्यस्यैव भाण्डागारे निक्षेप्तुम्। यदा मे एतेन प्रयोजनं भविष्यति, तदा ग्रहीष्यामि ।

**राक्षसः** - भद्र ! भवतु, को दोषः? शकटदास ! एवं क्रियताम्' ।

**शकटदासः** - यदाज्ञापयतीति। (मुद्रां विलोक्य जनान्तिकम् ) अमात्य ! भवन्नामाङ्कितेयं मुद्रा।

मुद्रां विलोक्य रक्षसः मुद्राप्राप्तेः विषयं पृच्छति

**राक्षसः** - (विलोक्य सविषादं सवितर्कमात्मगतम्) सत्यं नगरात् निष्क्रामतो मन हस्ताद् बाह्मण्या उत्कण्ठाविनोदार्थं गृहीता, तत् कथमस्य हस्तमुपगता ? (प्रकाशम्) भद्र! सिद्धार्थक ! कुतस्त्वयेयमधिगता?

**सिद्धार्थकः**- अमात्य ! अस्ति कुसुमपुरनिवासी मणिकारश्रेष्ठी चन्दनदासो नाम, तस्य गेहद्वारे भूमौ पतिता मया समासादिता।

**राक्षसः** - युज्यते ।

**सिद्धार्थकः** - अमात्य ! किमत्र युज्यते ?

**राक्षसः** - भद्र ! यतो महाधनानां गृहे पतितस्यैवंविधस्योपलब्धिरिति।

**शकटदासः** - सखे सिद्धार्थक! अमात्यनामाङ्कितेयं मुद्रा, तदितो बहुतरेणार्थेन भवन्तममात्यस्तोषयिष्यति तद् दीयतामेषा मुद्रा ।

**सिद्धार्थकः** - (इति मुद्रां समर्पयति।) आर्य! एष मे परितोषः, यदमात्योऽस्या मुद्रायाः परिग्रहप्रसादं करोतीति।

**राक्षसः** - सखे शकटदास ! अनयैव मुद्रया स्वाधिकारे व्यवहर्तव्यं भवता।

**शकटदासः** - यदाज्ञापयत्यमात्यः।

**सिद्धार्थकः** - अमात्य ! विज्ञापयामि किमपि ।

**राक्षसः** - भद्र ! विश्रब्धं ब्रूहि।

चाणक्यहतकस्य विप्रियं कृत्वा नास्ति मे पुनः पाटलिपुत्रे प्रवेश इति

**सिद्धार्थकः** - जानात्येवामात्यो यथा चाणक्यहतकस्य विप्रियं कृत्वा नास्ति मे पुनः पाटलिपुत्रे प्रवेश इति। तदिच्छाम्यहममात्यस्यैव सुप्रसन्नौ पादौ सेवितुम् ।

**राक्षसः** - भद्र ! प्रियं नः, किन्तु त्वदभिप्रायाऽपरिज्ञानेनाऽन्तरितोऽस्माकमनुनयः। तदेवं क्रियताम्।

**सिद्धार्थकः**- (सहर्षम्) अनुगृहीतोऽस्मि।

**राक्षसः** - सखे शकटदास ! विश्रामय सिद्धार्थकम् ।

**शकटदासः** - यदाज्ञापयत्यमात्यः । (इति सिद्धार्थकेन सह निष्क्रान्तः।)

**राक्षसः** - सखे विराधगुप्त ! वर्णयेदानीं कुसुमपुरवृत्तान्तशेषम् । अपि क्षमन्ते कुसुमपुरनिवासिनोऽस्मदुपजापं चन्द्रगुप्तप्रकृतयः ?

**विराधगुप्तः** - अमात्य ! बाढं क्षमन्ते, ननु यथाप्रधानमनुगच्छन्त्येव।

मलयकेतोः पलायनस्य कारणं विवादः अस्ति।

**राक्षसः** - सखे ! किं तत्र कारणम् ?

**विराधगुप्तः** - अमात्य ! इदं तत्र कारणम्-- मलयकेतोरपक्रमणात्प्रभृति पीडितश्चन्द्रगुप्तेन चाणक्य इति। चाणक्योऽपि जितकाशितयाऽसहमानस्तैस्तै राज्ञाभङ्गैश्चन्द्रगुप्तस्य चेतसः पीडामुपचिनोति, अयमपि ममानुभवः।

**राक्षसः**- (सहर्षम्) सखे विराधगुप्त ! तद् गच्छ त्वमनेन आहितुण्डिकच्छद्मना पुनः कुसुमपुरमेव। तत्र हि मे सुहृत् वैतालिकव्यञ्जनः स्तनकलशो नाम प्रतिवसति। स त्वया मद्वचनाद् वाच्यः, यथा 'चाणक्येन क्रियमाणेष्वाज्ञाभङ्गेषु चन्द्रगुप्तस्त्वया समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्य' इति कार्यश्चातिनिभृतं करभकहस्तेन सन्देष्टव्यम् इति।

राक्षसः करभकं कुसुमपुरं प्रेषयति

राज्यप्राप्तिकृतार्थ-मेकमपरं तीर्णप्रतिज्ञार्णवं विघटयिष्यति

**विराधगुप्तः** - यदाज्ञापयत्यार्यः। (इति निष्क्रान्तः)

**पुरुषः** - (प्रविश्य) जयतु जयत्वमात्यः । अमात्य ! शकटदासो विज्ञापयति- - 'एते खलु त्रयोऽलङ्कारविशेषा विक्रीयन्ते, तत् प्रत्यक्षीकरोत्वमात्यः'।

**राक्षसः** - (विलोक्यात्मगतम्) अहो! महार्हाण्याभरणानि। ( प्रकाशम् ) भद्र! उच्यतां शकटदासः - 'परितोष्य विक्रेतारं गृह्यन्ताम्' इति ।

**पुरुषः** - (इति निष्क्रान्तः) यदमात्य आज्ञापयति ।

**राक्षसः** - (स्वगतम्) यावदहमपि कुसुमपुराय करभकं प्रेषयामि। (उत्थाय) अपि नाम दुरात्मनश्चाणक्याच्चन्द्रगुप्तो भिद्येत अथवा सिद्धमेव समीहितं पश्यामि । कुतः ?

**मौर्यस्तेजसि सर्वभूतलभुजामाज्ञापको वर्त्तते**
**चाणक्योऽपि मदाश्रयादयमभूद्राजेति जातस्मयः ।**
**राज्यप्राप्तिकृतार्थमेकमपरं तीर्णप्रतिज्ञार्णवं**
**सौहार्दात्कृतकृत्यतैव नियतं लब्धान्तरा भेत्स्यति ॥२३॥**

*अन्वयः - मौर्यः सर्वभूतलभुजाम् आज्ञापकः (अत एव) तेजसि वर्तते। चाणक्यः अपि मदाश्रयात् अयं राजा अभूत् इति जातस्मयः राज्यप्राप्तिकृतार्थम् एकं तीर्णप्रतिज्ञार्णवम् अपरं लब्धान्तरा कृतकृत्यता एव नियतं सौहार्द्रात् भेत्स्यति ॥२३॥*

*भावार्थः - अयं चन्द्रगुप्तः सकलक्षितीशानां सम्राट् वर्तते अतः राजमदात् तेजस्वी वर्तते। यश्चासौ चाणक्यः मम साहाय्येनैव चन्द्रगुप्तः राजाभूदिति सञ्जातगर्वो वर्तते। अतः निरपेक्षतया लब्धावकाशा कृतार्थता राज्यप्राप्तिः कृतार्थं साम्राज्यपदे सुप्रतिष्ठितं चन्द्रगुप्तं, किञ्च नन्दविनाशपूर्णप्रतिज्ञा-महार्णवं चाणक्यं च परस्परं कृतकृत्यता सौमनस्याभावात् अवश्यं विघटयिष्यतीति भावः। नात्र संदेहलेशोऽपि। अत्र यथासङ्ख्यलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे द्वितीयोऽङ्कः।।

## Summarised Overview


SGOU

विराधगुप्तः नाम राक्षसस्य गुप्तचरः आगच्छति। सः जीर्णविषो नाम आहितुण्डिकवेषेण वार्तां ज्ञातुं कुसुमपुरं गतः आसीत्। राक्षसः एवं चिन्तितो भवति यत् तस्य प्रवृत्तयः सफलाः भविष्यन्ति वा न वा इति। कुसुमपुरे चन्द्रगुप्तस्य वधार्थं नन्दस्य अमात्यः राक्षसः प्रतिज्ञां करोति। सः चाणक्येन रक्षितस्य चन्द्रगुप्तस्य सफलतायाः अत्यन्तं ईर्ष्याम् अनुभवति, मलयकेतुः अपि दुःखं करोति। कञ्चुकी मलयकेतु प्रेषितम् अलङ्कारं राक्षसाय आनयति।

आहितुण्डिकः विराधागुप्तनाम्नः राक्षसस्य वेषधारी गुप्तचरः कुसुमपुरस्य कथां कथयति। शक-यवन-किरात-काम्बोज-पारसीक-बाह्लीकप्रभृतिभिश्चाणक्यमतिगृहीतैः चन्द्रगुप्त-पर्वतेश्वरबलैरुदधिभिरिव, प्रलयकालचलितसलिलैः समन्तादुपरुद्धं कुसुमपुरम्। पुनरपि नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिरपगतेषु युष्मासु, चन्द्रगुप्तनिधनाय युष्मत्प्रयुक्तया विषकन्यया घातिते तपस्विनि पर्वतेश्वरः। ततः पितृवधपरित्रासादपक्रान्ते कुसुमपुरात् कुमारे मलयकेतौ, विश्वासिते च पर्वतकभ्रातरि वैरोचके, प्रकाशिते च चन्द्रगुप्तस्य नन्दभवनप्रवेशे, चाणक्यहतकेनाहूयाभिहिताः कुसुमपुरनिवासिनः सर्व एव सूत्रधाराः- 'यथा सांवत्सरिकवचनादद्यैवार्धरात्रसमये एवाभिमतः चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यती'ति।

ततश्चाणक्यहतकेन अनुकूललग्नवशादद्यार्द्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यतीति शिल्पिनः पौरांश्च गृहीतार्थान् कृत्वा तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोचकमेकासने चन्द्रगुप्तेन सहोपवेश्य कृतः पृथ्वीराज्यार्द्धभागः। कौटिल्यस्य कूटनीतिप्रयोगेण पञ्चत्वं गतः पर्वतकस्य भ्राता वैरोधकः। चन्द्रगुप्तमौर्यभ्रान्त्या वैरोधकस्य हन्ता दारुवर्मा। दारुवर्मं वैरोचकपुरःसरेण पदातिलोकेन लोष्टघातं हतः। एवं प्रकारेण वैरोचकः, राक्षसस्य गुप्तचरः दारुवर्मा, वर्वरकः च चाणक्यकूटनीतिना हताः। अभयदत्तं वैद्यं दत्वा चन्दगुप्तं हन्तुं नियुङ्क्ते। चाणक्यस्य कुटिलबुद्ध्या अभयदत्तवैद्याय तदेव विषं पातुं दीयते, येन सः म्रियते। चन्द्रगुप्तवधार्थं राक्षसः चन्द्रगुप्तस्य शयनाधिकृतं प्रमोदकं नियुक्तं करोति। चाणक्यः मूर्खं प्रमोदकं मारितवान्। बीभत्सकादयः ये पूर्वमेव राजगृहस्य भित्तिं कृत्वा चन्द्रगुप्तस्य वधार्थं सुरङ्गं कृत्वा राक्षसस्य वचनमनुसृत्य तत्र निवसन्ति स्म। ते चाणक्यस्य तीक्ष्णबुद्ध्या अपि हताः भवन्ति। एवं चन्द्रगुप्तस्य वधार्थं राक्षसेन कृतानि सर्वाणि नाशयति। अपितु दुष्परिणामानि भवन्ति।

विराधगुप्तः राक्षसं इत्थमपि कथयति यत् तत् तस्य त्रीणि मित्राणि क्षपणकजीवसिद्धिः, शकटदासः, चन्दनदासः च केनचित् अपराधे गृहीताः, तेषां दण्डः च प्राप्तः। शकटदासः सिद्धार्थकेन सह आगत्य तस्मै वार्तां कथयति। शकटदासः राक्षसं बन्धनविमोचनस्य कथां कथयति। प्राणदण्डेन दण्डितस्य शकटदासस्य प्राणरक्षकः सिद्धार्थकः। राक्षसः प्रसन्नः सन् सिद्धार्थकाय तदेव मणिं ददाति। सिद्धार्थकः तानि रत्नानि गुप्तरूपेण राक्षसमुद्रायाः चिह्नं कृत्वा तत्रैव स्थापयति। विराधगुप्तः राक्षसं वदति यत् मलयकेतोः कुसुमपुरात् पलायनस्य कारणात् चाणक्यचन्द्रगुप्तयोः विवादः अस्ति। राक्षसः एतत् श्रुत्वा अतीव प्रसन्नः भवति तथा च विराधगुप्तस्य माध्यमेन स्वस्य प्रियमित्रं वैतिलिकं स्तनकलशं प्रति सन्देशं प्रेषयति। यत् यदा कदापि चाणक्यः चन्द्रगुप्तस्य आज्ञाम् अवहेलयति तदा सः एकं श्लोकं गायति यत् चन्द्रगुप्तं चाणक्यविरुद्धं प्रेरयितुं समर्थः भवति। राक्षसः स्वहस्तप्राप्तस्य रत्नस्य मूल्यं ज्ञात्वा क्रेतुं अनुमतिं ददाति। वस्तुतः एतानि पर्वतकस्य रत्नानि सन्ति, ये प्रथमेऽध्याये चन्द्रगुप्तः पर्वतकस्य श्राद्धस्य अवसरे विश्वावसु

इत्यादिभिः भ्रातृभिः गृहीता, अधुना चाणक्यस्य प्रयत्नानुसारं राक्षसाय विक्रीयन्ते।

# Assignments

उत्तराणि लिखत।

1. आहितुण्डिकः राक्षसचरः कः ?
2. "पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी"। कस्येयमुक्तिः ?
3. मलयकेतोः कञ्चुकी कः ?
4. विषप्रदानेन चन्द्रगुप्तमौर्यवधाय राक्षसेण नियुक्तः कः?
5. प्राणदण्डेन दण्डितस्य शकटदासस्य प्राणरक्षकः कः?

टिप्पणिं लिखत।

1. कुसुमपुरवृत्तान्तम्।
2. प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला ।
3. पुरन्ध्रीणां प्रज्ञा पुरुषगुणावज्ञानविमुखी ।
4. किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत् ।
5. नन्वयुक्ततरः सुहृद्विद्रोहः ।
6. भव्यं रक्षति भवितव्यता।
7. पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ।
8. अमन्त्रौषधिकुशलो व्यालग्राही मत्तमतङ्गजारोही लब्धाधिकारो जितकाशी ।
9. इत्येते त्रयोऽप्यवश्यं विनाशमनुभवन्ति ।

श्लोकं व्याख्यात।

1. नेदं विस्मृतभक्तिना न विषयव्यापारमूढात्मना।
   प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना।
   अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते
   देवः स्वर्गगतोऽपि शात्रववधेनाराधितः स्यादिति ॥५॥
2. पीत्वा निरवशेषं कुसुमरसमात्मनः कुशलतया ।
   यदुद्गिरति भ्रमरस्तदन्येषां करोति कार्यम् ॥११॥
3. प्राकारं परितः शरासनधरैः क्षिप्रं परिक्रम्यतां
   द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयताम् ।
   मुक्त्वा मृत्युभयं प्रहर्त्तुमनसः शत्रोर्बले दुर्बले
   ते निर्यान्तु, मया सहैकमनसो, येषामभीष्टं यशः ॥१३॥

4. यत्रैषा मेघनीला चलति गजघटा, राक्षसस्तत्र याया-
देतत् पारिप्लवाम्भःप्लुति तुरगबलं वार्यतां राक्षसेन ।
पत्तीनां राक्षसोऽन्तं नयतु बलमिति प्रेषयन्मह्यमाज्ञा-
मज्ञासीः स्नेहयोगात् स्थितमिह नगरे राक्षसानां सहस्रम् ॥१४॥
5. प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥१७॥

**निबन्धात्मकः प्रश्नः**

1. मुद्राराक्षसे द्वितीयाङ्कस्य कथां स्ववाक्यैः संक्षिप्य लिखत।

# Suggested Readings


1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum


# References


1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वाराणासि।
2. महाकवि-विशाखदत्तप्रणीतम् मुद्राराक्षसम्, (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय, चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.
5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# मुद्राराक्षसे तृतीयः अङ्कः।

## Learning Outcomes

- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् अवगच्छति।
- मुद्राराक्षसनाटकपठनद्वारा राजनैतिकनाटकानां सविशेषं विज्ञानम् आर्जयति।
- तृतीयाङ्ककथां गृह्णाति।
- चाणक्यस्य कूटनीतिनैपुण्यं जानाति।
- श्लोकाना पठनेन आशयावगतिः।

## Background

अस्मिन् एकके तृतीयोऽङ्कस्य विशेषं महत्त्वं वर्तते। अस्य नाम ‘कृतकलहः’। अत्र चन्द्रगुप्तस्य चाणक्यस्य च कृतकलहस्य वर्णनं भवति, येन नाटकस्य नूतनाविष्कारः विद्यते। अस्य कलहस्य कारणात् मलयकेतोः मनसि राक्षसं प्रति अविश्वासः उत्पद्यते। तेन संजातान् संभवान् पठामः।

## Keywords

कौमुदीमहोत्सवम्, सुगाङ्गप्रासादम्, धुर्येण, तीक्ष्णादुद्विजते, कृतककलहं, शरत्कालवर्णनम्, कौमुदीमहोत्सवनिषेधम्, चाणक्यभनम्, दासवृत्तिविलापम्, सुवर्णशतसहस्रम्, लेख्यपत्रम्, वनगज, राक्षसप्रशंसा, चाणक्यस्य क्रोधम्, कृतककलहम्।

# Discussion

तृतीयोऽङ्कः

(ततः प्रविशति कञ्चुकी)

*कञ्चुकी स्वस्य जरया जनितामवस्थां वर्णयन्नाह---*

कञ्चुकीः- (सनिर्वेदम्।)

जरावस्था

**रूपादीन् विषयान्निरूप्य करणैर्यैरात्मलाभस्त्वया**
**लब्धस्तेष्वपि चक्षुरादिषु हताः स्वार्थावबोधक्रियाः।**
**अङ्गानि प्रसभं त्यजन्ति पटुतामाज्ञाविधेयानि मे**
**न्यस्तं मूर्ध्नि पदं तवैव जरया तृष्णे ! मुधा ताम्यसि ॥१॥**

***अन्वयः***- *हे तृष्णे! यैः करणैः रूपादीन् विषयान् निरूप्य त्वया आत्मलाभः लब्धः, तेषु चक्षुरादिषु अपि स्वार्थावबोधक्रियाः हताः, ते आज्ञाविधेयानि अङ्गानि प्रसभं पटुतां त्यजन्ति। जरया तव एव मूर्ध्नि पदं न्यस्तं मुधा माद्यसि।*

***भावार्थः*** *- हे तृष्णे, त्वया यैः ज्ञानेन्द्रियैः रूपादीन् विषयान् अवधार्य स्ववृत्तिलाभः कृतः, तेषु चक्षुरादिषु स्वस्वविषयग्रहणव्यापारा विनष्टाः, ममाङ्गानि अपि यानि पूर्वं मे वशीभूतानि आसन् तानि हस्तपादादीनि अङ्गानि स्वस्वकार्यादानगतिभोजनादिषु स्वस्वसामर्थ्यं त्यजन्ति, किमु वक्तव्यं तव, तव एव शिरसि जरया स्वचरणं स्थापितं अत एव त्वं निष्फलं वरीवृध्यसे। अत्र विभावनाऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

(परिक्रम्याकाशे।) भो भोः सुगाङ्गप्रासादाधिकृताः पुरुषाः सुगृहीतनामा देवश्चन्द्रगुप्तो वः समाज्ञापयति। 'प्रवृत्तकौमुदीमहोत्सवरमणीयतरं कुसुमपुरमवलोकयितुमिच्छामि। तत् संस्क्रियन्तामस्मद्दर्शनयोग्याः सुगाङ्गप्रासादस्योपरिभूमयः' इति। (पुनराकाशे।) तत् किं चिरयन्ति भवन्तः? ब्रूथ- 'आर्य!, किमविदित एवायं देवस्य कौमुदीमहोत्सवप्रतिषेधः', इति? आः दैवोपहताः!, किमनेन वः प्राणहरेण कथोद्घातेन। शीघ्रमिदानीम्—

*केन रूपेण कौमुदीमहोत्सवःन करणीय इत्याह---*

प्रासादवर्णना

**आलिङ्गन्तु गृहीतधूपसुरभीन् स्तम्भान् पिनद्धस्रजः**
**संपूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रियः।**
**सिंहाङ्कासनधारणाच्च सुचिरं संजातमूर्च्छामिव**
**क्षिप्रं चन्दनवारिणा सकुसुमः सेकोऽनुगृह्णातु गाम्।।२।।**

*अन्वयः - सम्पूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रियः पिनद्धस्रजः गृहीतधूपसुरभीन् स्तम्भान् आलिङ्गन्तु, च सकुसुमः चन्दनवारिणा सेकः सुचिरं सिंहासनधारणात् सञ्जातमूर्च्छां गाम् इव क्षिप्रम् अनुगृह्णातु।*

*भावार्थः - सुगाङ्गप्रासादस्थान् सर्वान् स्तम्भान् धूपसौरभान्वितान् विधाय माल्यविभूषितान् कृत्वा शोभार्थं पूर्णचन्द्रकिरणसमूहकान्तिवत् शुभचामरान्वितान् कुरुत। किञ्च सपुष्पचन्दनमिश्रितजलसेकः बहुकाल-पर्यन्तं सिंहासनधारणात् सञ्जातमूर्च्छाम्, पाटलीपुत्रभुवम्, शीघ्रं तथा संभाव्यतां यथा सिंहाङ्के निपतितां सिंहभयसंत्रस्ताम् गाम् कश्चित् सपुष्पचन्दनमिश्रजलसेकेन आश्वासयति। सिंहाङ्केति गामिति च श्लेषेण, मूर्च्छामिव इत्यत्रोत्प्रेक्षया च संसृष्टिरलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ।*

चन्द्रगुप्तः कुसुमपुरस्य सुगाङ्गप्रासादस्य समिपमागतः

(आकाशे) किं कथयन्ति भवन्तः। 'एते त्वरामह ' इति? भद्राः त्वरध्वम्। अयमागत एव देवश्चन्द्रगुप्तः।

*प्रत्यक्षदृश्यस्य चन्द्रगुप्तस्य तदानीन्तनीमवस्थां वर्णयन्नाह--*

य एषः--

**सुविश्रब्धैरङ्गैः पथिषु विषमेष्वप्यचलता**
**चिरं धुर्येणोढा गुरुरपि भुवो यास्य गुरुणा।**
**धुरं तामेवोच्चैर्नववयसि वोढुं व्यवसितो**
**मनस्वी दम्यत्वात् स्खलति च न दुखं वहति च ॥३॥**

*अन्वयः- विषमेषु अपि पथिषु अचलता धुर्येण अस्य गुरुणा सुविश्रब्धैः बङ्गः गुरुः अपि या चिरम् ऊडा, ताम् एव उच्चैः भुवः धुरं नववयसि वोढुं व्यवसितः यः एषः मनस्वी दम्यत्वात् दुःखं वहति च न स्खलति च।*

*भावार्थः - विश्वासपात्रैरमात्यादिभिः सह दुरवगाह्येषु राजनीतिषु धैर्यवता राज्यभारसञ्चालनकुशलेन चन्द्रगुप्तस्य पित्रा नन्देन भुवः या महती धूः चिरं सञ्चालिता, तामेव महतीं भूवो धुरम् अस्मिन् कैशोरे वयसि धारयितुं व्यवसितोऽयम् मनस्वी चन्द्रगुप्तः अनतिप्रौढत्वात् त्रुटिं*

*करोति किन्तु क्लेशं न आवहति, यथा सुपुष्टैरवयवैः उच्चावचेषु मार्गेषु भारोद्वहनकुशलेन धुरि संयोजितेन केनचिद् श्रेष्ठवृषभेण महान् भारः चिरं धार्यते, पश्चात् पूर्वधृतां तामेव महतीं धुरं नववयसि वोढुं तत्परः महोत्साहः वृषभपोतः दम्यत्वात् भ्रश्यति किन्तु क्लेशं न प्राप्नोति। अत्र समासोक्तिरलङ्कारः। शिखरिणी वृत्तम्॥*

(नेपथ्ये) इत इतो देवः।

(ततः प्रविशति राजा प्रतीहारी च)

राज्यं हि नाम राजधर्मानुवृत्तिपरत-न्त्रस्य भूपतेर्महदप्रीतिस्थानम्

**राजा-** (स्वगतम्) राज्यं हि नाम राजधर्मानुवृत्तिपरतन्त्रस्य भूपतेर्महदप्रीतिस्थानम् । यतः—

*राजधर्मानुवृत्तिपरस्य राज्ञः राज्यं महदप्रीतिजनकमिति दृढयति--*

पराधीनः पुरुषः कथमानन्दमनुभवन्ति?

**परार्थानुष्ठाने रहयति नृपं स्वार्थपरता**
**परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः।**
**परार्थश्चेत् स्वार्थादभिमततरोऽर्हन्त परवान्**
**परायत्तः प्रीतेः कथमिव रसं वेत्तुं पुरुषः ? ॥४॥**

*अन्वयः - परार्थानुष्ठाने स्वार्थपरता नृपं रहयति, परित्यक्तस्वार्थः नियतम् अयथार्थः क्षितिपतिः चेत् परार्थः स्वार्थात् अभिमततरः हन्त परवान् परायत्तः पुरुषः प्रीतेः रसं कथम् इव वेत्तुम्।*

*भावार्थः - परेषां प्रयोजनं सिद्धिं कुर्वाणे स्वार्थपरता राजानं स्तब्धीकरोति। अतः स्वार्थमक्रियमाणो राजा निश्चितरूपेण अवास्तविको राजा अस्ति। एवञ्च स्वार्थापेक्षया यदि परार्थकरणं राज्ञोऽभिमततरकार्यं, तदायं महतो खेदस्य विषयोऽस्ति यत् स परवानस्ति। पराधीनो हि पुरुषः आनन्दानुभवं ज्ञातुमसमर्थः। अतः राजनीतिविशारदस्य राज्ञः कृते राज्यं सर्वथा दुःखदायकम्। अत्र काव्यलिङ्गमलङ्कारः। शिखरिणी वृत्तम् ।*

दुराराध्या हि राजलक्ष्मीः।

अपि च- दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः। कुतः?

*लक्ष्म्याः दुराराध्यत्वमिदानीमुपपादयति--*

**तीक्ष्णादुद्विजते, मृतौ परिभवत्रासान्न सन्तिष्ठते,**

**मूर्खं द्वेष्टि, न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि ।**

**शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो,**
**श्रीर्लब्धप्रसरेव वैशवनिता दुःखोपचर्या भृशम् ॥५॥**

***अन्वयः*** *- तीक्ष्णात् उद्विजते, मृदौ परिभवत्रासात् न सन्तिष्ठते, मूर्खां द्वेष्टि, अत्यन्तविद्वत्सु अपि प्रणयितां न गच्छति, शूरेभ्यः अपि अधिकं बिभेति, एकान्तभीरुम् उपहसति, अहो ! लब्धप्रसरा वैशवनिता इव श्रीः भृशं दुःखोपचर्या।*

***भावार्थः*** *- अहो आश्चर्यं यत् इयं लक्ष्मीः विक्रमोदग्रात् राज्ञः उद्विजते, मृदौ परिभवत्रासात् न संतिष्ठते, मूर्खं द्वेष्टि, विशिष्टविद्वत्सु अनुरागं न करोति, शूरेभ्यः अधिकं बिभेति, अत्यन्तभयसंत्रस्तान् उपहसति, प्रगल्भतां प्राप्ता वरङ्गना इव इयं राजलक्ष्मीः सर्वथा कष्टेन संसेव्या। अत्र पादत्रये दीपकालङ्कारः, चतुर्थपादे अनयोः संसृष्टिः। शार्दूलविक्रीडितं वृत्तम्।*

कृतककलहम् इति व्याजप्रस्तावना

अन्यच्च - कृतककलहं कृत्वा स्वतन्त्रेण त्वया कञ्चित् कालं व्यवहर्त्तव्यमित्यार्योपदेशः। स च कथमपि मया पातकमिवाभ्युपगतः, अथवा शश्वदार्योपदेशसंस्क्रियमाणमतयः सदैवास्वतन्त्रा वयम् । कुतः?---

*आर्योपदेशगृह्याणां सततमस्वातन्त्र्यमुपपादयितुमाह--*

त्यजति तु यदा मार्गं मोहात्।

**इह हि रचयन् साध्वीं शिष्यः क्रियां न निवार्यते**
**त्यजति तु यदा मार्गं मोहात्, तदा गुरुरङ्कुशः।**
**विनयरुचयस्तस्मात् सन्तः सदेव निरङ्कुशाः**
**परतरमतः स्वातन्त्र्येभ्यो वयं हि पराङ्मुखाः। ॥६॥**

***अन्वयः*** *- इह साध्वीं क्रियां रचयन् शिष्यः न निवार्यते, यदा तु मोहात् मार्गं त्यजति तदा गुरुः अङ्कुशः, तस्मात् विनयरुचयः सन्तः सदा एव निरङ्कुशाः, अतः परतरं स्वातन्त्रेभ्यः वयं हि पराङ्मुखाः।*

***भावार्थः*** *- इह लोके सत्कार्यानुष्ठानं कुर्वन् शिष्यः गुरुणा न निवार्यते। यदा तु स शिष्यः अज्ञानात् कुमार्गेण गच्छति तदा तत्र गुरुः अङ्कुश इव निवारको भवति। तस्माद् गुरुशिक्षणे बद्धादरा वयं सदैव स्वतन्त्रा एव। अस्मात् कारणात् वयं स्वच्छन्दानुवर्त्तिभ्यः अत्यधिकं विरुद्धाः। अत्र परिणामालङ्कारः। हरिणी वृत्तम्।*

(प्रकाशम्) आर्य वैहीनरे ! सुगाङ्गप्रासादमार्गमादेशय ।

चन्द्रगुप्तस्य कञ्चुकिः नाम वैहीनरिः इति।

**कञ्चुकी** - इत इतो देवः ।

(राजा परिक्रामति)

**कञ्चुकी** - (परिक्रम्य) अयं सुगाङ्गप्रासादः, शनैरारोढुमर्हत्यार्यः।

शरत्कालवर्णनम्

**राजा** - (नाट्येनारुह्य दिशोऽवलोक्य) अहो! शरत्समयसम्भृत-शोभाविभूतीनां दिशामतिरमणीयता !! कुतः?

*अत्र शारदीयां रमणीयतां त्रिभिः श्लोकैः वर्णयति--*

**शनैः श्यानीभूताः सितजलधरच्छेदपुलिनाः**
**समन्तादाकीर्णाः कलविरुतिभिः सारसकुलैः।**
**चिताश्चित्राकारैर्निशि विकचनक्षत्रकुमुदैः-**
**र्नभस्तः स्यन्दन्ते सरित इव दीर्घादश दिशः ॥७॥**

*अन्वयः - शनैः श्यानीभूताः सितजलधरच्छेदपुलिनाः कलविरुतिभिः सारसकुलैः समन्तात् आकीर्णाः निशि चित्राकारैः विकचनक्षत्रकुमुदैः चिताः दीर्घाः दश दिशः सरितः इव नभस्तः स्यन्दन्ते।*

*भावार्थः - शरदि जलाभावात् धवलमेघखण्डाः निर्मला जाताः। मधुराव्यक्तनिनादं कुर्वद्भिः सारससमूहैः सर्वतः व्याप्तम्। रात्रौ विचित्रैः प्रफुल्लवनक्षत्रैः अनन्ता दश दिशः आकाशात् सरित इव प्रस्रवन्ति। जलाभावात् नदीनां पुलिनानि निष्कलुषानि भवन्ति, तासां प्रदेशाः कलनादं कुर्वद्भिः सारससमूहैः व्याप्ताः भवन्ति, किञ्च रात्रौ प्रफुल्लकुमुदैः व्याप्तास्ताः श्रावणमासतः एवं आयताः भूत्वा अद्यावधि प्रवाहिता भवन्ति। अत्रोपमालङ्कारः। शिखरिणी वृत्तम् ॥*

**अपि च-**

शरत्कालवर्णनम्

**अपामुद्वृत्तानां निजमुपदिशन्त्या स्थितिपदं**
**दधत्या शालीनामवनतिमुदारे सति फले।**
**मयूराणामुग्रं विषमिव हरन्त्या मदमहो?**
**कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा ॥८॥**

*अन्वयः - अहो ! उद्वृत्तानाम् अपां निजं स्थितिपदम् उपदिशन्त्या शालीनाम् उदारे फले सति अवनतिं दधत्या मयूराणाम् उग्रं मदं विषम् इव हरन्त्या शरदा कृत्स्नस्य लोकस्य अयं विनयः कृतः इव।*

*भावार्थः - अहो महदाश्चर्यम् । वर्षत्तौ तटमुद्धिद्योपरि प्रवहतां जलानां निजं स्वाभाविकं स्थितिपदमुपशिक्षयन्त्या, धान्यानां परिपाककाले तत्र फले जाते तान् नम्रीकुर्वन्त्या मयूराणां उत्कटं गर्वं विषमिव दूरीकुर्वन्त्यानया शरदा समस्तस्य चराचरलोकस्य विनय इव कृतः।*

**अपि च--**

शरत्कालवर्णनम्

**भर्त्तुस्तथा कलुषितां बहुवल्लभस्य**
**मार्गे कथञ्चिदवतार्य तनूभवन्तीम्।**
**सर्वात्मना रतिकथाचतुरेव दूती**
**गङ्गां शरन्नयति सिन्धुपतिं प्रसन्नाम् ॥९॥**

*अन्वयः - शरत् रतिकथाचतुरा दूती इव कलुषितां तनूभवन्तीं गङ्गां सर्वात्मना प्रसन्नां बहुवल्लभस्य भर्तुः मार्गे कथञ्चित् अवतार्य सिन्धुपतिं नयति ॥९॥*

*भावार्थः - यथा प्रणयकथानिपुणा दूती बहुपत्नीकस्य स्वभर्तुः चरित्रेण खण्डितत्वादाप्रसन्नाम्, अतएव कृशाङ्गयष्टिं नायिकां, कष्टेन सर्वतो भावेन प्रसाद्य पातिव्रत्यमार्गे समानीय तां स्वच्छां विगतेर्ष्यां च कृत्वा पतिसमीपं प्रापयति तथा इयं शरदपि वर्षत्तौ मलिनाम्, वर्षासमाप्तौ क्षीणाञ्च गङ्गां स्वच्छां निष्कलुषां, विधाय बहुसरित्पतेः सागरस्य मार्गे कथञ्चिदवतार्य सागरं पापयति। अत्रोपमालङ्कारः। वसन्ततिलका वृत्तम्।*

कुसुमपुरे कौमुदीमहोत्सवः न आघोषितः

(समन्तान्नाट्येनावलोक्य) अये ! कथमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम् ?
आर्य वैहीनरे ! अथाऽस्मद्वचनादाघोषितः कुसुमपुरे कौमुदीमहोत्सवः ?

**कञ्चुकी** - देव! अथ किम्? आघोषितो देवस्याज्ञया कुसुमपुरे कौमुदीमहोत्सवः।

**राजा** - आर्य ! तदेवं किं न परिगृहीतमस्मद्वचनं पौरजनेन ?

**कञ्चुकी** - (कर्णौ पिधाय ) देव ! शान्तं पापं, शान्तं पापं, पृथिव्यामस्खलितपूर्वं देवस्य शासनं, कथं पौरेषु स्वलितुमर्हति ?

**राजा** - आर्य वैहीनरे ! तत् कथमप्रवृत्तकौमुदीमहोत्सवमधुनाऽपि कुसुमपुरं पश्यामि ? पश्य—

कुसुमपुरे कौमुदीमहोत्सवस्य कारणं पृच्छति

**धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो**
**नालङ्कुर्वन्ति रथ्याः पृथुजघनभराक्रान्तिमन्दैः प्रयातैः।**
**अन्योन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशङ्काः**
**साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः ॥१०॥**

*अन्वयः - स्फुटचतुरकथाकोविदैः धूर्तैः अन्वीयमानाः वेशनार्यः पृथुजघन-भराक्रान्तिमन्दैः प्रयातैः रथ्याः न अलङ्कुर्वन्ति, गृहविभवैः च अन्योऽन्यं स्पर्द्धमानाः पौरमुख्याः स्वामिनः मुक्तशङ्काः स्त्रीभिः साकम् अभिलषितं पार्वणं विधिं न भजन्ते।*

*भावार्थः - सुव्यक्तचातुरीकथाकुशलैः लम्पटैः अनुगम्यमानः वारविलसिन्यः पृथुजघनभाराक्रान्ततयालसैः स्वगमनैः पाटलिपुत्रराज-मार्गान् न भूषयन्ति गृहसम्पत्तिभिः 'अहमहमिकया स्पर्द्धमानाः गृहस्वामिनः निर्भयाः सन्तः स्त्रीभिः साकं बहुकालादवाप्तं कार्त्तिकपूर्णिमा महोत्सवं न संपादयन्ति अत्र केन कारणेन भवितव्यमिति शेषः। अत्र स्वभावोक्तिरलङ्कारः। स्रग्धरा वृत्तम् ।*

**कञ्चुकी** - देव एवमेतत्।

**राजा** - किमेतत् ?

**कञ्चुकी** - देव ! 'अत इदम्...'

**राजा** - आर्य ! स्फुटमभिधीयताम्।

**कञ्चुकी** - 'देव ! प्रतिषिद्धः कौमुदीमहोत्सवः।'

**राजा** - (सक्रोधम् ) आः केन ?

**कञ्चुकी** - नातः परमस्माभिर्देवो विज्ञापयितुं शक्यते ।

कौमुदीमहोत्सवस्य निषेधः चाणक्येन कृतः कुसुमपुरे

**राजा**- न खल्वार्येण चाणक्येनापहृतः प्रेक्षकाणामतिशयरमणीयश्चक्षुषो विषयः?

**कञ्चुकी** - देव ! कोऽन्यो जीवितुकामो देवस्य शासनमुल्लङ्घयिष्यति?

**राजा** - शोणोत्तरे ! उपवेष्टुमिच्छामि ।

**प्रतिहारी** - देव ! एतत् सिंहासनमुपविशतु देवः ।

**राजा** - ( नाट्येनोपविश्य ) आर्य वैहीनरे ! आर्यचाणक्यं द्रष्टुमिच्छामि ।

**कञ्चुकी** - यदाज्ञापयति देवः। (इति निष्क्रान्तः।)

(ततः प्रविशत्यासनस्थः स्वभवनगतः कोपानुविद्धां चिन्तां नाटयन् चाणक्यः।)

**चाणक्यः**- (आत्मगतम्) कथं स्पर्द्धते मया सह दुरात्मा राक्षसहतकः? कुतः?

*राक्षसानुष्ठीयमानां स्वामिभवसरणिं प्रकटयितुमाह--*

नन्दं हत्वा नृपतिमकरोन्मौर्य-वृषलम्

**कृतागाः कौटिल्यो भुजग इव निर्याय नगराद्**
**यथा नन्दं हत्वा नृपतिमकरोन्मौर्यवृषलम्।**
**तथाऽहं मौर्येन्दोः श्रियमपहरामीति कृतधीः**
**प्रभावं मद्बुद्धेरतिशयितुमेष व्यवसितः ॥११॥**

*अन्वयः - कृतागः कौटिल्यः भुजग इव नगरात् निर्याय यथा नन्दं हत्वा मौर्यवृषलं नृपतिम् अकरोत् तथा अहं मौर्येन्दोः श्रियम् अपहरामि इति कृतधीः एषः मद्बुद्धेः प्रकर्षम् अतिशयितुं व्यवसितः।*

*भावार्थः - यथा नन्देन कृताप्रियः चाणक्यः भुजग इव नगरात् सक्रोधं निर्गत्य नन्दं विनाश्य चन्द्रगुप्तमौर्यं नृपतिमकरोत् तथाहमपि मौर्यचन्द्रमसः चन्द्रगुप्तस्य राज्यलक्ष्मीमात्मसात्करिष्यामीत्येयं कृतनिश्चयोऽयं राक्षसः मद्बुद्धिभावमतिक्रमितुं समुद्यतोस्तीति अहो अस्य दुर्व्यवसितमित्यर्थः। अत्र उपमाऽलङ्कारः। शिखरिणी वृत्तम्।*

(प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) राक्षस! राक्षस!! विरम्यतामस्माद् दुर्व्यवसितात्!

*चन्द्रगुप्तश्रीहरणस्य दुःसाध्यत्वं दर्शयितुं नन्दस्य राज्यभ्रंशे कारणं दर्शयन्नाह--*

केवलं वैरमात्रेण तव मया सह साधर्म्यम्।

**उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रो**
**नन्दोऽसौ न भवति चन्द्रगुप्त एषः।**
**चाणक्यस्त्वमपि च नैव, केवलं ते**
**साधर्म्यं मदनुकृतेः प्रधानवैरम् ॥१२॥**

*अन्वयः- एषः चन्द्रगुप्तः उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रः असौ नन्दः न भवति च त्वम् अपि चाणक्यः नैव प्रधानवैरं केवलं, ते मदनुकृतेः साधर्म्यम्।*

*भावार्थः - यया कुसचिवसञ्चालितराज्यतन्त्रः नन्दः आसीत् तथा यं चन्द्रगुप्तः न भवति। अस्य राज्यतन्त्रं सर्वथा सुसचिवैः सञ्चाल्यत इति विशेषः। अतो नन्दवन्नैव विनाशितुं शक्यतेऽयं चन्द्रगुप्तः। किञ्च त्वमपि चाणक्यः न भवसि, चाणक्यो हि सर्वं स्वसङ्कल्पितं साधयितुं शक्तः महाप्रभावत्वात् त्वं तु पदे पदे विफलतां प्राप्तः। केवलं वैरमात्रेण तव मया सह सादृश्यमस्ति न तु बुद्धिप्रकर्षेण इति भावः।*

*यथा मम राज्ञा नन्देन सह वैरं तथा तवापि राज्ञा चन्द्रगुप्तेन सह वैरमित्येकस्मिन् कर्मणि त्वयि मदनुकृतिरास्ते इति भावः। वैरमात्रेण मया सह सादृश्यं न तु बुद्धिप्रकर्षेणेति समुदितोऽर्थः। अत्र न्यूनत्वरूपो व्यतिरेकः, प्रहर्षिणी वृत्तं च।*

(विचिन्त्य ) अथवा, नातिमात्रमस्मिन् वस्तुनि मया मनः खेदयितव्यम्। कुतः?

*अधुना स्वरकीयम् अमोघनीतिकोशलं दर्शयति--*

चाणक्यस्य कुटिलतन्त्रम्

**मद्भृत्यैः किल सोऽपि पर्वतसुतो व्याप्तः प्रतिष्ठान्तरै-**
**रुद्युक्ताश्च नियोगसाधनविधौ सिद्धार्थकाद्याः स्पशाः।**
**कृत्वा सम्प्रति कैतवेन कलहं मौर्येन्दुना, राक्षसं**
**भेत्स्यामि स्वमतेन भेदकुशलो ह्येष प्रतीपं द्विषः ॥१३॥**

*अन्वयः - प्रतिष्टान्तरैः मद्भृत्यैः सः पर्वतसुतः अपि व्याप्तः किल सिद्धार्थ-काद्याः स्पशाः स्वनियोगसाधनविधौ उद्युक्ताः, सम्प्रति मौर्येन्दुना कैतवेन कलहं कृत्वा एषः स्वमतेन भेदकुशलः प्रतीपं राक्षसं हि द्विषः भेत्स्यामि।*

*भावार्थः - अस्मदीयैः भृत्यैः भागुरायणादिभिः गुप्तवेशैः सद्भिः मलयकेतुः आसमन्तात् संवृतः किञ्च सिद्धार्थकाद्याः मे गुप्तचराः मन्निदेशपालनकर्मणि संलग्नाश्च। संप्रति भेदकुशलः अहं चन्द्रगुप्तेन साकं कैतवेन कृतवकलहं कृत्वा स्वबुद्ध्या प्रतिकूलं राक्षसं मलयकेतोः सकाशात् पृथक् करिष्यामि। शार्दूलविक्रीडितं वृत्तम्।*

**कञ्चुकी** - (प्रविश्य) कष्टं खलु सेवा नाम। कुतः?

*राजसचिवादीनां भयोत्पादकत्वेन क्लेशबहुलं सेवाधर्मं कुक्कुरवृत्तितुल्य मिति निन्दयन्नाह---चाणक्यप्रतिषिद्धस्य कौमुदीमहोत्सवस्य स्वयं*

*राजसमीपे कथनात् तच्छ्रवणे चाणक्यस्य कोपमित्याशङ्कमानः कञ्चुकी सखेदं कथयति--*

सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः

**भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभा-**
**दन्येभ्यश्च वसन्ति येऽस्य भवने लब्धप्रसादा विटाः ।**
**दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायास्यतः**
**सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः ॥१४॥**

*अन्वयः - नृपतेः भेतव्यम्, ततः सचिवतः, ततः राज्ञः वल्लभात्, अन्येभ्यः च ये अस्य भवने लब्धप्रसादाः विटाः वसन्ति। दैन्यात् उन्मुखदर्शनापलपनैः पिण्डार्थम् आयास्यतः लाघवकारिणीं सेवां कृतधियः स्थाने श्ववृत्तिं विदुः।*

***भावार्थः*** *- सेवकैः प्रथमं राज्ञः ततोऽस्य प्रधानामात्यात्, ततः राज्ञः प्रियजनात् ततः तद्भवनवासिभ्यः संप्राप्तराजानुग्रहविटेभ्यस्ततोऽन्येभ्यश्च भेतव्यम्। इत्थं बुद्धिमन्तः दीनभावात्। पिण्डार्थं स्वामिसन्निधौ ऊर्ध्वमुखं तद्दर्शनैः तैः सह मिथ्याभाषणैश्च प्रयतमानस्य भृत्यस्य सेवाकार्यं लाघवकारिणीं श्ववृत्तिं विदुः इति युक्तमेव। अत्र काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

(परिक्रम्यावलोक्य च) इदमार्यचाणक्यस्य गृहम्, यावत् प्रविशामि।

(नाट्येन प्रविश्यावलोक्य च) अहो! राजाधिराजमन्त्रिणो गृहभूतिः!! कुतः?

*इदानीम् राज्यतन्त्रे व्यस्तस्य, धननिस्पृहस्य चाणक्यस्य गृहभूर्ति प्रतिपादयन्नाह--*

चाणक्यभवनम्

**उपलशकलमेतद् भेदकं गोमयानां**
**बटुभिरुपहृतानां बर्हिषां स्तोम एषः।**
**शरणमपि समिद्भिः शुष्यमाणाभिराभि-**
**र्विनमितपटलान्तं दृश्यते जीर्णकुड्यम् ॥१५॥**

*अन्वयः - गोमयानां भेदकम् एतत् उपलशकलं बटुभिः उपहृतानां बर्हिषाम् एतत् स्तोम शुष्यमाणाभिः आभिः समिद्भिः विनमितपटलान्तं जीर्णकुड्यं शरणम् अपि दृश्यते।*

***भावार्थः*** *- एकतोऽस्य महामन्त्रिणः गृहभागे शुष्काणां करीषगोलकानां चूर्णनार्थं क्षुद्रप्रस्तरखण्डं दृश्यमानं तिष्ठति। किञ्चान्यत्र ब्रह्मचारिभिः*

*आनीतानां दर्भाणां पिञ्जुलः दृश्यते। एतस्य गृहमपि शुष्कसमिद्भिः पलाशादिकाष्ठयष्टिभिः विनमितपटलान्तं विशीर्णाभित्तिकं विराजते। अत्र स्वभावोक्तिरलङ्कारः। मालिनी वृत्तम् । तद्यथा- 'ननमयययुतेयं मालिनी भोगिलोकैः'।*

ततः स्थाने खल्वस्य वृषलो देवश्चन्द्रगुप्त इति । कुतः?

*राजसेवनं तृष्णाहेतुम्। किञ्च सन्तोऽपि असतो राज्ञः गुणकीर्तनाय प्रवर्तन्ते चाणक्यस्तु न तथा इति दर्शयति---*

निस्पृहाणां कृते राजा तृणमिव तिरस्कारविषयः

**स्तुवन्त्यश्रान्तास्याः क्षितिपतिमभूतैरपि गुणैः**
**प्रवाचः कार्पण्याद् यदवितथवाचोऽपि कृतिनः।**
**प्रभावस्तृष्णायाः स खलु सकलः स्यादितरथा**
**निरीहाणामीशस्तृणमिव तिरस्कारविषयः ॥१६॥**

कञ्चुक्याः दासवृत्तिविलापम्

*अन्वयः - अवितथवाचः अपि पुरुषाः यत् कार्पण्यात् प्रवाचः श्रान्तास्याः अभूतैः अपि तद्गुणैः क्षितिपतिं स्तुवन्ति, सः खलु सकलः तृष्णायाः प्रभावः इतरथा निरीहाणाम् ईशः तृणम् इव तिरस्कारविषयः स्यात्।*

*भावार्थः - मितभाषिणः सत्यवादरताः साधवोऽपि दारिद्र्यातिशयात् वाचिश्रममगणयन्तः राजानं अविद्यमानगुणैरपि यत् स्तुवन्ति स सर्वोऽपि तृष्णायाः माहात्म्यं अन्यथा तृष्णाभावे निस्पृहाणां कृते राजा तृणमिव तिरस्कारार्हः। अत्रोपमाविरोधाभासयोः संसृष्टिरलङ्कारः। शिखरिणी वृत्तम्।*

(अवलोक्य सभयम् ) तदयमार्यचाणक्यस्तिष्ठति।

चाणक्यः सूर्यापेक्षया विशिष्टः

**यो नन्दमौर्यनृपयोः परिभूय लोक-**
**मस्तोदयौ प्रतिदिशन्नविभिन्नकालम्।**
**पर्यायपातितहिमोष्णमसर्वगामि**
**धाम्नाऽतिशाययति धाम सहस्रधाम्नः ॥१७॥**

*अन्वयः - यः लोकं परिभूय नन्दमौर्यनृपयोः अप्रतिभिन्नकालम् अस्तोदयौ प्रतिदिशन् असर्वगामि पर्यायपातितहिमोष्णं सहस्रधाम्ना अतिशाययति।*

*भावार्थः - महामनाः अयं चाणक्यः सर्वान् राजसहायकान् पराजित्य समकालमेव नन्दचन्द्रगुप्तनृपयोः ह्रासवृद्धी वितरन् स्वधाम्ना सूर्यस्य धामातिशय्य विराजते। सूर्यो हि लोकालोकपर्यन्तं समस्तं भुवनं संताप्य पर्यायेण दर्शनादर्शने गच्छति न तु समकालम्। अयं तु समकालमेव*

*ह्रासवृद्धी करोति किञ्च पर्यायेण स्वधाम्ना हिमोष्णदानात् सर्वकालस्थायि तत्तेजः। चाणक्यतेजस्तु सर्वकालस्थायीति विशेषः। अतः चाणक्यः सूर्यापेक्षया विशिष्टः इत्यर्थः। अत्रातिशयोक्तिरलङ्कारः। वसन्ततिलका वृत्तम्॥*

(जानुभ्यां भूमौ निपत्य) जयतु जयत्वार्यः।

**चाणक्यः** - ( नाट्येनावलोक्य) वैहीनरे ! किमागमनप्रयोजनम् ?

**कञ्चुकी** - आर्य! प्रणतसम्भ्रमसमुच्चलितभूमिपालमौलिमाला-माणिक्यशकलशिखापिशङ्गीकृतपादपद्मयुगलः सुगृहीतनामधेयो देवचन्द्रगुप्त आर्यं शिरसा प्रणिपत्य विज्ञापयति- 'अकृतक्रियान्तरायमार्यं द्रष्टुमिच्छामी'ति।

**चाणक्यः** - वृषलो मां द्रष्टुमिच्छति ? वैहीनरे ! न खलु वृषलश्रवणपथं गतोऽयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः?

**कञ्चुकी** - आर्य ! अथ किम् ?

**चाणक्यः** - (सक्रोधम्) आः ! केन कथितम् ?

**कञ्चुकी** - (भयं नाटयित्वा) प्रसीदत्वार्यः स्वयमेव सुगाङ्गप्रासाद-शिखरगतेन देवेनावलोकितमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम्।

**चाणक्यः** - आः ज्ञातं, भवद्भिरेव मदन्तरा प्रोत्साह्य रोषितो वृषलः, किमन्यत् ?

(कञ्चुकी सभयं तूष्णीमधोमुखस्तिष्ठति।)

**चाणक्यः** - अहो ! राजपरिजनस्य चाणक्योपरि विद्वेषपक्षपातः। अथ क्व वृषलस्तिष्ठति ?

**कञ्चुकी** - (भयं नाटयन्) आर्य ! सुगाङ्गप्रासादगतेन देवेनाहमार्यपादमूलं प्रेषितः।

**चाणक्यः** - ( उत्थाय ) कञ्चुकिन् ! सुगाङ्गप्रासादमार्गमादेशय।

**कञ्चुकी** - इत इत आर्यः।

(इत्युभौ परिक्रामतः)

चाणक्यः चन्द्रगुप्तं द्रष्टुमिच्छति

**कञ्चुकी** - अयं सुगाङ्गप्रासादः, शनैरारोढुमर्हत्यार्यः।

**चाणक्यः** - ( नाटयेनारुह्यावलोक्य च सहर्षमात्मगतम्) अये ! सिंहासनमध्यास्ते वृषलः, साधु साधु-

*नन्दसिंहासने चन्द्रगुप्तं प्रतिष्ठितं दृष्ट्वा सञ्जातानन्दः चाणक्यः स्वगुणोत्कर्षं वर्णयति--*

प्रीतिं परां प्रगुणयन्ति गुणा ममैते

**नन्दैर्वियुक्तमनपेक्षितराजराजै-**
**रध्यासितञ्च वृषलेन वृषेण राज्ञाम् ।**
**सिंहासनं सदृशपार्थिवसङ्गतञ्च**
**प्रीतिं परां प्रगुणयन्ति गुणा ममैते ॥१८॥**

*अन्वयः – सिहासनम् अनपेक्षितराजराजैःनन्दैः र्वियुक्तं च राज्ञां वृषेण वृषलेन अध्यासितं सदृशपार्थिवसङ्गतं च एते गुणाः मम परां प्रीतिं प्रगुणयन्ति।*

*भावार्थः - तिरस्कृतराजव्यवहारैः नन्दैः विरहितमिदं सिंहासनं यत् राजराजेश्वरेण चन्द्रगुप्तेन अधिष्ठितं तद् सदृशपार्थिवसङ्गतं जातं यथेदं महार्घं तथा धीरोदात्तत्वादिमहाराजगुणसंपन्नेन राज्ञा विभूषितं च। तदेते मम गुणा परां प्रीतिं संवर्द्धयन्ति। अत्र समालङ्कारः। वसन्ततिलका वृत्तम्।*

(उपसृत्य) विजयतां वृषलः ।

राजा- (सिंहासनादुत्थाय चाणक्यस्य पादौ गृहीत्वा) आर्य ! चन्द्रगुप्तः प्रणमति।

**चाणक्यः** - (पाणी गृहीत्वा) उत्तिष्ठोत्तिष्ठ वत्स!

*राजानं पाणिभ्यां संगृह्य चाणक्यः स्वाभिमतेनाशिषा योजयति--*

चाणक्यस्य चन्द्रगुप्तसिंहासन प्रशंसा

**आशैलेन्द्राच्छिलान्तस्स्खलितसुरधुनीशीकरासारशीताद्,**
**आतीरान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य।**
**आगत्यागत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियन्तां**
**चूडारत्नांशुगर्भास्तव चरणयुगस्याङ्गुलीरन्ध्रभागाः ॥१९॥**

*अन्वयः- शिलान्तः स्खलितसुरनदीशीकरासारशीतात् आशैलेन्द्रात् नैकरागस्फुरितमणिरुचः दक्षिणस्य अर्णवस्य तीरान्तात् आगत्य आगत्य*

*भीतिप्रणतनृपशतैः तव चरणयुगस्य अङ्गुलीरन्ध्रभागाः शश्वत् एव चूडारत्नांशुगर्भाः क्रियन्ताम्।*

***भावार्थः*** *- गङ्गाजलस्पर्शादतिशीतात् आ हिमालयात् किञ्चानेकविधभासमानमणिकान्तियुतात् दक्षिणस्य समुद्रस्य आतीरात् पौनःपुन्येन आगत्य प्रणमद्भिः नृपशतैः सततमेव तव चरणयुगस्य अङ्गुलीरन्ध्रभागाः स्वमुकुटरत्नकिरणोदराः क्रियन्ताम्। अत्रोल्लासालङ्कारः। स्रग्धरा वृत्तम्।*

**राजा** - आर्यप्रसादादनुभूयत एवैतत्, नाऽऽशास्यते। उपविशत्वार्यः।

(इत्युभौ यथाऽऽसनमुपविष्टौ।)

**चाणक्यः** - वृषल ! किमर्थं वयमाहूताः ?

**राजा** - आर्यस्य दर्शनेनात्मानमनुग्राहयितुम्।

न निष्प्रयोजन-मधिकारवन्तः प्रभुभिराहूयन्ते

**चाणक्यः** - (स्मितं कृत्वा) वृषल ! अलमनेन प्रश्रयेण, न निष्प्रयोजन-मधिकारवन्तः प्रभुभिराहूयन्ते, तत् प्रयोजनमभिधीयताम्।

**राजा** - आर्य ! कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति?

**चाणक्यः** - (स्मितं कृत्वा) वृषल ! उपालब्धुं तर्हि वयमाहूताः ।

**राजा**- आर्य ! नोपालब्धुम् ।

**चाणक्यः** - किं तर्हि ?

**राजा** - विज्ञापयितुम् ।

**चाणक्यः** - वृषल! यद्येवं हि विज्ञापनीयानामवश्यं शिष्येण रुचयोऽनुरोद्धव्याः।

**राजा**- आर्य ! कः सन्देहः ? किन्तु न कदाचिदप्यार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः।

**चाणक्यः**- वृषल ! सम्यग्गृहीतवानसि मदाशयम्। न हि प्रयोजन-मनपेक्षमाणः स्वप्नेऽपि चाणक्यश्चेष्टते ।

अर्थशास्त्रकाराणां मते राजान् त्रिविधाः

**राजा**- आर्य ! अत एव मां प्रयोजनशुश्रूषा मुखरयति ।

**चाणक्यः** - वृषल! श्रूयताम्। इह खलु अर्थशास्त्रकाराः त्रिविधां सिद्धिमुपवर्णयन्ति। यद्यथा--राजायत्तां, सचिवायत्ताम्, उभयायत्ताञ्चेति ।

तत् सचिवायत्तसिद्धेर्भवतः किं फलान्वेषणेन ? यतो वयमेवात्र नियुक्ता वेत्स्यामः।

(राजा सकोप इव मुखं परिवर्त्तयति।)

(ततो नेपथ्ये वैतालिकौ पठतः।)

*राज्ञः श्रेयः प्रथम वैतालिकः प्राप्तुमिच्छन् शरद्गुणवर्णनप्रसङ्गेन शिवं तां च स्तुवन्नाह--*

एकः -

**आकाशं काशपुष्पच्छविमभिभवता भस्मना शुक्लयन्ती**
**शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती कृत्तिमैभीम्**
**कापालीमुद्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा।**
**हासश्रीराजहंसा हरतु तनुरिव क्लेशमौशी शरद्वः ॥२०॥**

*अन्वयः - काशपुष्पच्छविम् अभिभवता भस्मना आकाशं शुक्लयन्ती शीतांशोः अंशुजालैः जलधरमलिनाम् ऐभीं कृत्तिं क्लिश्नती कौमुदीम् इव धवलां कापालीं स्रजम् उद्वहन्ती हासश्रीराजहंसा अपूर्वा शरद् इव ऐशी तनुः वः क्लेशं हरतु।*

*भावार्थः - शिवपक्षे-काशकुसुमसमधिकेन भस्माङ्गरागेण गगनं श्वेतयन्ती, चूडास्थितचन्द्रकिरणकलापैः जलधरमलिनां गजसम्बन्धिनीं कृत्तिं आसिञ्चन्ती चन्द्रिकामिव धवलां मुण्डमालां दधाना, ताण्डवकाले प्रचण्डाट्टहासं राजहंसपङ्क्तिधवला शरदिव कापि लोकोत्तरगुणाभिरामा शैवीतनुः वः क्लेशं विनाशयतु। शरत्पक्षे-भस्माभिभवन्त्या काशपुष्पछव्या आकाशं शुक्लयन्ती चन्द्रकिरणकलापैः ऐभीं कृत्तिमिव जलधरमलिनां ताम् अपसारयन्ती, नरमुण्डमालास्रजमिव चन्द्रिकामुद्वहन्ती हासश्रीरिव राजहंसपङ्क्तिं दधाना कापि अपूर्वा शरत्शैवीमूर्त्तिरिव वः आध्यात्मिकादिक्लेशं हरतु। ऐशी तन्वा शरदः सादृश्यात् उपमालङ्कारः। शरदि ईशत्वारोपसिद्धये तद्विशेषणे भस्मादौ काशपुष्पादिसादृश्योक्तेरुपमासमुद्भासितो रूपकालङ्कारः। स्रग्धरा वृत्तम्।*

**अपि च-**

**प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणाम्,**
**आत्मव्यापारगुर्वी जनितजललवा, जृम्भितैः साङ्गभङ्गैः।**

**नागाङ्कं भोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं,**
**निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥२१॥**

***अन्वयः*** *– (फणाचक्रवालोपधानम् उरु) नागाङ्क शयनं भोक्तुम् इच्छोः हरेः प्रत्यग्रोन्मेषजिह्मा क्षणं रत्नदीपप्रमाणम् अनभिमुखी साङ्गभङ्गैः जृम्भितैः जनितजललवाः आत्मव्यापारगुर्वी निद्राच्छेदाभिताम्रा आकेकरा दृष्टिः वः चिरम् अवतु ।।२१।।*

***भावार्थः*** *- अभिनवोन्मीलनेन कूणितप्रान्ता, ईषत्कालपर्यन्तं शेष-शिरःस्थितरत्नकान्तीनाम् असम्मुखी, किञ्च देहत्रोटनान्वितैः जृम्भितैः अश्रुकणपरिपूरिता अतएव दर्शनक्रियायामलसा। फणामण्डलोपधानम् अनन्तक्रोडरूपं शयनं जिहीर्षतः नारायणस्य निद्राभङ्गेनारक्ता अर्धसंकुचिता च दृष्टिः युष्मान् अवतु। अत्र शरदि भङ्गनिद्रो विष्णुरिव चन्द्रगुप्तोऽपि शरदुत्सवे सावधानः स्वराजकृत्यमवलोकयतु इत्याशयः। अत्र रूपकालङ्कारः। स्रग्धरा वृत्तम्।*

*चाणक्यं प्रति चन्द्रगुप्तस्य कोपमुद्दीपयितुं संस्तुवन्नाह द्वितीयो वैतालिकः-*

**द्वितीयः -**

**सत्त्वोत्कर्षस्य धात्रा निधय इव कृताः केऽपि कस्यापि हेतो-**
**र्जेतारः स्वेन धाम्ना मदसलिलमुचां नागयूथेश्वराणाम्।**
**दंष्ट्राभङ्गं मृगाणामधिपतय इव व्यक्तमानावलेपा-**
**नाऽऽज्ञाभङ्गं सहन्ते नृवर नृपतयस्त्वादृशाः सार्वभौमाः॥२२॥**

*अन्वयः - नृवर ! धात्रा सत्त्वोत्कर्षस्य के अपि कस्य अपि हेतोः निधयः इव कृताः मदसलिलमुचां नागयूथेश्वराणां स्वेन धाम्ना जेतारः मृगाणाम् अधि-पतय इव दंष्ट्राभङ्ग न सहन्ते, व्यक्तमानावलेपाः सार्वभौमाः त्वादृशाः नृपतयः आज्ञाभङ्गं न सहन्ते ॥२२॥*

***भावार्थः*** *- हे नृवर ! स्वेन तेजसा मदोन्मत्तानां त्वत्सदृशानां राज्ञां जेतारः लोकोत्तराः कस्मैचित् लोकोत्तरप्रयोजनाय विधात्रा वीर्याधिक्यमहिम्नः निधयः इव सृष्टाः। व्यक्तमानावलेपाः त्वादृशाः सार्वभौमाः राजानः, सिंहाः दन्तोत्पाटनमिव परैः क्रियमाणमाज्ञाभङ्गं न सहन्ते। उपमा अलङ्कारः, निधय इव इत्यत्रोत्प्रेक्षा च। स्रग्धरा वृत्तम्।*

*आज्ञाभङ्गे प्रभूणां प्रभुत्वमेव नास्तीति वर्णयति--*

**अपि च -**

**भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः ।**
**परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ॥२३॥**

*अन्वयः- भूषणाद्युपभोगेन प्रभुः प्रभुः न भवति। परैः अपरिभूताज्ञः त्वम् इव प्रभुः उच्यते।*

***भावार्थः-*** *भूषणादिश्रेष्ठवस्तूनामुपभोक्ता राजा, निग्रहानुग्रहसमर्थप्रभुशब्द-भाक् न भवति किन्तु अन्यैः अस्खलितादेशः त्वादृशः राजा एव प्रभुर्भवति। विषयोपभोगः न प्रभूशब्दप्रवृत्तिनिमित्तं किन्तु अव्याहताज्ञत्वमेव इति भावः। अत्रोपमालङ्कारः। अनुष्टुब्वृत्तम् ।*

**चाणक्यः** - (आकर्ण्यात्मगतम्) प्रथमं तावद्विशिष्टदेवतास्तुतिरूपेण प्रवृत्तशरद्गुणप्रख्यापनमाशीर्वचनम्। इदमपरं किमिति नावधारयामि।

(विचिन्त्य) आः ज्ञातम्। राक्षसस्यायं प्रयोगः। आः दुरात्मन् ! राक्षसहतक! दृश्यसे, जागर्त्ति खलु कौटिल्यः।

राजा वैतालिकाभ्यां सुवर्णशतसहस्रं प्रातुम् आज्ञापयति

**राजा** - आर्य वैहीनरे ! दापयाभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रम्।

**कञ्चुकी** - यदाज्ञापयति देवः। (इत्युत्थाय परिक्रामति।)

**चाणक्यः** - (सक्रोधम्) वैहीनरे! तिष्ठ तिष्ठ, न गन्तव्यम्। वृषल! किमयमस्थाने एव महानर्थोत्सर्गः क्रियते ?

**राजा** - आर्येणैव सर्वतो निरुद्धचेष्टाप्रसरस्य मम बन्धनमिव राज्यं, न राज्यमिव।

**चाणक्यः** - वृषल! स्वयमनभियुक्तानां राज्ञामेते दोषाः सम्भवन्ति। तद्यदि न सहसे, तदा स्वयमेवाभियुज्यस्व।

**राजा** - एते स्वकर्मण्यभियुज्यामहे ।

**चाणक्यः** - प्रियं नः, वयमपि स्वकर्मण्यभियुज्यामहे ।

**राजा** - यद्येवम्, हि कौमुदीमहोत्सवप्रतिषेधस्य प्रयोजनं श्रोतुमिच्छामि।

**चाणक्यः** - वृषल ! कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनमित्यहमपि श्रोतुमिच्छामि।

**राजा** - प्रथमं तावत् ममाज्ञाव्याघातः।

**चाणक्यः** - वृषल! ममापि खलु त्वदाज्ञाव्याघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनमिति । कुतः?

*इदमेव मुख्यप्रयोजनत्वेन श्लाघ्यतया त्वयानुमन्तव्यमिति समाधत्ते--*

**अम्भोधीनां तमालप्रभवकिसलयश्यामवेलावनाम्**
**आपारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानाम्।**
**मालेवाज्ञा सपुष्पा नतनृपतिशतैरुह्यते या शिरोभिः**
**सा मय्येव स्खलन्ती प्रथयति विनयालङ्कृतं ते प्रभुत्वम् ॥२४॥**

*अन्वयः - तमालप्रभवकिसलयश्यामवेलावनानां चटुलतिमिकुलक्षोभितान्तर्जलानां चतुर्णाम् अम्भोधीनाम् आपारेभ्यः नृपतिशतैः या तव अम्लानपुष्पा माला इव आज्ञा शिरोभिः उह्यते सा मयि स्खलन्ती ते विनयालङ्कृतं प्रभुत्वम् एव कथयति।*

*भावार्थः - तमालजातपल्लवकृष्णवर्णवेलावनानां चञ्चलमहामत्स्यसमूहक्षोभितान्तर्जलानां चतुर्णां समुद्राणां अपरतीरेभ्यः संप्राप्तैः नृपसमूहैः या सपुष्पा माला इव तवाज्ञा शिरोभिः धार्यते सा तवाज्ञाविघातके मयि प्रतिघातमापन्ना तव प्रभुत्वं विनयालङ्कृततया प्रथयति। तवाज्ञाविघातके मयि दण्डापाताद् तव विनयातिशयं प्रभुत्वम् अलङ्करणाय भवेदिति भावः। उपमालङ्कारः। स्रग्धरावृत्तम् ।*

**राजा** - अथापरमपि प्रयोजनं यत्तच्छ्रोतुमिच्छामि।

**चाणक्यः** - तदपि कथयामि।

**राजा** - कथ्यताम् ।

**चाणक्यः** - शोणोत्तरे ! शोणोत्तरे ! मद्वचनात् कायस्थमचलदत्तं ब्रूहि - 'यत् भद्रभटप्रभृतीनामितोऽपरागादपक्रम्य मलयकेतुमाश्रितानां लेख्यपत्रं तत्तावद् दीयतामि'ति ।

**प्रतीहारी**- (निष्क्रम्य पुनः प्रविश्य) यदार्य आज्ञापयतीति । आर्य ! इदं पत्रम् ।

**चाणक्यः** - (गृहीत्वा) वृषल ! श्रूयताम् !

**राजा** - दत्तावधानोऽस्मि ।

**चाणक्यः** - (वाचयति) स्वस्ति, सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणामितोऽपक्रम्य मलयकेतुमाश्रितानां

मलयकेतुमाश्रितानां प्रमाणलेख्यपत्रम्

प्रमाणलेख्यपत्रम्। तत्र प्रथमं तावत् 'गजाध्यक्षो भद्रभटः, अश्वाध्यक्षः पुरुषदत्तः, महाप्रतीहारस्य चन्द्रभानोर्भागिनेयो हिङ्गुरातः, देवस्य स्वजनगन्धी महाराजो बलगुप्तः, देवस्यैव कुमारसेवको राजसेनः, सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणः, मालवराजपुत्रो रोहिताक्षः, क्षत्रगणमुख्यतमो विजयवर्मा इति। (आत्मगतम्) एते वयं देवस्य कार्येऽवहिताः स्म इति । (प्रकाशम्) एतावदेतत् पत्रम्।

**राजा** - आर्य ! एतेषामपरागहेतून् श्रोतुमिच्छामि।

**चाणक्यः** - वृषल! श्रूयताम्, अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ भद्रभट-पुरुषदत्तनामानौ, एतौ खलु स्त्री-मद्य-मृगयाशीलौ हस्त्यश्वा-वेक्षणेऽनभियुक्तौ इति स्वाधिकाराभ्यामवरोप्य मया स्वजीवनमात्रेणैव स्थापितावित्यपरक्तौ, गत्वा स्वेन स्वेन चाऽधिकारेण व्यवस्थाप्य मलय-केतुमाश्रितौ। यावेतौ हिङ्गुरातबलगुप्तौ, तावत्यन्तलुब्धप्रकृती दत्तं धनमबहुमन्यमानौ 'तत्र बहु लभ्येत' इति मलयकेतुमाश्रितौ । योऽप्यसौ भवतः कुमारसेवको राजसेनः सोऽपि तव प्रसादादतिप्रभूतकोषहस्त्यश्वं सहसैव सुमहदैश्वर्यमवाप्य पुनरुच्छेदशङ्कयाऽपक्रम्य मलयकेतुमाश्रितः। योऽयमपरः सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणः, असावपि तत्र काले पर्वतकेन सह समुत्पन्नसौहार्दः तत्प्रीत्या च 'पिता ते चाणक्येन घातितः' इति रहसि त्रासयित्वा मलयकेतुमपवाहितवान्, ततो भवद-पथ्यकारिषु चन्दनदासप्रभृतिषु निगृह्यमाणेषु स्वदोषाशङ्कयाऽपक्रम्य मलयकेतुमाश्रितः। तेनाऽप्यसौ मम प्राणरक्षक' इति कृतज्ञतामनुवर्त-मानेन आत्मनोऽनन्तरममात्यपदं ग्राहितः । यौ तौ लोहिताक्ष-विजय-धर्माणौ, तावप्यतिमानित्वात् स्वदायेभ्यस्त्वया दीयमानमसहमानौ मलयकेतुमाश्रितौ इत्येषामपरागहेतवः।

**राजा** - आर्य! एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण ?

**चाणक्यः** - वृषल ! न पारितं प्रतिविधातुम् ।

**राजा** - किमकौशलात्, उत प्रयोजनापेक्षया ?

**चाणक्यः** - कथमकौशलं भविष्यति, प्रयोजनापेक्षयैव।

**राजा** - तदप्रतिविधानप्रयोजनमिदानीं श्रोतुमिच्छामि ।

**चाणक्यः** - वृषल ! श्रूयतामवधार्यताञ्च ।

**राजा** - उभयमपि क्रियते, कथ्यताम् ।

विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम्- अनुग्रहो निग्रहश्चेति

**चाणक्यः**:- वृषल ! इह खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम्- अनुग्रहो निग्रहश्चेति। अनुग्रहस्तावत् आक्षिप्ताधिकारयोर्भद्रभट-पुरुषदत्तयोः पुनरधिकारारोपणमेव। अधिकारश्च पुनस्तादृशेषु व्यसनयोगात् अनभियुक्तेषु पुनरारोप्यमाणः सकलस्यैव राज्यस्य मूल हस्त्यश्वमवसादयेत्। हिङ्गुरात-बलगुप्तयोरत्यन्तलुब्धप्रकृतिकयोः सकल राज्यप्रदानेनाप्यपरितुष्यतोरनुग्रहः कथं कर्तुं शक्यः? रा।जसेन-भागुरायणयोस्तु धनप्राणनाशभीतयोः कुतोऽनुग्रहस्यावकाशः? लोहि-ताक्ष-विजयवर्मणोरपि दायादमसहमानयोरतिमानिनोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यतीति परिहृतः पूर्वः पक्षः। उत्तरोऽपि खलु 'वयमचिरा-दधिगतनन्दैश्वर्याः सहोत्थायिनं प्रधानपुरुषवर्गमुग्रेण दण्डेन पीडयन्तो नन्दकुलानुरक्तानां प्रकृतीनामविश्वास्या भवाम' इत्यतः परिहृत एव। तदेवमनुगृहीतास्मद्भृत्यपक्षो राक्षसोपदेशश्रवणप्रवणो महीयसा म्लेच्छ-बलेन परिवृतः पितृवधामर्षी पर्वतकपुत्रो मलयकेतुरस्मानभियोक्तुमुद्यत इति, सोऽयं व्यायामकालो नोत्सवकाल इति । अतो दुर्गसंस्कारे आरब्धव्ये किं कौमुदीमहोत्सवेन ? इति प्रतिषिद्धः।

एष एव समयः सेनायाः सज्जीकरणाय। न तु उत्सवस्य कृते

**राजा** - आर्य! बहुप्रष्टव्यमत्र।

**चाणक्यः** - वृषल ! विश्रब्धं पृच्छ, ममापि बह्वाख्येयमत्र ।

**राजा** - एवं, पृच्छामि ।

**चाणक्यः** - अहमेप्येष कथयामि ।

**राजा** - योऽयमस्माकमस्य सर्वस्यैवानर्थस्य हेतुर्मलयकेतुः स कस्मादार्येणापक्रामन्नुपेक्षितः ?

**चाणक्यः** - वृषल! मलयेकेतोरप्रक्रमणानुपेक्षणे द्वयी गतिः स्यात्, अनुगृह्येत निगृह्येत वा। अनुग्रहे 'पूर्वप्रतिश्रुतं राज्यार्द्धं प्रतिपाद्येत'। निग्रहे

तावत् 'पर्वतकोऽस्माभिर्व्यापादित' इति कृतघ्नतायाः स्वयं हस्तो दत्तः स्यात्। प्रतिश्रुतार्द्धराज्यप्रतिपादनेऽपि 'पर्वतकविनाशः केवलं कृतघ्नता-मात्रफलः स्यात्' इति मलयकेतुरपक्रामन्नुपेक्षितः।

**राजा** - अत्र तावदेवम्। राक्षसः पुनरिहैवान्तर्नगरे वर्तमान आर्येणोपेक्षित इत्यत्र किमुत्तरमार्यस्य ?

**चाणक्यः** - राक्षसोऽपि खलु निजस्वामिनि स्थिरानुरागित्वात् सुचि-रमेकत्र वासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तं विश्वास्यः, प्रज्ञा-पुरुषकाराभ्यामुपेतः, सहायसम्पदा युक्तः, कोषबलवानिहैवान्तर्नगरे वर्तमानो महान्तं खल्वन्तःकोपमुत्पादयेत्। दूरीकृतस्तु बाह्यकोपमु-त्पादयन्नपि न दुःखसाध्यो भविष्यतीत्यतोऽपक्रामन्नुपेक्षितः।

**राजा** - तत् किमर्थमिहस्थ एवोपायैर्नोपक्रान्तः?

**चाणक्यः** - अथ कथमपक्रान्तो भविष्यति ? ननु उपायैरेवासौ हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः । दूरीकरणस्य चोक्तं प्रयोजनम् ।

**राजा** - आर्य ! कस्माद्विक्रम्य न गृहीतः?

**चाणक्यः** - वृषल ! राक्षसः खल्वसौ विक्रम्य निगृह्यमाणः स्वयं वा विनश्येत्, युष्मद्बलानि वा विनाशयेत् । एवं सत्युभयथाऽपि दोषः।

*राक्षसस्याभियुक्तत्वे दोषं दर्शयन्नाह---*

**पश्य-**

राक्षसः वनगज इव सामादिभिरूपायैः वशीकरणीयः

**स हि भृशमभियुक्तो यद्युपेयाद् विनाशं**
**ननु वृषल ! वियुक्तस्तादृशेनापि पुंसा।**
**अथ तव बलमुख्यान्नाशयेत् साऽपि पीडा**
**वनगज इव तस्मात् सोऽभ्युपायैर्विनेयः ॥२५॥**

*अन्वयः - सः हि भृशम् अभियुक्तः यदि विनाशम् उपेयात् ननु, वृषल ! तादृशेन पुंसा वियुक्तः असि अथ तव बलमुख्यान् नाशयेत् सा अपि पीडा तस्मात् सः वनगजः इव अभ्युपायैः विनेयः।*

*भावार्थः - स हि राक्षसः अत्यन्तं विक्रम्य निगृह्यमाणः सन् म्रियेत तदा निश्चयेन तादृशप्रज्ञाविक्रमभक्तिगुणान्वितेन पुरुषरत्नेन त्वं विरहितो भवेः*

*इति प्रथमा पीडा किञ्च यदि अस्मद् बलैः समाक्रान्तः स प्रधानप्रधानसेनापतीन् हन्यात् तदा साऽपि पीडा अस्मत्कृते महानर्थकरी भवेदिति कारणात्। नव बद्धगज इव स सामादिभिरुपायैः वशीकरणीयः इति। अत्र नवगजेन राक्षससादृश्यवर्णनात् उपमालङ्कारः। मालिनीवृत्तम्।*

**राजा** - न शक्नुमो वयमार्यस्य मतिमतिशयितुं, सर्वथाऽमात्यराक्षस एवात्र प्रशस्यतरः।

**चाणक्यः** - (सक्रोधम्) 'न भवानि'ति वाक्यशेषः। मा तावदेवम् । भो वृषल! तेन किं कृतम् ?

**राजा** - यदि न ज्ञायते, तदा श्रूयताम् । तेन खलु महात्मना –

*चाणक्यतोऽपि राक्षसस्य वीरकृत्यमुपपादयनाह--*

चन्द्गुप्तस्य राक्षसप्रशंसा

**लब्धायां पुरि यावदिच्छमुषितं, कृत्वा पदं नो गले**
**व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः ।**
**अत्यर्थं विपुलैः सुनीतिविभवैः सम्मोहमापादिता**
**विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषु नः ॥२६॥**

*अन्वयः- लब्धायां पुरि नः गले पदं कृत्वा यावदिच्छम् उषितम्, अस्मद्-बलानां जयघोषणादिषु बलात् व्याघातः कृतः, विपुलैः स्वनीतिविमलैः एष अत्यर्थं सम्मोहम् आपादिताः, नः मतयः विश्वास्येषु अपि स्वेषु वर्गेषु न विश्वसन्ति।*

*भावार्थः- अस्माभिः निरुद्धासारप्रसारतया बलवदुपनिरुद्धं पुरं असुरक्षं पश्यन् स्वेच्छानुसारं नः गले पदं कृत्वाऽस्मानविगणय्य तेन उषितं अस्मत्सैन्यानां विजयघोषणादिषु बलात् प्रत्यूहः आचरितः। किञ्च तस्य अत्यर्थं सुनीतिविभवैः सम्मोहं प्राप्ताः नः मतयः विश्वासयोग्येषु अपि स्वकीयेषु पक्षेषु न विश्वसन्ति।*

*तथा च लब्धाधिकारा अपि वयं तस्य प्रतीकारं कर्तुमसमर्था इति। महात्मा स राक्षसः शूरः मतिमान् साहसी च अतः अत्रोदात्तातिशयोक्त्योः संसृष्टिः, शार्दूलविक्रीडितं छन्दः।*

**चाणक्यः** - (विहस्य) वृषल ! एतत् कृतं राक्षसेन ?

**राजा -** अथ किम्? एतत् कृतममात्यराक्षसेन ।

**चाणक्यः -** वृषल ! मया पुनर्जातं, नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतुरधिराज्यमारोपितः।

**राजा -** अलमुपालभ्य। आर्य ! दैवेनेदमनुष्ठितं किमार्यस्य ?

**चाणक्यः -** हे मत्सरिन्!

*स्वशक्त्या साधितं नन्दध्वंसादिव्यापारं स्वगुणविद्वेषिणा नृपतिना दैवकृतमिति व्याख्यातमाकर्ण्य श्लोकद्वयेन स्वस्यालौकिकशक्तिख्यापनपुरःसरं तस्य अनन्यसाधनत्वमुपपादयन्नाह--*

**आरुह्यारूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडां**
**लोकप्रत्यक्षमुग्रां सकलरिपुकुलोच्छेददीर्घां प्रतिज्ञाम्।**
**केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते**
**नन्दाः पर्यायभूताः पशव इव हताः पश्यतो राक्षसस्य ॥२७॥**

*अन्वयः - लोकप्रत्यक्षम् आरूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडाम् उग्रां सकलरिपुकुलोच्छेददीर्घां प्रतिज्ञाम् आरुह्य केन अन्येन अवलिप्ता नवनवतिशतद्रव्यकोटीश्वराः ते नन्दाः राक्षसस्य पश्यतः एव पर्यायभूताः पशवः एव हताः।*

***भावार्थः-** प्रवृद्धकोपाविष्टकुटिलीभूतया अग्राङ्गुल्या बन्धनच्यावितचूडां सकलरिपुकुलोच्छेदातिमहतीं सर्वलोकसमक्षं नन्दनवविनाशहेतुभूतां सर्वलोकज्ञां दारुणां प्रतिज्ञामाश्रित्य मदन्येन केन जनेन राक्षसस्य समक्षं प्रचुरैश्वर्यशालिनः गर्वान्वित नवनन्दाः एकदामनिबद्धाः पशव इव क्रमेण विनाशिताः। एकदामनिबद्धाः पशव यथा नवनन्दाः क्रमेण हताः' इति सादृश्योक्तेः उपमालङ्कारः। स्रग्धरावृत्तम्।*

**अपि च -**

**गृध्रैराबद्धचक्रं वियति विचलितैर्दीर्घनिष्कम्पपक्षै-**
**धूमैर्ध्वस्तार्कभासां सघनमिव दिशां मण्डलं दर्शयन्तः।**
**नन्दैरानन्दयन्तः पितृवननिलयान् प्राणिनः पश्य चैतान्**
**निर्वान्त्यद्यापि नैते स्रुतबहलवसावाहिनो हव्यवाहाः ॥२८॥**

*अन्वयः- पश्य, वियति आवद्धचक्रं विचलितैः दीर्घनिष्कम्पपक्षः गृध्रैः धूमैः ध्वस्तार्कभासां दिशां मण्डलम् इव दर्शयन्तः नन्दैः च पितृवननिलयान्*

*एतान् प्राणिनः आनन्दयन्तः स्रुतवहलवसावाहिनः एते हव्यवाहाः अद्य अपि च निर्वान्ति।*

***भावार्थः*** *- आकाशे रचितचक्राकारवेष्टनं यथा स्यात्तथा उड्डीयमानैः आयतानिश्चलपक्षैः गृध्रैरिव धूमैः तिरोहितसूर्यकिरणानां दिशां मण्डलं घनान्धकारितमिव दर्शयन्तः श्मशानवासिनः प्रेतादिप्राणिनः हर्षयन्तः दंदह्यमानदेहच्युतवसावाहिनः एते पुरोदृश्यमानाः नवनन्दानां चिताग्नयः अद्यापि न प्रशाम्यन्ति। इति पश्य। अतीतेऽपि विषये रोषावेशादेतान्' इति बुद्धौ कृत्वा निर्देशः। अतएव भाविकालङ्कारः गृध्रैरिव धूमैरित्यत्र उत्प्रेक्षा च। स्रग्धरावृत्तम्।*

**राजा** - अन्येनैवेदमनुष्ठितम्।

**चाणक्यः** - आः, केन?

**राजा** - नन्दकुलविद्वेषिणा दैवेन।

दैवमविद्वांसः प्रमाणयन्ति।

**चाणक्यः** - दैवमविद्वांसः प्रमाणयन्ति।

विद्वांसोऽप्यविकत्थना भवन्ति

**राजा** - विद्वांसोऽप्यविकत्थना भवन्ति ।

**चाणक्यः** - (सक्रोधम्) वृषल ! वृषल !! भृत्यमिव मामारोढुमिच्छसि?

पुनः चाणक्यः क्रुद्धः भवति

*वृषलवचसातिक्रुद्धः चाणक्यः कथयति--*

**शिखां मोक्तुं बद्धामपि पुनरयं धावति करः,**
(भूमौ पादप्रहारं कृत्व)
**प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः।**
**प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना**
**परीतः कालेन ज्वलसि मम क्रोधदहनम् ॥२९॥**

*अन्वयः- बद्धाम् अपि शिखां मोक्तुम् अयं करः धावति । एषः चरणः अपि पुनः प्रतिज्ञाम् आरोढुं चलति । नन्दानां प्रणाशात् प्रशमम् उपयातं मम क्रोधदहनम् अधुना कालेन परीतः त्वं ज्वलयसि॥*

***भावार्थः*** *- नन्दविनाशरूपप्रतिज्ञायाः पूर्णत्वकारणात् बद्धुमिष्टामपि शिखां मोक्तुं मदीयः करः प्रसभं प्रसरति, एष चरणः पुनः प्रतिज्ञां कर्तुं अग्रेसरो भवति। किञ्च अधुना मृत्युग्रस्तस्त्वं नन्दप्रणाशात् प्रशममुपयातं क्रोधवह्निम् उद्दीपयति।*

*अत्र त्वं कालेन परीत इव इत्यत्र प्रतीयमाना उत्प्रेक्षा। शिखरिणीवृत्तम्।*

**राजा** - (सावेगं स्वगतम्) अये ! तत् कथं सत्यमेव कुपित आर्यः ? तथा हि-

*वास्तविकक्रोधचिह्नम् संदर्शयन्नाह--*

सञ्जातोदग्रकम्पं कथमपि धरया धारितः पादघातः

**संरम्भस्पन्दिपक्ष्मक्षरदमलजलक्षालनक्षामयाऽपि**
**भ्रूभङ्गोद्भेदधूमं ज्वलितमिव पुनः पिङ्गया नेत्रभासा ।**
**मन्ये, रुद्रस्य रौद्रं रसमभिनयतस्ताण्डवे संस्मरन्त्या**
**सञ्जातोदग्रकम्पं कथमपि धरया धारितः पादघातः ॥३०॥**

*अन्वयः - संरम्भोत्पन्दिपक्ष्मक्षरदमलजलक्षालनक्षामया अपि पिङ्गया नेत्रभासा भ्रूभङ्गोद्भेदधूमं पुरः ज्वलितम् इव मन्ये ताण्डवेषु रौद्रं रसं अभिनयतः रुद्रस्य स्मरन्त्या धरया सञ्जातोग्रकम्पं कथम् अपि पादघातः धारितः।*

*भावार्थः - कोधावेशेन चलतः पक्ष्मणः निःसरतोऽश्रुजलस्य क्षालनेन क्षीणया अरुणया नयनकान्त्या भ्रुकुट्युद्भेदधूमं पुरोभागे प्रदीप्तमिव, ताण्डवे रौद्रं रसं अभिनयन्तं रुद्रं संस्मरन्त्या पृथिव्या चाणक्यकृतोऽयं पादप्रहारः समुत्पन्नमहाप्रकम्पमिव धारित इति संभावयामि।*

*अस्मिन् पद्ये रूपकोत्प्रेक्षास्मरणालङ्काराः। स्रग्धरा वृत्तम्।*

एष भवतः कौटिल्यबुद्धिविजि-गीषोर्बुद्धेः प्रकर्षः

**चाणक्यः**:- (कृतककोपं संहृत्य) वृषल! वृषल !! अलमुत्तरोत्तरेण। यद्यस्मत्तो वरीयान् राक्षसोऽवगम्यते, तस्मादिदं शस्त्रं तस्मै दीयताम्। (इति शस्त्रमुत्सृज्य च आकाशे लक्ष्यं बद्ध्वा स्वगतम्) राक्षस ! राक्षस !! एष भवतः कौटिल्यबुद्धिविजिगीषोर्बुद्धेः प्रकर्षः।

*संप्रति आत्मबुद्धिप्रकर्षं दर्शयन् राक्षसः स्वयमेव स्वानिष्टं कृतवान् इत्याह-*

राक्षसः स्वयमेव स्वानिष्टं कृतवान्

**चाणक्यतः स्खलितभक्तिमहं सुखेन**
**जेष्यामि मौर्यमिति सम्प्रति यः प्रयुक्तः ।**
**भेदः, किलैष भवता सकलः स एव**
**सम्पत्स्यते, शठ ! तवैव हि दूषणाय ॥३१॥**

*अन्वयः - शठ ! चाणक्यतः स्खलितभक्तिं मौर्यम् अहं सुखेन जेष्यामि - इति सम्प्रति भवता यः एषः भेदः प्रयुक्तः किल, सः सकलः एव तव एव हि दूषणाय सम्पत्स्यते।*

*भावार्थः - अरे शठ! चाणक्यतः अपराज्यमानं चन्द्रगुप्तं प्रयत्नं विनैव जेष्यामीति बुद्ध्या भवता या एषा समग्रा भेदनीतिर्विहिता, सा सकला एवेयं भेदनीति भवतः मलयकेतुं भेत्स्यतीति' तवैव दूषणाय परिणंस्यतीति। अत्र विषमालङ्कारः। वसन्ततिलका वृत्तम्।*

(इति निष्क्रान्तः।)

**राजा-** आर्य ! वैहीनरे ! 'अद्य प्रभृत्यनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राजकार्याणि करिष्यती'ति गृहीतार्थाः प्रकृतयः क्रियन्ताम्।

**कञ्चुकी-** (स्वगतम्) कथं निरुपपद एव चाणक्यो, नार्यचाणक्य इति। हन्त! सत्यमेव हृतोऽधिकारः। अथवा न खल्वत्र वस्तुनि देवदोषः।

*देवस्य दोषाभाव इति यदुक्तं तदेव समर्थयति--*

नृपः यत् असत् कुरुते सः सचिवस्य एष दोषः

**स दोषः सचिवस्यैव यदसत् कुरुते नृपः ।**
**याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥३२॥**

*अन्वयः - नृपः यत् असत् कुरुते सः सचिवस्य एष दोषः। यन्तुः प्रमादेन गजः व्यालत्ववाच्यतां याति।*

*भावार्थः - यन्नृपः सचिवादि अनादररूपमसत्कार्यं आचरति; तत्र सचिवस्यैव दोषः। यतो हि गजः हस्तिपकस्य प्रमादेन अनवधानतया दुष्टगजत्वापवादं प्रयाति। मन्त्रिणा हि राजा कुपथगमनात् निवारयितव्यः, तदकरणे तस्यैव दोषभागित्वं न राज्ञः इति भावः। दृष्टान्तो नामालङ्कारः। पथ्यावक्त्रं छन्दः।*

**राजा -** आर्य ! कि विचारयसि ?

**कञ्चुकी -** देव ! न किञ्चिद्विचारयामि, किन्तु एतद्विज्ञापयामि, दिष्ट्या देव इदानीं देवः संवृत्त इति।

**राजा -** ( आत्मगतम्) एवमस्मासु गृह्यमाणेषु स्वकार्यसिद्धिकामः, सकामो भवत्वार्यः। (प्रकाशम्) शोणोत्तरे! अनेन शुष्ककलहेन शिरोवेदना मां बाधते, तच्छयनगृहमार्गमादेशय।

**प्रतीहारी -** एतु एतु महाराजः ।

**राजा -** (आसनादुत्थायात्मगतम्)

*गुरोश्चाणक्यस्यावमाननाकरणे अत्मनोऽविनयमाशङ्क्याह--*

आर्याज्ञया एव लङ्घितगौरवस्य मम बुद्धिः भूविवरं प्रवेष्टुम् इव प्रवृत्ता

**आर्याज्ञयैव मम लङ्घितगौरवस्य**
**बुद्धिः प्रवेष्टुमवनेविवरं प्रवृत्ता ।**
**ये सत्यमेव न गुरून् प्रतिमानयन्ति**
**तेषां कथं नु हृदयं न भिनत्ति लज्जा ? ॥३३॥**

*अन्वयः - आर्याज्ञया एव लङ्घितगौरवस्य मम बुद्धिः भूविवरम् इव प्रवेष्टुं प्रवृत्ता ये सत्यम् एव गुरून् न अतियापयन्ति तेषां हृदयं लज्जा कथं नु न भिनत्ति।*

*भावार्थः – स्वयमार्यचाणक्योपदेशेन यद्यपि मया तस्य मर्यादातिक्रान्ता अनेनासत्कार्येण मे बुद्धिः पातालं प्रविशति। किन्तु ये सत्यमेव स्वगुरून् नाद्रियन्ते तेषां हृदयं लज्जया कथन्न विदीर्यते इत्याश्चर्यम्।*

*अत्र बुद्धेः विवरप्रवेशं प्रति लङ्घितमर्यादायाः हेतुत्वात् काव्यलिङ्गालङ्कारः। वसन्ततिलकम् वृत्तम्।*

(इति निष्क्रान्ताः सर्वे ।)

इति मुद्राराक्षसे तृतीयोऽङ्कः।

## Summarised Overview

चन्द्रगुप्तः कौमुदीमहोत्सवविषयज्ञानार्थं कुसुमपुरस्य सुगङ्गप्रासादे गच्छति। चन्द्रगुप्तः अस्य कौमुदीमहोत्सवस्य निषेधस्य विषये ज्ञानं नास्ति इव कार्यं करोति। शरत्कालवर्णनम्। परन्तु कुसुमपुरे कौमुदीमहोत्सवं प्रासादं च दृष्ट्वा कञ्चुक्याः तस्य कारणं पृच्छति। कञ्चुकी चाणक्येन कौमुदीमहोत्सवनिषेधस्य विषयं कथयति। चाणक्यस्य कुटिलतन्त्रम्। कञ्चुक्याः दासवृत्तिविलापम्। चाणक्यभवनम्, चाणक्यदर्शनम्। चन्द्रगुप्तः कौमुदीमहोत्सवस्य निषेधस्य कारणं चाणक्यं प्रति पृच्छति। चाणक्यः अस्य प्रत्यक्षम् उत्तरम् न दत्त्वा वदति यत् त्वमेव सचिवायतसिद्धियुक्तः, अर्थात् मन्त्रीसहायात् सफलतां प्राप्नोति। अतः वयम् इच्छानुसारं कार्यं करिष्यामः।

चन्द्रगुप्तस्य वैतालिकद्वयेषु अन्यतरः वैतालिकः राक्षसगुप्तचरः चाणक्यविरुद्धं चन्द्रगुप्तं प्रेरयितुं राक्षसस्य पूर्वादेशानुसारं श्लोकं पठति। एतस्मिन् अन्तरे राक्षसेन प्रेरितौ वैतालिकौ शरत्कालरमणीयकान्तिं वर्णयतः। चन्द्रगुप्तः स्वस्य कञ्चुकीं सुवर्णशतसहस्रं दातुम् आज्ञापयत्। परन्तु चाणक्यः तं निवारयति। अनेन चन्द्रगुप्तः अधिकं क्रुद्धः भवति। चाणक्यः वदति स्वयमनभियुक्तानां राज्ञामेते दोषाः सम्भवन्ति। तद्यदि न सहते, तदा स्वयमेवाभियुज्यस्व। चन्द्रगुप्तः एतत् स्वीकरोति अधुना सः राजात्वेन चाणक्यं

कौमुदीपर्वनिषेधस्य कारणं पृच्छति। चाणक्यः ब्रूहि -'यत् भद्रभटप्रभृतीनामितोऽपरागादपक्रम्य मलयकेतुमाश्रितानां लेख्यपत्रं तत्तावद् दीयतामि'ति। चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणा-मितोऽपक्रम्य मलयकेतुमाश्रितानां प्रमाणलेख्यपत्रम्। यः इतः पलायितः आसीत्, मलयकेतुः शरणं प्राप्तवान् आसीत्। चाणक्यः चन्द्रगुप्तं कथयति यत् सः मलयकेतुः राक्षसं किमर्थं न हतः। चन्द्रगुप्तः स्वस्य असन्तुष्टिं प्रकटयति यत् यद्यपि वयं भवन्तं (चाणक्यम्) तर्कद्वारा जितुम् न शक्नुमः तथापि सर्वथा राक्षसः अधिकं प्रशंसनीयः अस्ति तथा च सः स्वस्य विजयस्य श्रेयः चाणक्यस्य कृते न दत्त्वा दैवस्य श्रेयः अपि ददाति। अनेन चाणक्यः अतीव क्रुद्धः भवति। एवं प्रकारेण चाणक्यचन्द्रगुप्तयोः कृतककलहः भवति। चाणक्यः मन्त्रिपदस्य त्यागपत्रस्य घोषणां करोति। चन्द्रगुप्तः एवं वदति यत् अहं चाणक्यं विना राज्यं चालयिष्यामि इति। चन्द्रगुप्तः स्वस्य कञ्चुकीवैहीनरं राज्ये घोषयितुम् आदेशं ददाति यत् 'अमात्यपदात् चाणक्यस्य निष्कासनानन्तरं स्वयं चन्द्रगुप्तः शासनं करिष्यति' इति।

# Assignments

उत्तराणि लिखत।

1. चन्द्रगुप्तस्य कञ्चुकी कः?
2. कौमुदीमहोत्सवनिषेधस्य कारणं किम्?

टिप्पणिं लिखत ।

1. प्रासादवर्णना
2. कृतककलहम्।
3. चाणक्यस्य कुटिलतन्त्रम्
4. राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम् ।
5. परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः ।
6. दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः ।
7. श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् ।
8. सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः ।
9. निरीहाणामीशस्तृणमिव तिरस्कारविषयः ।
10. न निष्प्रयोजनमधिकारवन्तः प्रभुभिराहूयन्ते ।
11. दैवमविद्वांसः प्रमाणयन्ति ।
12. विद्वांसोऽप्यविकत्थना भवन्ति ।

श्लोकं व्याख्यात ।

1. तीक्ष्णादुद्विजते, मृतौ परिभवत्रासान्न सन्तिष्ठते,

मूर्खं द्वेष्टि, न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि ।

शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो,

श्रीर्लब्धप्रसरेव वैशवनिता दुःखोपचर्या भृशम् ॥५॥

2. इह हि रचयन् साध्वीं शिष्यः क्रियां न निवार्यते
   त्यजति तु यदा मार्गं मोहात्, तदा गुरुरङ्कुशः।
   विनयरुचयस्तस्मात् सन्तः सदेव निरङ्कुशाः
   परतरमतः स्वातन्त्र्येभ्यो वयं हि पराङ्मुखाः। ॥६॥
3. कृतागाः कौटिल्यो भुजग इव निर्याय नगराद्
   यथा नन्दं हत्वा नृपतिमकरोन्मौर्यवृषलम्।
   तथाऽहं मौर्येन्दोः श्रियमपहरामीति कृतधीः
   प्रभावं मद्बुद्धेरतिशयितुमेष व्यवसितः ॥११॥
4. उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रो
   नन्दोऽसौ न भवति चन्द्रगुप्त एषः।
   चाणक्यस्त्वमपि च नैव, केवलं ते
   साधर्म्यं मदनुकृतेः प्रधानवैरम् ॥१२॥
5. भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः ।
   परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ॥२३॥
6. स दोषः सचिवस्यैव यदसत् कुरुते नृपः ।
   याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥३२॥
7. आर्याज्ञयैव मम लङ्घितगौरवस्य
   बुद्धिः प्रवेष्टुमवनेविवरं प्रवृत्ता ।
   ये सत्यमेव न गुरून् प्रतिमानयन्ति
   तेषां कथं नु हृदयं न भिनत्ति लज्जा ? ॥३३॥

निबन्धात्मकप्रश्नौ ।

1. शरत्कालवर्णनम्।
2. मुद्राराक्षसे तृतीयाङ्कस्य कथासारं लिखत।

## Suggested Readings

1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum

## References

1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वारणासि।
2. महाकवि-विशाखदत्तप्रणीतम् मुद्राराक्षसम्, (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय, चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.
5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# मुद्राराक्षसे चतुर्थः अङ्कः

## Learning Outcomes

- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् अवगच्छति ।
- मुद्राराक्षसनाटकपठनद्वारा राजनैतिकनाटकानां सविशेषज्ञानं जानाति।
- मुद्राराक्षसस्य चतुर्थाङ्ककथासारं गृह्णाति।
- संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यम्।
- चाणक्यस्य कूटनीतिनैपुण्यम्।
- श्लोकानां पठनेन साहित्याभिरुचिः जायते।

## Background

मुद्राराक्षसे राक्षसोद्योगनामकः चतुर्थः अङ्कः। यदा चन्द्रगुप्तः सुगङ्गप्रासादे आरुह्य कौमुदी-महोत्सवविहीनं कुसुमपुरं पश्यति तदा सः अत्यन्तं क्रुद्धः भूत्वा काञ्चुकिद्वारा चाणक्यम् आह्वयति। चाणक्यं कौमुदीपर्वनिषेधस्य कारणं पृच्छति। चन्द्रगुप्तः स्वस्य असन्तुष्टिं प्रकटयति यत् यद्यपि वयं भवन्तं (चाणक्यम्) तर्कद्वारा जितुम् न शक्नुमः तथापि सर्वथा राक्षसः अधिकं प्रशंसनीयः अस्ति तथा च सः स्वस्य विजयस्य श्रेयः चाणक्यस्य कृते न दत्त्वा दैवस्य श्रेयः अपि ददाति। अनेन चाणक्यः अतीव क्रुद्धः भवति। एवं प्रकारेण चाणक्यचन्द्रगुप्तयोः कृतककलहः भवति।

मलयकेतुः भागुरायणेन सह राक्षसस्य समीपं गच्छति, तस्मिन् एव काले कर्भकः नाम सेवकः आगत्य कुसुमपुरस्य वार्ताम् कथयति यत् उत्तेजितः सन् चन्द्रगुप्तः चाणक्यस्य निष्कासनं कृतवान् इति। मलयेकेतुः शत्रुविषये राक्षसेन सह वार्तालापं कृत्वा पुनः गच्छति। जीवसिद्धिः नाम क्षपणकः चन्द्रगुप्तेन सह मिलितुं चाणक्येन सह राक्षसस्य सम्पर्कं दर्शयति।

## Keywords

करभः पाटलीपुत्रादागतः, दुरात्मा चाणक्यवटुः, कुसुमपुरस्य वार्ता, अमात्यराक्षसस्य गृहम्, स्तनकलशः, सचिववृत्तान्तः, नन्दकुलविनाशदुर्मनसः पौरजनः, अभिमतबन्धुजनसमागमः, सुचिरममात्यगुणं, कोपकारणान्वेषणं, अतिमतिमान् चाणक्यः।

## Discussion

**चतुर्थोऽङ्कः**

**(ततः प्रविशत्यध्वगवेशः पुरुषः)**

**पुरुषः**- आश्चर्यम् ! आश्चर्यम् !!

*स्वस्वामिनिर्देशमत्याश्चर्यं समर्थयितुमाह—योजनशतमिति।*

**योजनशतं समधिकं को नाम गतागतमिह करोति।**
**अस्थानगमनगुरुका प्रभोराज्ञा यदि न भवति ॥१॥**

*अन्वयः – अस्थानगमनगुरुका प्रभोः आज्ञा यदि न भवति इह को नाम समधिकं योजनशतं गतागतं करोति॥*

*भावार्थः - यदि अकाण्डगमनविषये अनतिक्रमणीया, एवमविरतगमन-कारणेन नितान्तक्लिष्टा महती प्रभोः आज्ञा न भवति तदा योजनशतादप्यधिकं पाटलिपुत्रगमनं ततोऽपिहाविश्रान्तागमनं को नु कुर्यात्; न कोऽपीत्यर्थः। आर्यावृत्तम्, काव्यलिङ्गालङ्कारः॥*

राक्षसस्य गुप्तचरः करभकः

(परिश्रान्तवत् परिक्रम्य) तद्यावदमात्यराक्षसस्यैव गेहं गच्छामि। भोः! कोऽत्र दौवारिकाणाम्? निवेदय तावद् भर्तुः अमात्यराक्षसस्य 'एष खलु करभकः करभक इव कार्यं त्वरयन् पाटलिपुत्रादागतः' इति।

**दौवारिकः** - (प्रविश्य) भद्र ! मा उच्चैर्मन्त्रय, एष खलु भर्त्ता अमात्यराक्षसः कार्यचिन्ताजनितेन जागरणेन समुत्पन्नशीर्षवेदनोऽद्यापि तावन्न शयनतलं

मुश्चति; तस्मात् तिष्ठ तावन्मुहूर्त्तम्, यावत् तस्य लब्धावसरो भूत्वा भवत आगमनं निवेदयामि।

पुरुषः - भद्रमुख ! यथा ते रोचते।

(ततः प्रविशति शयनगत आसनगतेन शकटदासेन सह चिन्तितो राक्षसः)

राक्षसः - (आत्मगतम्)

*प्रतिकूलदैवात् स्वकार्यस्य वैयर्थ्यमनुचिन्त्य वैमनस्यमधिगच्छन्नाह--*

राक्षसः चाणक्यस्य विषये अतीव चिन्ता अस्ति

**मम विमृशतः कार्यारम्भे विधेरविधेयतां**
**सहजकुटिलां कौटिल्यस्य प्रचिन्तयतो मतिम् ।**
**अथ च विहिते मत्कृत्यानां निकाममुपग्रहे**
**कथमिदमिहेत्युन्निद्रस्य प्रयान्त्यनिशं निशाः ॥२॥**

*अन्वयः - कार्यारम्भे विधेः अविधेयतां विमृशतः अपि च कौटिल्यस्य कुटिलां मतिं प्रचिन्तयतः अपि च मत्कृत्यानां निकामम् उपग्रहे विहिते इह इदं कथम् इति उन्निद्रस्य अनिशं मम निशा प्रयाति॥*

*भावार्थः- कार्यारम्भ इव स्वकीय भाग्यस्य प्रतिकूलतां चिन्तयतः चाणक्यस्य दुर्विज्ञेयां मतिं च प्रचिन्तयतः किञ्च मत्कृत्यानां विषकन्यादिप्रयोगरूपाणां चाणक्येन सम्यक् विफलीकृते इदं कथं तेन साधितमिति संकल्पविकल्पयोर्निमग्नं स्यात्। जाग्रत मम सर्वा रात्रयः गच्छन्ति। हा हन्त ! न जाने किं भावि।*

*तत्तत् विषयचिन्तया जाग्रतैव मया बह्वयो निशा याप्यन्ते इत्यर्थः। अत्र काव्यलिङ्गमलङ्कारः। हरिणीवृत्तम्।*

*नाटकप्रणेतृवत् स्वकष्टं वर्णयन्नाह --*

अपि च -

**कार्योपक्षेपमादौ तनुमपि रचयस्तस्य विस्तारमिच्छन्**
**बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयश्च।**
**कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि, पुनः संहरन् कार्यजातं**
**कर्त्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ॥३॥**

*अन्वयः- आदौ तनुम् अपि कार्योपक्षेपं रचयन् तस्य विस्तारम् इच्छन् गर्भितानां च बीजानाम् अतिगहनं गूढं फलम् उद्भेदयन् बुद्ध्या विमर्शं*

*कुर्वन् प्रसृतम् अपि कार्यजातं पुनः संहरन् नाटकानां कर्त्ता वा अस्मद्विधः इमं क्लेशम् अनुभवति।*

*राजनीतिपक्षे प्रारम्भे स्वल्पं शत्रुविजयोद्देशेन सामाद्युपायं कुर्वन् पुनः प्रारब्धस्य कार्यस्य विस्तारबाहुल्यं अभिलषन्, किञ्च तत्रातिरहस्यं गुप्तं परिणामम् अङ्कुररूपेण प्रकटयन्, ततः राजनीतिप्रवणया स्वमत्या कर्त्तव्याकर्त्तव्यम् अनुसंदधन् विस्तृतं कार्यसमूहं अन्ते उपसंहरन् अस्मद्विधो जनः राजनीतिप्रयोगे नाटककर्त्ता इव क्लेशमनुभवति।*

*नाटकपक्षे-नाटककर्ता नाटकनिर्माणकार्ये मुखसन्धौ स्वल्पं बीजन्यासं प्रणयन् ततस्तस्य बीजस्य अभिव्यक्तिम् इच्छन्, पुनः अन्तर्गर्भाणां बीजानाम् अतिगहनं गूढं फलम् अन्विष्यन् ततः स्वविचारशक्त्या अन्वेषणं कुर्वन्, किञ्च तत्र यथायथं विप्रकीर्णं समस्तमर्थजातं, मुहुः उपसहरन् यथा महत् नाटकप्रणयनरूपं क्लेशमनुभवति तथाहं राजनीतौ चिन्तया उन्निद्रः सन् कष्टम् अनुभवामि। अत्र श्लेषदीपकालङ्कारौ। 'स्रग्धरा' वृत्तम् ॥*

तदपि नाम दुरात्मा चाणक्यवटुः-

**दौवारिकः** - (उपसृत्य) जयतु जयतु ।

**राक्षसः** - 'अतिसन्धातुं शक्यः स्यात्'-

**दौवारिकः** - अमात्यः।

**राक्षसः** - (वामाक्षिस्पन्दं सूचयित्वा आत्मगतम्) 'दुरात्मा चाणक्य-वटुजयतु, अतिसन्धातुं शक्यः स्यादमात्यः' इति वागीश्वरी वामाक्षि-स्पन्दनेन प्रस्तावगता प्रतिपादयति। तथापि नोद्यमस्त्याज्यः। (प्रकाशम्) भद्र ! किमसि वक्तुकामः?

**दौवारिकः** - अमात्य! एष खलु करभकः पाटलिपुत्रादागतः, इच्छति अमात्यं प्रेक्षितुम् ।

**राक्षसः** - अवारितं प्रवेशयैनम्।

**दौवारिकः** - (इति निष्क्रम्य पुरुषमुपसृत्य।) यदमात्य आज्ञापयति । भद्र ! एष खलु अमात्यस्तिष्ठति, तदुपसर्प एनम् ।

(इति निष्क्रान्तो दौवारिकः)

राक्षसस्य गुप्तचरः करभकः राक्षस-समीपे

**करभकः** - (राक्षसमुपसृत्य) जयतु जयत्वमात्यः।

**राक्षसः** - ( नाट्येनावलोक्य) भद्र करभक ! स्वागतम् । उपविश्यताम्।

**करभकः**- (इति भूमावुपविशति) यदमात्य आज्ञापयति।

**राक्षसः**- (आत्मगतम्) अथ कतमस्मिन् प्रयोजने मया अयं प्रणिधिः प्रहित इति प्रभूतत्वात् प्रयोजनानां न खल्ववधारयामि।

(इति चिन्तां नाटयति)।

(ततः प्रविशति वेत्रपाणिरपरः पुरुषः)

**पुरुषः**- अपसरत आर्याः ! अपसरत । अपेत मान्याः। अपेत। किं न पश्यथ ?

मलयकेतुः

**दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः।**
**कल्याणकुलधराणां देवानाञ्च मनुष्यदेवानाम् ॥४॥**

**अन्वयः**- *देवानां इव कल्याणकुलधराणां मनुष्यदेवानाम् अधन्यैः दर्शनम् अपि दुर्लभं प्रत्यासत्तिः दूरे।*

*भावार्थः- स्वहस्तधृतसकललोकमङ्गलानां मेरुवासिनां देवानामिव, महोदारराजवंशप्रभवाणां, मनुष्यदेवानाम् राज्ञां पामरैर्जनैः सान्निध्य-सम्बन्धो दूरे आस्तां तेषां दर्शनमपि दुर्लभमस्तीति भावः। अत्र देवनृपयोः प्रकृताप्रकृतयोरेकधर्मसम्बन्धाद्दीपकालङ्कारः। आर्यावृत्तम् ॥*

छद्ममित्रस्य भागुरायणेन मलयकेतोः सहितागमनम्

(आकाशे) इति निष्क्रान्तः पुरुषः। आर्याः! किं भणथ, किं निमित्तमेषाऽपसारणा क्रियते ? आर्याः! एष खलु कुमारो मलयकेतुः समुत्पन्नशीर्षवेदनममात्यराक्षसं श्रुत्वा प्रेक्षितुमिहैवागच्छति। एतेन कारणेनापसारणा क्रियते।

(ततः प्रविशति भागुरायणेन कञ्चुकिना चाऽनुगम्यमानो मलयकेतुः)

**मलयकेतुः** - (निःश्वस्यात्मगतम्) अद्य दशमो मासस्तातस्योपरतस्य। न चास्माभिर्वृथा पुरुषकारमुद्वहद्भिस्तमुद्दिश्य तोयाञ्जलिरप्यावर्जितः। अथवा, प्रतिज्ञातमेतत् पुरस्तात् –

*पितरि शत्रुकृतमत्याचारं संस्मृत्य प्रतिहिंसानलदग्धः एतावतापि कालेन प्रतीकाराकारणात् खिद्यमान आह--*

वक्षस्ताडनभिन्नरत्नवलयं भ्रष्टोत्तरीयांशुकं
हाहेत्युच्चरितार्त्तनादकरुणं भूरेणुरूक्षालकम् ।
तादृङ्मातृजनस्य शोकजनितं सम्प्रत्यवस्थान्तरं
शत्रुस्त्रीषु मया विधाय गुरवे देयो निवापाञ्जलिः ॥५॥

*अन्वयः - मातृजनस्य शोकजनितं वक्षः ताडनभिन्नरत्नवलयं भ्रष्टोत्तरीयांशुकं हा हा इति उच्चार्तनादकरुणं भूरेणुरूक्षालकं तादृक् अवस्थान्तरं सम्प्रति शत्रुस्त्रीषु विधाय मया गुरवे निवापाञ्जलिः देयः।*

***भावार्थः*** *- मातृगणशोकजन्यं वैधव्यदुःखाद् वक्षसः ताडनेन त्रुटितरत्नकङ्कणं दुःखातिशयेन स्खलितोत्तरीयाञ्चलं हा हेत्युच्चारितातनादकरुणं भूपांसुभिः रूक्षकेशं एतादृगवस्थान्तरं शत्रुजनस्त्रीषु विधाय तदनन्तरं मया स्वपित्र्युद्देशेन निवापाञ्जलिः कर्तव्यः इति प्रतिज्ञातमित्यर्थः।*

*अत्र शत्रुभिः मातृजनेष्विवास्माभिरपि विपक्षावरोधेषु दण्डः पातनीयः इति समविनिमयरूपः परिवृत्तिरलङ्कारः। शार्दूलविक्रीडितं छन्दः।*

तत् किमिह बहुना ?

*वीरः स्ववीर्येण शत्रून् पराभवेत्, अन्यथा प्राणानेव विमुञ्चेदिति विचार्य कर्तव्यमाह--*

उद्यच्छता धुरमकापुरुषानुरूपां
गन्तव्यमाजिनिधनेन पितुः पथा वा ।
आच्छिद्य वा स्वजननीजनलोचनेभ्यो
नेयो मया रिपुवधूनयनानि बाष्पः ॥६॥

*अन्वयः - अकापुरुषानुरूपं धुरम् उद्यच्छता आजिनिधनेन पितुः पथा वा गन्तव्यं वा मया स्वजननीजनलोचनेभ्यः आच्छिद्य रिपुवधूनयनानि वाच्यः नेयः।*

***भावार्थः-*** *मया वीरपुरुषोऽचितां धुरमुद्वहता मरणं प्राप्तव्यम्, यद्वा स्वजननीजनलोचनेभ्यः समुद्गतमश्रुप्रवाहमाच्छिद्य रिपुजनवधूनयनानि प्रापयितव्यः। अत्र विरोधालङ्कारः। वसन्ततिलका वृत्तम्।*

(प्रकाशम्) आर्य जाजले! उच्यन्तामस्मद्वचनादनुयायिनो राजानः - 'एक एवाहममात्यराक्षसस्यातर्कितागमनेन प्रीतिमुत्पादयितुमिच्छामि, अतः कृतमनुगमनक्लेशेने 'ति।

'न खल्वहं केनचिदनुगन्तव्यः'

**कञ्चुकी** - यदाज्ञापयति कुमारः। (परिक्रम्याकाशे) भो भो राजानः! कुमारः समाज्ञापयति 'न खल्वहं केनचिदनुगन्तव्यः' इति।

(विलोक्य सहर्षम्) कुमार ! कुमार !! एते भवदाज्ञासमनन्तरमेव प्रति-निवृत्ताः सर्व एव राजानः। पश्यतु कुमारः –

*मलयकेतोराज्ञया प्रतिनिवृत्तानां अश्वभूपालादीनामवस्थां वर्णयति--*

**सोत्सेधैः स्कन्धदेशैः खरतरकविकाकर्षणात्यर्थभुग्नै-**
**रश्वाः कैश्चिन्निरुद्धाः खमिव खरपुटैः खण्डयन्तः पुरस्तात्।**
**केचिन्मातङ्गमुख्यैर्विहतजवतया मूकघण्टैर्निवृत्ता**
**मर्यादां भूमिपाला जलधय इव ते देव! नोल्लङ्घयन्ति ॥७॥**

*अन्वयः - कैश्चित् खुरपुटैः पुरस्तात् खं खण्डयन्त इव खरतर-कविकाकर्षणात्यर्थभुग्नैः सोत्सेधैः स्कन्धदेशैः अश्वाः निरुद्धाः, केचित् विहतजवतया मूकघण्टैः मातङ्गमुख्यैः निवृत्ताः, देव! जलधयः इव भूमिपालाः ते मर्यादां न उल्लङ्घयन्ति।*

*भावार्थः - कैश्चित् भूमिपालैः तीक्ष्णलोहकण्टककीलितानां खलीनानाम् आकर्षणेन अतिवक्रैः समुन्नतैः स्कन्धदेशैरुपलक्षिताः किञ्च पुरस्तात् खुरपुटैः आकाशं विदीर्णयन्तः स्वकीयाश्वाः निरुद्धाः। केचिच्च राजानः वेगावरोधात् निःशब्दघण्टारवैः गजराजैः सह तत्क्षणमेव परावृत्ताः। अतः हे महाराज! यथा सागरः वेलां नातिक्रामति तथा एते राजानोऽपि भवदाज्ञां नोल्लङ्घयन्ति।*

*एतेन मलयकेतोः अस्खलितादेशत्वं सूचितम्। अत्राश्व-मातङ्गादीनां स्वभावर्णनात् स्वभावोक्तिः, खमिव खण्डयन्तः इत्यत्रोत्प्रेक्षा च, जलधय इव इत्यत्रोपमा च।*

**मलयकेतुः** - आर्य जाजले! त्वमपि सपरिजनो निवर्तस्व। भागुरायण एको मामनुगच्छतु।

**कञ्चुकी** - यदाज्ञापयति कुमारः। (इति सपरिजनो निष्क्रान्तः।)

न
वयममात्यराक्षसद्वारेण
कुमारमाश्रयणीयमाश्रया
महे

**मलयकेतुः** - सखे भागुरायण! विज्ञापितोऽहमिहागच्छद्भिर्भद्रभट-प्रभृतिभिः, यथा- 'न वयममात्यराक्षसद्वारेण कुमारमाश्रयणीयमाश्रयामहे, किन्तु कुमारस्य सेनापतिं शिखरसेनमूरीकृत्य, दुष्टामात्यपरिगृहीताच्चन्द्र-गुप्तादपरक्ताः सन्तः कुमारमाभिगामिकगुणयोगादाश्रयणीयमाश्रयामह' इति। तन्मया सुचिरमपि विचारयता तेषां न वाक्यार्थोऽधिगतः।

**भागुरायणः** - कुमार! नायमत्यन्तदुर्बोधोऽर्थः। पश्य - 'विजिगीषुमात्मगुण-सम्पन्नं प्रियहितद्वारेणाश्रयणीयमाश्रयेदि'ति ननु न्याय्य एवायम्।

**मलयकेतुः** - सखे भागुरायण! नन्वस्माकममात्यराक्षसः प्रियतमो हिततमश्च।

**भागुरायणः** - कुमार! एवमेतत्, किन्तु अमात्यराक्षसश्चाणक्ये बद्धवैरो न तु चन्द्रगुप्ते, तद्यदि कदाचिच्चन्द्रगुप्तश्चाणक्यमतिजितकाशिनमसहमानः साचिव्यादवरोपयेत्, ततो नन्दकुलभक्त्या, 'नन्दान्वय एवायमि'ति कृत्वा, सुहृज्जनापेक्षया च, अमात्यराक्षसश्चन्द्रगुप्तेन सह सन्दधीत। चन्द्रगुप्तोऽपि 'पितृपारम्पर्यागत एवायमि'ति कृत्वा सन्धिमनुमन्येत। एवं सत्यस्मास्वपि कुमारो न विश्वसेदित्ययमेषां वाक्यार्थः।

**मलयकेतुः** - युज्यते । सखे भागुरायण ! अमात्यराक्षसस्य गृहमार्गमादेशय।

**भागुरायणः** - इत इतः कुमारः। (इत्युभौ परिक्रामतः) कुमार! इदममात्यराक्षसस्य गृहम्; प्रविशतु कुमारः।

**मलयकेतुः** - एष प्रविशामि । (इत्युभौ प्रवेशनं नाटयतः।)

**राक्षसः** - ( आत्मगतम्) आः! स्मृतम्। (प्रकाशम्) भद्र ! अपि दृष्टस्त्वया कुसुमपुरे वैतालिकः स्तनकलशः ?

**करभकः**- अमात्य! अथ किम्?

**मलयकेतुः**- सखे ! भागुरायण ! कुसुमपुरवृत्तान्तः प्रस्तूयते, तन्नोपसर्पावः शृणुवस्तावत्-

*तदानीं तत्रानपसृत्य कुसुमपुरवृत्तान्तश्रवणे हेतुमाह--*

सत्त्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः ।
अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः ॥८॥

*अन्वयः - मन्त्रिणः राज्ञां पुरः सत्त्वभङ्गभयात् अन्यथा कथयन्ति, विवृतार्थेषु स्वैरालापेषु अन्यथा।*

*भावार्थः - सचिवाः मन्त्रितार्थस्य प्रकाशभयात् राज्ञां समक्षम् अन्यथासिद्धस्य वस्तुनः विषये भिन्नप्रकारेण वर्णयन्ति, किन्तु सुहृद्भिः सह परस्परविस्पष्टार्थेषु स्वेच्छालापेषु तदेवान्यथाप्रकारेण कथयन्ति। एवं राज्ञां समक्षमन्यत् सुहृद्भिः सह अन्यदिति सचिवानां कर्म। राज्ञां समीपे अन्यथास्थितवस्तुनः अन्यथाकथनमेवामात्यकर्म इति भावः। पथ्यावक्त्रं छन्दः। अत्र काव्यलिङ्गमलङ्कारः। अनुष्टुप् वृत्तम्।*

**भागुरायणः** - यदाज्ञापयति कुमारः।

**राक्षसः** - भद्र ! अपि तत् कार्यं सिद्धम् ?

**करभकः** - अमात्यस्य प्रसादेन सिद्धम् ।

**मलयकेतुः** - सखे भागुरायण ! किं तत् कार्यम् ?

गहनः खलु सचिववृत्तान्तो नैतावता परिच्छेत्तुं शक्यते

**भागुरायणः** - कुमार! गहनः खलु सचिववृत्तान्तो नैतावता परिच्छेत्तुं शक्यते, अवहितस्तावच्छृणु ।

**राक्षसः** - भद्र ! विस्तरेण श्रोतुमिच्छामि।

**करभकः** - शृणोत्वमात्यः, अस्ति तावदहममात्येनाज्ञप्तो यथा--'करभक ! कुसुमपुरं गत्वा मम वचनेन त्वया भणितव्यो वैतालिकः स्तनकलशः, यथा- चाणक्यहतकेन तेषु तेषु आज्ञाभङ्गेषु अनुष्ठीयमानेषु चन्द्रगुप्तः समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्यः' इति ।

**राक्षसः** - ततस्ततः?

**करभकः** - ततो मया पाटलिपुत्रं गत्वा श्रावितोऽमात्यस्य सन्देशं वैतालिकः स्तनकलशः।

नन्दकुलविनाशदुर्मनसः पौरजनस्य परितोषं समुत्पादयता कौमुदीमहोत्सवः

**राक्षसः** - ततस्ततः?

**करभकः**- अत्रान्तरे नन्दकुलविनाशदुर्मनसः पौरजनस्य परितोषं समुत्पादयता चन्द्रगुप्तेनाघोषितः कुसुमपुरे कौमुदीमहोत्सवः। सोऽपि

चिरकालप्रवर्तमानो जनितपरितोषः अभिमतबन्धुजनसमागम इव सस्नेहं बहुमानितो नगरजनेन ।

राक्षसः - (सबाष्पम्) हा देव ! नन्द !

*करभकवाक्यं श्रुत्वा संस्मृतनन्दवंशवृत्तान्तः राक्षसः नन्दं प्रति विलपन्नाह--*

**कौमुदी कुमुदानन्दे जगदानन्दहेतुना ।**
**कीदृशी सति चन्द्रेऽपि नृपचन्द्र ! त्वया विना ॥९॥**

*अन्वयः - नृपचन्द्र ! कुमुदानन्दे चन्द्रे सति अपि जगदानन्दहेतुना त्वया विना कौमुदी कीदृशी ?*

***भावार्थः**- हे नृपचन्द्र राजन् नन्द ! सर्वजनरञ्जनसमर्थेन त्वया विना कैरव-कुलहर्षजनके, कुत्सितजनमोदकरे यद्वा पृथ्व्यानन्ददायके चन्द्रमसि चन्द्रगुप्ते च सत्यपि कौमुदी कौमुदीमहोत्सवश्चेत्युभावपि न सुखावहौ। व्यतिरेकालंकारः। अनुष्टुप् वृत्तम्।*

भद्र ! ततस्ततः ?

करभकः- अमात्य ! ततः स लोकलोचनानन्दभूतोऽनिच्छत एव तस्य निवारितश्चाणक्यहतकेन कौमुदीमहोत्सवः। अत्रान्तरे स्तनकलशेन प्रवर्तिता चन्द्रगुप्तस्य समुत्तेजनसमर्था श्लोकपरिपाटी।

राक्षसः - कीदृशी सा ?

(करभकः 'सत्त्वोत्कर्षस्ये'त्यादि (तृतीयेऽङ्के २२तमं) पूर्वश्लोकं पठति।)

काले भेदबीजमुप्तम्, अवश्यमेव फलमुपदर्शयिष्यति

राक्षसः - (सहर्षम्) साधु सखे स्तनकलश ! साधु । काले भेदबीजमुप्तम्, अवश्यमेव फलमुपदर्शयिष्यति । यतः –

*तादृश्यस्य बीजस्यावश्यं फलदातृत्वे हेतुमाह--*

**सद्यः क्रीडारसच्छेदं प्राकृतोऽपि न मर्षयेत्।**
**किमु लोकाधिकं धाम बिभ्राणः पृथिवीपतिः ॥१०॥**

*अन्वयः - प्राकृतः अपि सद्यः क्रीडारसच्छेदं न मर्षयेत् । लोकाधिकं तेजः बिभ्राणः पृथ्वीपतिः किं नु ?*

*भावार्थः – पामरोऽपि जनः अकारणं केनचित् हठात् कृतं मनोविनोदभङ्गं न सहेत पुनः अलौकिकतेजःसम्पन्नः सम्राट् कथं मर्षयेत्। अत्र अर्थापत्ति-रलङ्कारः। अनुष्टुप् वृत्तम्।*

**मलयकेतुः** – एवमेतत् ।

**राक्षसः** - ततस्ततः?

**करभकः** - ततश्चन्द्रगुप्तेनाज्ञाभङ्गकलुषितहृदयेन सुचिरममात्यगुणं प्रशस्य प्रभ्रंशितोऽधिकारात् चाणक्यहतकः ।

**मलयकेतुः** - सखे भागुरायण! गुणप्रशंसया दर्शितश्चन्द्रगुप्तेन राक्षसे भक्तिपक्षपातः।

**भायुरायणः** - न तथा गुणप्रशंसया, यथा चाणक्यवटोर्निराकरणेन।

**राक्षसः** - भद्र! किमयमेवैकः कौमुदीमहोत्सवप्रतिषेधश्चन्द्रगुप्तस्य चाणक्यं प्रति कोपकारणमुतान्यदप्यस्ति ?

**मलयकेतुः** - सखे भागुरायण ! चन्द्रगुप्तस्य अपरकोपकारणान्वेषणे किं फलमेष पश्यति ?

चाणक्यः चन्द्रगुप्तं कोपयिष्यति किम्?

**भागुरायणः** – कुमार! एतत् फलं पश्यति- 'अतिमतिमान् चाणक्यो निष्प्रयोजनमेव किमिति चन्द्रगुप्तं कोपयिष्यति? न च कृतवेदी चन्द्रगुप्त एतावता गौरवमुल्लङ्घयिष्यति। सर्वथा चाणक्य-चन्द्रगुप्तयोः पुष्कलात् कारणाद् यो विश्लेष उत्पद्येत, स आत्यन्तिको भविष्यति' इति ।

**करभकः** - अमात्य ! अस्त्यन्यदपि चन्द्रगुप्तस्य कोपकारणं चाणक्ये ।

**राक्षसः** - किं किम् ?

**करभकः** - यथा प्रथमं तावदुपेक्षितोऽनेन-अपक्रामन् कुमारो मलयकेतुः अमात्यराक्षसश्च ।

हस्ततलगतो मे चन्द्रगुप्तो भविष्यति

**राक्षसः** - (सहर्षम्) सखे! शकटदास!! हस्ततलगतो मे चन्द्रगुप्तो भविष्यति। इदानीं चन्दनदासस्य बन्धनान्मोक्षः, तव च पुत्रदारैः सह समागमः, जीवसिद्धिप्रभृतीनां क्लेशच्छेदः।

**भागुरायणः** - (आत्मगतम्) जातः सत्यं जीवसिद्धेः क्लेशच्छेदः।

**मलयकेतुः** - सखे भागुरायण ! 'हस्ततलगतो मे सम्प्रति चन्द्रगुप्तो भविष्यति' इति व्याहरतः कोऽयमस्याभिप्रायः ?

**भागुरायणः** - किमन्यत्? चाणक्यादपकृष्टस्य चन्द्रगुप्तस्योद्धरणात् किञ्चित्कार्यमवश्यं पश्यति।

**राक्षसः** - भद्र ! हृताधिकारः साम्प्रतं क्वासौ वटुः?

**करभकः** - तस्मिन्नेव पाटलिपुत्रे प्रतिवसति।

प्रतिज्ञां वा न पुनः समारूढवान् ?

**राक्षसः**- (सावेगम्) भद्र ! तत्रैव प्रतिवसति, न तपोवनं गतः, प्रतिज्ञां वा न पुनः समारूढवान्?

**करभकः**- अमात्य ! तपोवनं गमिष्यतीति श्रूयते ।

**राक्षसः** - (सावेगम्) शकटदास! नेदमुपपद्यते। पश्य –

*स्वोक्तामनुपपत्तिं युक्त्या समर्थयन् आह--*

देवस्य स्वाग्रासनापनयजा निकृतिः न सोढा

> **देवस्य येन पृथिवीतलवासवस्य**
> **स्वाऽग्रासनापनयजा निकृतिर्न सोढा ।**
> **सोऽयं स्वयङ्कृतनराधिपतेर्मनस्वी**
> **मौर्यात्कथं नु परिभूतिमिमां सहेत ?॥११॥**

*अन्वयः - येन पृथिवीतलवासवस्य देवस्य स्वाग्रासनापनयजा निकृतिः न सोढा, सः अयं मनस्वी स्वयङ्कृतनराधिपतेः मौर्यात् इमां परिभूतिं कथं नु सहेत ?*

*भावार्थः - यः भूमीन्द्रकल्पस्य नन्दस्य श्रेष्ठासननिष्कासनजन्यावमानं न सोढवान्, स महाभिमानी चाणक्यः स्वयंकृतनराधिपात् मौर्यचन्द्रगुप्तात् इमां परिभूतिं कथमपि सोढुं न समर्थ इति भावः। अत्रार्थापत्तिर-लङ्कारः। वसन्ततिलका वृत्तम्।*

तपोवनगमने पुनः प्रतिज्ञारोहणे वा काऽस्य स्वार्थसिद्धिः?

**मलयकेतुः** - सखे भागुरायण ! चाणक्यस्य तपोवनगमने पुनः प्रतिज्ञारोहणे वा काऽस्य स्वार्थसिद्धिः ?

**भागुरायणः** - कुमार! नात्यन्तदुर्बोधोऽयमर्थः, यावद्यावत् चाणक्य-हतकश्चन्द्रगुप्ताद् दूरीभवति तावत्तावदस्य स्वार्थसिद्धिः।

**शकटदासः** - अमात्य ! अलमत्यन्तविकल्पितेन, एतदुपपद्यत एव। कुतः? पश्यत्यमात्यः –

*मौर्यपरिभूतिसहने उपपत्तिं दर्शयति--*

मौर्यस्य औत्कृष्ट्यम्

**राज्ञां चूडामणीन्दुद्युतिखचितशिखे मूर्ध्नि विन्यस्तपादः**
**स्वैरेवोत्पाद्यमानं किमिति विषहते मौर्य आज्ञाविघातम्।**
**कौटिल्यः कोपनोऽपि स्वयमभिचरणज्ञातदुःखः प्रतिज्ञां**
**दैवात् तीर्णप्रतिज्ञः पुनरपि न करोत्यायतिज्यानिभीतः ॥१२॥**

***अन्वयः*** *- चूडामणीन्दुद्युतिखचितशिखे राज्ञां मूर्ध्नि विन्यस्तपादः मौर्यः स्वैः एव उत्पाद्यमानम् आज्ञाविघातं किम् इति विषहते स्वयम् अभिचरणज्ञातदुःखः दैवात् तीर्णप्रतिज्ञः कोपनः अपि कौटिल्यः आयतिज्यानिभीतः पुनः अपि प्रतिज्ञां न करोति।*

***भावार्थः*** *- मौर्यः सामन्तभूपतीनां मौलिमुकुटमणीन्दुचर्चितशिखे मस्तके संनिहितचरणो वर्त्तते, स स्वकीयैरनुचरैः क्रियमाणम् आज्ञाभङ्गं कथं सोढुं शक्नुयात्; अतः चाणक्यस्याधिकारप्रच्यावनं सर्वथोपपन्नमेव। किञ्च प्रकृत्या कोपनः अपि चाणक्यः अभिचारकर्मणि अनुभूतदुःखः एकदा भाग्यसंपदा पूर्णप्रतिज्ञः अपि भाविपरिणामहानिभीतः पुनरपि चन्द्रगुप्तं विनाशयितुं प्रतिज्ञां न करोति । अतिशयोक्तिः। स्रग्धरावृत्तम् ॥*

**राक्षसः** - सखे शकटदास ! एवमेतत्, तद् गच्छ, विश्रामय करभकम्।

**शकटदासः** - यदाज्ञापयत्यमात्यः। (इति करभकेण सह निष्क्रान्तः।)

**राक्षसः** - अहमपि कुमारं द्रष्टुमिच्छामि।

मलयकेतुराक्षसाभ्यां समागमः

**मलयकेतुः** - (उपसृत्य) अहमेवार्यं द्रष्टुमागतः।

**राक्षसः** - (नाट्येनावलोक्य) अये ! कुमार एवागतः। (आसनादुत्थाय ) इदमासनमुपवेष्टुमर्हति कुमारः।

**मलयकेतुः** - अहमुपविशामि। उपविशत्वार्यः (इत्युभौ यथासनमुपविष्टौ) आर्य ! अपि सह्या शिरोवेदना ?

**राक्षसः**- कुमारस्याधिराजशब्देनातिरस्कृते कुमारशब्दे कुतः शिरोवेदनायाः सह्यता ?

किियन्तं कालमस्माभिरेवं सम्भृतबलैरपि शत्रुव्यसनमवेक्षमाणै-रुदासितव्यम्।

**मलयकेतुः** - स्वयमूरीकृतमेतदार्येण, न दुष्प्रापं भविष्यति। तत् क्रियन्तं कालमस्माभिरेवं सम्भृतबलैरपि शत्रुव्यसनमवेक्षमाणैरुदासितव्यम्।

**राक्षसः**- कुमार! कुतोऽद्यापि कालहरणस्यावकाशः? प्रतिष्ठस्व रिपुजयाय ।

**मलयकेतुः** - अमात्य ! अपि किञ्चिच्छत्रुव्यसनमुपलब्धम् ?

**राक्षसः** – बाढमुपलब्धम् ?

**मलयकेतुः** - कीदृशम् ?

**राक्षसः** - सचिवव्यसनं, किमन्यत् ? अपकृष्टश्चाणक्याच्चन्द्रगुप्तः ।

**मलयकेतुः** - अमात्य ! सचिवव्यसनमेव?

भूपतीनां कदाचित् अमात्यव्यसनं व्यसनमपि स्यात्, न पुनश्चन्द्रगुप्तस्य

**राक्षसः** - कुमार ! अन्येषां भूपतीनां कदाचिदमात्यव्यसनमव्यसनमपि स्यात्, न पुनश्चन्द्रगुप्तस्य।

**मलयकेतुः** - आर्य ! ननु विशेषतश्चन्द्रगुप्तस्यैव।

**राक्षसः** - किं कारणं यदस्यामात्यव्यसनमव्यसनम् ?

**मलयकेतुः** - चन्द्रगुप्त प्रकृतीनां हि चाणक्यदोषा एव विरागहेतवः। तस्मिन्निराकृते प्रथममपि चन्द्रगुप्तानुरक्ताः प्रकृतयः इदानीं पुनः सुतरा-मेव तत्रानुरागं दर्शयिष्यन्ति।

द्विप्रकाराः प्रकृतयः चन्द्रगुप्तसहो-त्थायिन्यो नन्दकुलानुरक्ताश्च।

**राक्षसः** - कुमार ! नैतदेवं, इह द्विप्रकाराः प्रकृतयः- चन्द्रगुप्तसहो-त्थायिन्यो नन्दकुलानुरक्ताश्च। तत्र चन्द्रगुप्तसहोत्थायिनीनां प्रकृतीनां चाणक्यदोषा एव विरागहेतवः, न नन्दकुलानुरक्तानाम्। तास्तु खलु नन्दकुलमनेन पितृकुलभूतं कृत्स्नं कृतघ्नेन घातितमित्यपरागामर्षाभ्यां विप्रकृताः सत्यः स्वाश्रयमलभमानाश्चन्द्रगुप्तमेवानुवर्तन्ते। त्वादृशं पुनः प्रतिपक्षोद्धरणे सम्भावितशक्तिमभियोक्तारमासाद्य क्षिप्रमेनं परित्यज्य त्वामेवाश्रयिष्यन्ते इति। अत्र कुमारस्य वयमेव निदर्शनम्।

**मलयकेतुः**- अमात्य ! किमेतदेवैकं सचिवव्यसनमभियोगकारणं चन्द्रगुप्तस्य? आहोस्विदन्यदप्यस्ति ?

**राक्षसः** - कुमार ! किमन्यैः बहुभिरपि ? एतद्धि तत्र प्रधानतमम्।

**मलयकेतुः** - अमात्य! कथं प्रधानतमं नाम ? किमिदानीं चन्द्रगुप्तः स्वराज्यकार्यधुरामन्यत्र मन्त्रिणि आत्मनि वा समासज्य प्रतिविधातुमसमर्थः स्यात् ?

**राक्षसः** - बाढम्, असमर्थ एव ।

**मलयकेतुः** - किं कारणम् ?

**राक्षसः** - स्वायत्तसिद्धिषु, उभयायत्तसिद्धिषु वा भूमिपालेषु कदाचिदेतत् सम्भवति, न तु चन्द्रगुप्ते । चन्द्रगुप्तस्तु दुरात्मा, नित्यसचिवायत्तसिद्धावेवावस्थितश्चक्षुर्विकल इवाप्रत्यक्षसर्वलोकव्यवहारः कथमिव स्वयं प्रतिविधातुं समर्थः स्यात् ? कुतः?

श्रीः अत्युच्छ्रिते मन्त्रिणि पार्थिवे च पादौ विष्टभ्य उपतिष्ठते

**अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।**
**सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥**

*अन्वयः- श्रीः अत्युच्छ्रिते मन्त्रिणि पार्थिवे च पादौ विष्टभ्य उपतिष्ठते। स्त्रीस्वभावात् भरस्य असहा सा तयोः द्वयोः एकतरं जहाति।*

*भावार्थः- राज्यतन्त्रे पार्थिवमन्त्रिणोरेकमत्ये स्थिते राजलक्ष्मीः स्वकीयौ प्रभुशक्तिमन्त्रशक्तिरूपौ चरणौ दृढं स्थापयित्वा विराजते तयोश्च विमतयोः कलहायमानयोर्वा सतोःस्त्रीस्वभावात् प्रकृत्या चञ्चलत्वाच्च भारासहेन असमर्था सती सा श्रीः तयोः पार्थिवमन्त्रिणोः अन्यतरं त्यजति।*

*इदमत्र तात्पर्यम्- मन्त्रिपार्थिवयोर्कलहे जाते कियत्कालं प्रभुभावमाश्रितापि मन्त्रवैकल्येन, तथा मन्त्रिणमाश्रित्य स्थिताऽपि प्रभुशक्तिवैकल्येन श्रीः स्वयमपि नश्यतीति भावः। अत्र समासोक्तिरलङ्कारः। उपजातिवृत्तम्॥*

*अदृष्टलोकव्यवहारश्चन्द्रगुप्तः स्तनन्धयः शिशुरिव राज्यतन्त्रसंचालने अयोग्य इत्याह--*

**अपि च -**

स्तनात् स्तनन्धयः अत्यन्तशिशुः इव न उत्सहते

**नृपोऽपकृष्टः सचिवात्तदर्पणः स्तनन्धयोऽत्यन्तशिशुः स्तनादिव।**
**अदृष्टलोकव्यवहारमन्दधीर्मुहूर्त्तमप्युत्सहते न वर्तितुम् ॥१३॥**

*अन्वयः - सचिवात् अपकृष्टः तदर्पणः अदृष्टलोकव्यवहारमन्दधीः नृपः स्तनात् स्तनन्धयः अत्यन्तशिशुः इव मुहूर्त्तम् अपि वर्तितुं न उत्सहते।*

*भावार्थः - स्तनपायी शिशुः यथा स्तनात् पृथक्भूतः क्षणमपि किञ्चित्कर्तुमसमर्थः तथा सचिवायत्तसिद्धिरयं चन्द्रगुप्तः सचिवात् पृथक् भूतः सन् राज्यतन्त्रे लोकव्यवहारज्ञानाभावात् मन्दबुद्धितया क्षणमपि राज्यं संचालयितुमसमर्थ इति भावः।*

*सचिवादपकृष्टः सन् क्षणमात्रमपि राज्यधुरां वोढुमसमर्थो भवतीति भावः। उपमालङ्कारः। वंशस्थवृत्तम्।*

**मलयकेतुः** - (आत्मगतम्) दिष्ट्या न सचिवायत्ततन्त्रोऽस्मि (प्रकाशम्) अमात्य! यद्यप्येवं तथापि खलु बहुष्वभियोगकारणेषु सत्सु सचिवव्यसनमभियुञ्जानस्य शत्रुमभियोक्तुः नैकान्तिकी सिद्धिर्भवति।

**राक्षसः** - ऐकान्तिकीमेव सिद्धिमवगन्तुमर्हति कुमारः। कुतः?

*व्यसनमापन्नं शत्रुं प्रति आक्रमणस्यायं कालः तत्र च उत्साहसहायावेव मूलम् इति प्रख्यापनाय सहानुभूतानि वस्तूनि प्रकटयति राक्षसः--*

**त्वय्युत्कृष्टबलेऽभियोक्तरि नृपे, नन्दानुरक्ते पुरे,**

**चाणक्ये चलिताधिकारविमुखे, मौर्ये नवे राजनि ।**

**स्वाधीने मयि** - (इत्यर्द्धोक्ते लज्जां नाटयन्)

**- मार्गमात्रकथनव्यापारयोगोद्यमे,**

**त्वद्वाञ्छान्तरितानि सम्प्रति विभो ! तिष्ठन्ति साध्यानि नः ॥१४॥**

*अन्वयः - विभो ! सम्प्रति उत्कृष्टबले नृपे त्वयि अभियोक्तरि पुरे नन्दानुरक्ते चाणक्ये चलिताधिकारविमुखे राजनि मौर्ये नवे स्वाधीने मयि मार्गमात्रकथनव्यापारयोगोद्यमे नः साध्यानि त्वद्वाञ्छान्तरितानि तिष्ठन्ति।*

*भावार्थः - अयि विभो! सर्वप्रकारसैन्ययुक्ते समभिषेणपरे त्वयि नृपे नन्दानुरक्ते पाटलिपुत्रे कुटिलनयप्रयोक्तरि चाणक्ये च्युतपदे अतएव राज्यतन्त्रात् विमुखे अज्ञातराज्यतन्त्रसंचालने चन्द्रगुप्ते नवे राजनि, मार्गनिर्देशनकथनमात्रव्यापारभरयत्नपरे मयि स्वतन्त्रे, मयि च सति अस्माकं सर्वाणि समीहितानि त्वदाज्ञाधीनानि वर्तन्ते।*

*अत्र मयीति आत्मनः स्वाधीनत्वकथनद्वारा आत्मनः गर्वः स्यादित्याशङ्क्य लज्जा प्रदर्शिता। बहूनां कारणानां साहित्येनावतारणात् समुच्चयालङ्कारः। शार्दूलविक्रीडितं छन्दः।*

**मलयकेतुः** - अमात्य! यद्येवमभियोगकालममात्यः पश्यति, तत्किमास्यते?

पश्य–

*वैरिपुरमर्द्दनाय प्रस्थानस्यौचित्त्वेऽपि केन कस्याक्रमणविधेयमिति तुल्यरूपेण तुल्यरूपस्यैवाक्रमणमुचितमिति दर्शयितुमाह--*

**उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं**
**श्यामाः श्यामोपकण्ठद्रुममलिमुखराः कल्लोलमुखरम्।**
**स्रोतःखातावसीदत् तटमुरुदशनैरुत्सादिततटाः**
**शोणं सिन्दूरशोणा मम गजपतयः पास्यन्ति शतशः ॥१५॥**

*अन्वयः- मम उत्तुङ्गाः स्रुतमदसलिलाः श्यामाः अलिमुखराः उरुदशनैः उत्सादिततटाः सिन्दूरशोणाः शतशः गजपतयः तुङ्गकूलं प्रस्यन्दिसलिलं श्यामोपकण्ठद्रुमं कल्लोलमुखरं स्रोतः खातावसीदत् तटं शोणं पास्यन्ति।*

*भावार्थः- विशालकायाः मदजलस्राविणः कृष्णवर्णाः भ्रमरकुलैः शब्दायमानाः बृहद्दन्तैर्विदारिततीरः सिन्दूरवद्रक्तवर्णाः मम शतशः गजराजाः उन्नततटं प्रक्षरज्जलं श्यामायमानतटवृक्षमालं तरङ्गध्वनिवाचालं प्रवाहवेगावसन्नकूलं शोणनामानं नदं पीत्वा शोषयिष्यन्ति। अत्र यथासङ्ख्यमलङ्कारः। सुवदना वृत्तम्। तद्यथा-- 'अश्वैरदवैश्च षड्भिर्मरभनयमलाभः स्यात्सुवदना' इति ।*

*इदानीं शत्रूपुररोधनप्रकारं दर्शयति--*

अपि च -

मलयकेतुः कुसुमपुरम् आक्रमितुं सज्जः भवति।

**गम्भीरगर्जितरवाः स्वमदाम्बुमिश्र-**
**मासारवर्षमिव शीकरमुद्‌गिरन्त्यः।**
**विन्ध्यं विकीर्णसलिला इव मेघमाला**
**रुन्धन्तु वारणघटा नगरं मदीयाः ॥१६॥**

*अन्वयः - गम्भीरगर्जितरवाः स्वमदाम्बुमिश्रं शीकरम् आसारवर्षम् इव उद्गिरन्त्यः मदीयाः वारणघटाः विकीर्णसलिलाः मेघमालाः विन्ध्यम् इव नगरम् रुन्धन्तु।*

*भावार्थः - गम्भीरगर्जनध्वनिं कुर्वन्त्यः मदजलमिश्रितान् जलकणान् धारासंपातमिव उद्गरन्त्यः मम हस्तिघटाः नगरं शत्रुनगरं तथा रोत्स्यन्ति यथा गम्भीरगर्जितरवाः प्रक्षिप्तसलिलाः मेघमालाः विन्ध्यं रुन्धन्ति।*

*विन्ध्यमिव नगरं शत्रुपुरं रोत्स्यन्ति। गजवलानां प्रधानत्वात् पुनःपुनरुल्लेखः पूर्णोपमा च, वसन्ततिलकावृत्तम्॥*

(इति भागुरायणेन सह निष्क्रान्तो मलयकेतुः।)

**राक्षसः -** कः कोऽत्र भोः?

**पुरुषः -** (प्रविश्य) आज्ञापयतु अमात्यः।

**राक्षसः -** प्रियंवदक! ज्ञायतां, सांवत्सरिकाणां द्वारि कस्तिष्ठति?

**प्रियंवदकः -** (इति निष्क्रम्य क्षपणकं दृष्ट्वा पुनः प्रविश्य च) यदमात्य आज्ञापयति । अमात्य ! एष खलु सांवत्सरिकः क्षपणकः।

**राक्षसः -** (स्वगतमनिमित्तं सूचयित्वा) कथं प्रथममेव क्षपणकदर्शनम् ?

**प्रियंवदकः -** जीवसिद्धिः।

**राक्षसः -** ( प्रकाशम् ) अबीभत्सदर्शनं कृत्वा प्रवेशय ।

**प्रियंवदकः -** यदमात्य आज्ञापयति।

(इति निष्क्रान्तः)

(ततः प्रविशति क्षपणकः)

**क्षपणकः-**

*जीवसिद्धिः स्वागमनं संसूचयन्नाह--*

**शासनमर्हतां प्रतिपद्यध्वं मोहव्याधिवैद्यानाम्।**
**ये पथममात्रकटुक पश्चात्पथ्यमुपदिशन्ति ॥१७॥**

*अन्वयः- मोहव्याधिवैद्यानाम् अर्हतां शासनं प्रतिपद्यध्वम्, ये मुहूर्तमात्र-कुटुम्बकं पश्चात् पथ्यम् उपदिशन्ति।*

*भावार्थः - अयि श्रावकाः अज्ञानरूपिरोगस्य भिषजाम् अर्हताम् आदेशं परिपालयत ये हि प्रथमं कटुकं किन्तु पर्यन्तपरिमाणामे हितकरम् उपदिशन्ति। आर्या वृत्तम्।*

(उपसृत्य) धर्मलाभ धावक ! भवतु।

**राक्षसः -** भदन्त ! निरूप्यतां तावदस्मत्प्रस्थानयोग्यदिवसः।

क्षपणकः युद्धाय प्रस्थानयोग्यदिवसं मुहूर्तं च निरूपयति

**क्षपणकः** - (नाटचेन चिन्तयित्वा) श्रावक! निरूपितो मुहूर्तः। आमध्याह्नात् निवृत्तसप्तशकला शोभना तिथिः सम्पूर्णचन्द्रा पौर्णमासी, युष्माकमुत्तरस्या दिशो दक्षिणां दिशं प्रस्थितानां दक्षिणद्वारिकं नक्षत्रम् ।

*तिथिनक्षत्रे निरूपिते अधुना यात्रसमयमाह क्षपणकः--*

**अपि च-**

**अस्ताभिमुखे सुरे उदिते सम्पूर्णमण्डले चन्द्रे।**
**गमनं बुधस्य लग्ने उदितास्तमिते च केतौ ॥१८॥**

*अन्वयः - सूर्ये अस्ताभिमुखे सम्पूर्णमण्डले चन्द्रे उदिते केतौ च उदयास्तमिते बुधस्य लग्ने गमनम्।*

*भावार्थः - (प्रथमोऽर्थः) सूर्ये अस्ताभिमुखे जाते समग्रबिम्बे चन्द्र उदीयमाने केतौ सप्तमभावस्थिते बुधस्य कन्यालग्ने यात्रा प्रशस्ता भवेत्।*

*(द्वितीयोऽर्थः) शूरवीरराक्षसे चन्द्रगुप्तसाचिव्योन्मुखे चन्द्रगुप्ते संपूर्णराज्यमण्डले शासति सति उदीयमानकाले मलयकेतोरुत्थानानन्तरं भाविविनाशकाले चाणक्यसम्बन्धे एव प्रशस्ता यात्रा भवेत्। अत्र श्लेषालङ्कारः। आर्या वृत्तम्।*

**क्षपणकः** - श्रावक !

*'तिथिरेकगुणा प्रोक्ता नक्षत्रं तु चतुर्गुणम्। सहस्रेणाधिकः सूर्यचन्द्रो लक्षगुणाधिकः।।'इत्युपक्रम्य चन्द्रस्य सर्वापेक्षया बलवत्त्वमिति प्रदर्शयन्नाह क्षपणकः--*

तिथिः एकगुणा, नक्षत्रं चतुर्गुणम्, लग्नं चतुःषष्टिगुणम्

**एकगुणा भवति तिथिश्चतुर्गुणं भवति नक्षत्रम् ।**
**चतुःषष्टिगुणं लग्नमेतद् दृश्यते ज्योतिषतन्त्रसिद्धान्ते ॥**

*अन्वयः - तिथिः एकगुणा, नक्षत्रं चतुर्गुणम्, लग्नं चतुःषष्टिगुणम् (भवति), एषः ज्योतिषतन्त्रसिद्धान्तः।*

*क्रूरग्रहाभावे निकृष्टमपि लग्नं शुभदं भवति। चन्द्रस्य बलेन गच्छन् सन् महान्तं लाभं प्राप्नुहि। तत्र चन्द्रबलस्य सर्वतोभावेन प्राधान्यम् यथा-*

*तारास्तत्र न गण्यन्ते यत्र चन्द्रो बलान्वितः।*
*सहस्रेणाधिकः सूर्यः चन्द्रो लक्षगुणाधिकः।।*

**लग्नं भवति सुलग्नं क्रूरग्रहं परिहर आशु ।**
**प्राप्नुहि दीर्घं लाभं चन्द्रस्य बलेन गच्छन् ॥१९॥**

*अन्वयः - लग्नं क्रूरग्रहं परिहर, आशु सुलग्नं भवति । चन्द्रस्य बलेन गच्छन् दीर्घां सिद्धिं वहसि ॥२१॥*

*भावार्थः- तिथिशुद्धिमुद्दिश्य गमनापेक्षया नक्षत्रशुद्धौ गमने ततश्चतुर्गुणो लाभः किञ्च नक्षत्रशूद्धिमुद्दिश्य गमनापेक्षया लग्नशुद्धिमुद्दिश्य गमनं चतुषष्टिगुणितं लाभकरं भवति, अतः तिथिशुद्धिमनपेक्ष्यैव भवता गन्तव्यम्, अतः हे अमात्य! त्वं कूरग्रहसम्बन्धितं परित्यज चन्द्रस्य बलेन गच्छन् महान्तं लाभं लभस्व। चन्द्रबलेन गच्छतस्तव कृते निकृष्टमपि लग्नं शुभफलदायकं भविष्यतीति। अत्र श्लेषालङ्कारः। आर्या वृत्तम्।*

**राक्षसः** - भदन्त! अपरैः सांवत्सरिकैस्सार्द्ध संवाद्यताम्।

**क्षपणकः** - संवादयतु उपासकः । अहं निजं गेहं गमिष्यामि ।

**राक्षसः** - न खलु कुपितो भदन्तः ?

**क्षपणकः** - न कुपितो युष्माकं भदन्तः ।

**राक्षसः** - कस्तर्हि ?

**क्षपणकः** - भगवान् कृतान्तः, येन आत्मनः पक्षमुज्झित्वा परपक्षं प्रमाणीकरोषि ।

(इति निष्क्रान्तः क्षपणकः।)

**राक्षसः** - प्रियंवदक ! ज्ञायतां का वेला वर्तत इति ?

**प्रियंवदकः** - यदमात्य आज्ञापयति । अस्ताभिलाषी भगवान् सूर्यः ।

**राक्षसः** - (आसनादुत्थाय विलोक्य च) अये ! अस्ताभिलाषी भगवान् सहस्रदीधितिः । तथाहि –

*भगवतो विवस्वतः उदयास्तधर्मदर्शनमुखेन प्रभोरभ्युदये सेवकारानुरागः अवनतौ च विराग इति वस्तुतत्त्वं प्रदर्शयति राक्षसः--*

**आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य भानोः**
**पत्रच्छायैः पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा।**

प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः

**एते तस्मिन् निवृत्ताः पुनरपरगिरिप्रान्तपर्यस्तबिम्बे**
**प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः ॥२०॥**

*अन्वयः - क्षणम् आविर्भूतानुरागाः एते उपवनतरवः उदयगिरेः उज्जिहानस्य भानोः पुरस्तात् पर्णच्छायैः आशु एव दूरं गत्वा पुनः तस्मिन् अपरगिरिप्रान्तपर्यस्तबिम्बे निवृत्ताः, प्रायः सेवमानाः भृत्याः प्रचलितविभवं स्वामिनं त्यजन्ति।*

*भावार्थः- एते आरामवृक्षाः उदयाचलादुदीयमानस्य सूर्यस्य क्षणं यथा स्यात्तथा प्रतिरक्ताः सन्तः पर्णच्छायैः तदभिमुखं आशु दूरं गच्छन्ति पश्चात् अपराह्णे अस्ताचलगामिनि तस्मिन् जाते ते निवृत्ता भवन्ति। यथा सेवमानाः सेवकाः नष्टविभवं स्वस्वामिनं परित्यजन्ति। अत्रार्थान्तरन्यासोऽलङ्कारः उत्प्रेक्षा चापि। स्रग्धरा वृत्तम्।*

(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे चतुर्थोऽङ्कः।

## Summarised Overview

राक्षसस्य गुप्तचरः करभकः राक्षसस्य समीपम् आगच्छति। यदा द्वारपालः करभकस्य आगमनविषयं सूचयति तदा सः राक्षसः तत्क्षणमेव तम् अन्तः आह्वयति। भागुरायणेन सहितस्य छद्ममित्रस्य मलयकेतोः आगमनम्। करभकः चन्द्रगुप्तचाणक्ययोः विसंगतिं राक्षसाय कथयति। तदा एव मलयकेतुः भागुरायणेन सह शिरोवेदनाग्रस्तं राक्षसं द्रष्टुम् आगच्छति। अस्मिन्नवसरे करभकः आगत्य कुसुमपुरस्य वार्तां कथयति यत् कथं चाणक्यः विपर्ययमुक्त्वा चन्द्रगुप्तः चाणक्यं विसर्जितवान् इति। मलयकेतुः आर्यं राक्षसं पृच्छति 'कियत्कालं यावत् अस्माभिः सुसज्जितैः सेनाभिः सह शत्रुक्लेशं प्रतीक्षितव्यम्' इति। राक्षसः तं सान्त्वयति। इत्थं जीवसिद्धिक्षपणकः राक्षसस्य समीपम् आगत्य चन्द्रगुप्तस्य उदयकाले चाणक्यस्य सम्पर्कद्वारा चन्द्रगुप्तस्य साक्षात्कारं कर्तुं राक्षसं वदति। क्षपणकस्य गमनानन्तरं सः अपि सूर्यस्य अस्तं ज्ञात्वा सर्वैः सह गच्छति।

## Assignments

**उत्तराणि लिखत ।**

1. करभकः कः?
2. 'न खल्वहं केनचिदनुगन्तव्यः'। विशदयत।
3. 'गहनः खलु सचिववृत्तान्तो नैतावता परिच्छेत्तुं शक्यते'। सन्दर्भं विशदयत।
4. काले भेदबीजमुप्तम्, अवश्यमेव फलमुपदर्शयिष्यति। सन्दर्भं विशदयत।

**टिप्पणिं लिखत ।**

1. प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः।

**श्लोकं व्याख्यात ।**

1. दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः।
   कल्याणकुलधराणां देवानाञ्च मनुष्यदेवानाम् ॥४॥
2. सत्त्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः ।
   अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः ॥८॥
3. नृपोऽपकृष्टः सचिवात्तदर्पणः स्तनन्धयोऽत्यन्तशिशुः स्तनादिव।
   अदृष्टलोकव्यवहारमन्दधीर्मुहूर्त्तमप्युत्सहते न वर्तितुम् ॥१४॥

**निबनाधात्मकः प्रश्नः ।**

1. करभकेन वर्णितं कुसुमपुरवृत्तान्तं विशदयत।

## Suggested Readings


1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum


## References

1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वारणासि।
2. महाकवि-विशाखदत्तप्रणीतम् मुद्राराक्षसम्, (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय, चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.
5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.


## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# मुद्राराक्षसम्

# 5 - 7 अङ्काः

# BLOCK - 3

SGOU

UNIT 1

# मुद्राराक्षसे पञ्चमः अङ्कः

## Learning Outcomes

- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् आर्जयति।
- मुद्राराक्षसस्य पञ्चमाङ्ककथां गृह्णाति।
- संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यम्।
- मुद्राराक्षसस्य रसरूपकेषु स्थानम्।

## Background

मुद्राराक्षसे पञ्चमोऽङ्कस्य नाम राक्षसनिकारः। करभकः आगत्य कुसुमपुरस्य वार्तां कथयति यत् कथं चाणक्यः विपर्ययमुक्त्वा चन्द्रगुप्तः चाणक्यं विसर्जितवान् इति। मलयकेतुः आर्यं राक्षसं पृच्छति 'कियत्कालं यावत् अस्माभिः सुसज्जितैः सेनाभिः सह शत्रुक्लेशं प्रतीक्षितव्यम्' इति। राक्षसः तं सान्त्वयति। इत्थं जीवसिद्धिक्षपणकः राक्षसस्य समीपम् आगत्य चन्द्रगुप्तस्य उदयकाले चाणक्यस्य सम्पर्कद्वारा चन्द्रगुप्तस्य साक्षात्कारं कर्तुं राक्षसं वदति। क्षपणकस्य गमनानन्तरं सः अपि सूर्यस्य अस्तं ज्ञात्वा सर्वैः सह गच्छति।

सिद्धार्थकस्य क्षपणकस्य च वार्तालापात् ज्ञायते यत् मलयकेतुः पाटलिपुत्रे आक्रमणं कर्तुं प्रस्थितवान् इति। सः मार्गे शिबिरः स्थापितवान् अस्ति। तत्र नियमः कृतः यत् भागुरायणस्य मुद्रायां मुद्रितम् अनुज्ञापत्रं विना कोऽपि व्यक्तिः बहिर्गन्तुं अन्तर्गन्तुम् वा न शक्यते इति।

## Keywords

चाणक्यनीतिलता, मुण्डितमुण्डः, मुद्रालाञ्छितः, कटकम्, प्रणयकोपः, अतिनृशंसम्, आभरणपेटिका, सोच्छ्रायाणाम्, कपटमुद्रा, गण्डस्योपरि विस्फोटः।

# Discussion

**पञ्चमोऽङ्कः**

(ततः प्रविशति लेखमलङ्करणस्थनिकाञ्च मुद्रितामादाय सिद्धार्थकः)

सिद्धार्थकः- आश्चर्यम्! आश्चर्यम् !!

गुरुकं चाणक्यनीतिलता

**बुद्धिजलनिर्झरैः सिच्यमाना देशकालकलशैः।**
**दर्शयिष्यति कार्यफलं गुरुकं चाणक्यनीतिलता ॥१॥**

*चाणक्यनीतिकौशलं प्रशंसयन् तत्र स्वसहकारितां दर्शयन्नाह--*

*अन्वयः - देशकालकलशैः बुद्धिजलनिर्झरैः सिच्यमाना चाणक्यनीतिलता गुरुकं कार्यफलं दर्शयिष्यति।*

*भावार्थः - अनुकूलदेशे काले च बुद्धिपूर्वकनीतिप्रयोगे कृते अवश्यमेव फलागमो भवति यथा कलशजलनिषेकैः सततमार्द्रीक्रियमाणा लता काले आगते महत्तरं फलं ददाति।*

गृहीतो मयाऽऽर्यचाणक्येन प्रथमलेखितो लेखः अमात्यराक्षसस्य मुद्रालाञ्छितः। तस्यैव मुद्रालाञ्छितेयमाभरणपेटिका । चलितोऽस्मि किल पाटलिपुत्रं, तद्यावत् गच्छामि। कथं क्षपणक आगच्छति ? यावन्मेऽशकुनभूतमस्थ दर्शनं, तस्मादादित्यदर्शनेन प्रतिहन्मि।

ततः प्रविशति क्षपणकः।

**क्षपणकः –**

*इदानीं बौद्धसिद्धिवर्णनव्याजेन चाणक्यस्य नीतिकौशलोत्कर्षं वर्णयन्नाह--*

**अर्हतां प्रणमामो ये ते गम्भीरतया बुद्धेः ।**
**लोकोत्तरैलोके सिद्धिं मार्गैर्मार्गयन्ति ।।२॥**

*अन्वयः* - अर्हतां प्रणमामः, ये ते बुद्धेः गम्भीरतया लोके लोकोत्तरैः मार्गैः सिद्धिं गच्छन्ति।

*भावार्थः- वयं तान् तान् जैनदेवान् नमस्कुर्मः, ये स्वबुद्धिवैभवेन लोके अलौकिकसाधनैः समुपलभ्यां सिद्धिम् अन्वेषयन्ति।*

**सिद्धार्थकः** - भदन्त ! प्रणमामि ।

**क्षपणकः**- (सिद्धार्थकं निर्वर्ण्य) श्रावक! धर्मलाभस्ते अस्तु। श्रावक! प्रस्थानसमुद्वहने कृतव्यवसायमिव ते हृदयं पश्यामि।

**सिद्धार्थकः** - कथं भवन्तो जानाति ?

**क्षपणकः** - श्रावक! किमत्र ज्ञातव्यम्? एष ते मार्गादेशकुशलः शकुनः करगतो लेखश्च सूचयति।

**सिद्धार्थकः** - ज्ञातं भदन्तेन देशान्तरं चलितोऽस्मि ! तत् कथयतु भदन्तः कीदृशोऽद्य दिवसः?

मुण्डितमुण्डस्त्वं नक्षत्राणि पृच्छसि

**क्षपणकः** - (विहस्य) श्रावक ! मुण्डितमुण्डस्त्वं नक्षत्राणि पृच्छसि ?

**सिद्धार्थकः** - भदन्त! साम्प्रतमपि किं जातम्? तत् कथय, यद्यात्मनोऽनुकूलं भवेत्, तदा गमिष्यामि, अन्यथा निवर्तिष्ये।

**क्षपणकः** - श्रावकानां साम्प्रतमेतस्मिन् मलयकेतुकटके अनुकूलेना-ऽननुकूलेन वा किम् ? अगृहीतमुद्रेण न गम्यते ।

**सिद्धार्थकः** - भदन्त ! कथय, कुतः खल्वयम् ?

**क्षपणकः** - श्रावक! निशामय, प्रथमं तावदत्र मलयकेतुकटके लोकस्यानिवारितनिष्क्रमणप्रवेशावास्ताम्। इदानीमितः प्रत्यासन्ने कुसुमपुरे, न कोऽप्यमुद्रालाञ्छितो निष्क्रमितुं प्रवेष्टुं वाऽनुमोद्यते।

भागुरायणस्य मुद्रालाञ्छितः

तद् यदि भागुरायणस्य मुद्रालाञ्छितोऽसि तदा गच्छ विश्वस्तः, अन्यथा निवृत्य निरुत्कण्ठं तिष्ठ । मा त्वं गुल्मस्थानाधिपैः संयमितकरचरणो राजकुलं प्रवेश्यसे।

**सिद्धार्थकः** - किं न जानाति भदन्तः, यथा अत्मात्यराक्षसस्य केलिकरोऽन्तिकः सिद्धार्थकोऽहमिति ? तत् अमुद्रालाञ्छितमपि मां निष्क्रामन्तं कस्य शक्तिर्निवारयितुम् ?

**क्षपणकः** - श्रावक ! राक्षसस्य पिशाचस्य वा केलिकरो भव । नास्ति पुनस्ते अमुद्रालाञ्छितस्य निष्क्रमणोपायः ।

**सिद्धार्थकः** - भदन्त ! न कुप्य, भण, 'मे कार्यसिद्धिर्भवतु' इति ।

**क्षपणकः** - श्रावक ! गच्छ, भवतु कार्यसिद्धिः । अहमपि भागुरायणात् पाटलिपुत्रं गन्तुं मुद्रां प्रतीच्छामि ।

(इत्युभौ निष्क्रान्तौ।)

इति प्रवेशकः।

(ततः प्रविशति पुरुषेणानुगम्यमानो भागुरायणः)

विचित्रताऽऽर्यचाणक्यनीतेः

**भागुरायणः** - (आत्मगतम् ) अहो ! विचित्रताऽऽर्यचाणक्यनीतेः । कुतः ?

*अत्र चाणक्यनीतेः वैलक्षण्यं दर्शयति--*

**मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना**
**मुहुः सम्पूर्णाङ्गी, मुहुरतिकृशा कार्यवशतः ।**
**मुहुर्भ्रश्यद्बीजा, मुहुरपि बहुप्रापितफले-**
**त्यहो ! चित्राकारा नियतिरिव नीतिर्नयविदः ॥३॥**

*अन्वयः - मुहुः लक्ष्योभेदाः मुहुः अधिगमाभावगहना मुहुः कार्यवशतः अतिकृशता मुहुः नश्यद्बीजा मुहुः सम्पूर्णाङ्गी मुहुः अपि बहुप्रापितफला नयविदः नीतिः नियतिः इव चित्रकारा इति अहो !*

*भावार्थः - अहो महदाश्चर्यं यदेतस्य नवज्ञाननिधेरार्यचाणक्यस्य कूट-राजनीतिः नियतिरियं विस्मयकरी बहुप्रकारा दुरधिगमा च दृश्यते तथा हि कदाचित् क्वचित् कार्यविशेषमुद्दिश्य अनुमेयप्रकाशा कदाचित् क्वचिच्च दुर्बोधाः कदाचिच्च स्पष्टरूपा, कदाचिच्च सूक्ष्मबोधगम्या, कदाचिच्च अदृश्यकारणा, कदाचिच्च संपादितसर्वफला दृश्यते। 'नियतिरिव' इत्यत्रोपमा, अत्र सामान्यरूपेण नीतिज्ञनीतिप्रशंसनात् विशेषतः चाणक्यनीतिप्रशंसारूपाप्रस्तुतस्य प्रतीतेरप्रस्तुतप्रशंसा। अनयोः संकरः। शार्दूलविक्रीडितं छन्दः।*

मलयकेतोः चारः भवति भासुरकः

(प्रकाशम्) भद्र भासुरक! न मां दूरीभवन्तमिच्छति कुमारः। अतोऽस्मिन्नेवास्थानमण्डपे विन्यस्यतामासनम् ।

**पुरुषः** - एतदासनम्, उपविशत्वार्यः ।

**भागुरायणः** - (उपविश्य) भद्र भासुरक ! यः कश्चिन्मुद्रार्थी द्रष्टुमिच्छति, स त्वया प्रवेशयितव्यः ।

**पुरुषः** - यदार्य आज्ञापयति ।(इति निष्क्रान्तः ।)

**भागुरायणः**- (स्वगतम्) कष्टमेवमप्यस्मासु स्नेहवान् कुमारो मलयकेतुरतिसन्धातव्य इत्यहो ! दुष्करम् । अथवा-

*प्रभुपरतन्त्रस्य कार्याकार्यविवेचनमपि वृथैवेत्याह--*

**कुले लज्जायाञ्च, स्वयशसि च, माने च, विमुखः**
**शरीरं विक्रीय क्षणिकधनलोभाद्धनवति ।**
**तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना,**
**विचारातिक्रान्तः किमिति परतन्त्रो विमृशति ॥४॥**

*अन्वयः - क्षणिकधनलोभात् कुले लज्जायां च स्वयशसि च माने च विमुखः धनवति शरीरं विक्रीय तदा कुर्वाणः विचारातिक्रान्तः परतन्त्रः अधुना एतत् हितम् अहितम् इति किमिति विमृशति।*

*भावार्थः- परवान् जनः स्ववंशाचरिते आचरणे, कस्मादपि कर्मणः अपक्रमणे स्वात्मकीर्तौ, स्वाभिमानादौ च पराङ्मुखः सन् नश्वरधनलाभात् धनसंपन्ने धनिनि स्वशरीरं विक्रीय स्वदेहं स्वसामर्थ्यं च तदायत्तीकृत्य केवलं स्वामिनियोगमेव अनुपालयन् अवश्यकरणीये स्वामिकृत्ये स्वहिताहितं कथं विचिन्तयति। शिखरिणी वृत्तम्।*

(ततः प्रविशति प्रतीहार्यनुगतो मलयकेतुः)

**मलयकेतुः** - (स्वगतम्) अहो ! राक्षसं प्रति मे विकल्पबाहुल्यादाकुला बुद्धिर्न निश्चयमधिगच्छति । कुतः?

*मलयकेतुः राक्षसविषये किमपि निर्णयं अनधिगच्छन् कथयति--*

राक्षसं प्रति मलयकेतोः सन्देहः

**भक्त्या नन्दकुलानुरागदृढया नन्दान्वयालम्बिना**
**किं चाणक्यनिराकृतेन कृतिना मौर्येण सन्धास्यते ?**
**स्थैर्यं भक्तिगुणस्य वाऽधिगणयन् किं सत्यसन्धो भवे-**
**दित्यारूढकुलालचक्रमिव मे चेतश्चिरं भ्राम्यति ॥५॥**

*अन्वयः - नन्दान्वयालम्बिना चाणक्यनिराकृतेन कृतिना मौर्येण नन्द-कुलानुरागदृढया भक्त्या किं सन्धास्यते ? किं वा भक्तिगुणस्य स्थैर्यम् अधिगणयन् सत्यसन्धः भवेत् इति आरूढकुलालचक्रम् इव मे चेतः चिरं भ्राम्यति।*

*भावार्थः - नन्दवंश्यत्वेन नन्दकुलानुरागजनितया भक्त्या अयं राक्षसः चन्द्रगुप्तेन चाणक्यनिराकरणं दृष्ट्वा यशस्विना तेन सह किं संदधीत आहोस्वित् सत्यसन्धत्वेन दृढभक्तियुताय मह्यं चन्द्रगुप्तं विजित्य सकलं मगधराज्यं प्रदाय सत्यप्रतिज्ञो भवेत् इति कोटिद्वयावगाहिज्ञाने संशये मे मनः कुलालचक्रोपरिस्थितमिव भ्राम्यति। अत्र परिकरालङ्कारः, कुलाल-चक्रमिवेत्यत्प्रेक्षा च। शार्दूलविक्रीडितं वृत्तम्।*

(प्रकाशम्) विजये ! क्व भागुरायणः ?

**प्रतीहारी** - कुमार! कुमार! एष खलु कटकान्निष्क्रमितुकामानां मुद्रासम्प्रदानमधितिष्ठति ।

**मलयकेतु** - विजये! मुहूर्तं निभृतपदसञ्चारा भव, यावदस्य पराङ्मुखस्यैव पाणिभ्यां नयने पिदधामि।

**प्रतीहारी** - यत् कुमार आज्ञापयति ।

**भासुरकः** - (प्रविश्य)! आर्य ! एष खलु क्षपणको मुद्रानिमित्तमार्यं प्रेक्षितु-मिच्छति।

**भागुरायणः** – प्रवेशय।

**भासुरकः** - यदार्य आज्ञापयति । (इति निष्क्रान्तः ।)

**क्षपणकः** - (प्रविश्य) श्रावकानां धर्मवृद्धिर्भवतु ।

**भागुरायणः**- (नाट्येनावलोक्य स्वगतम्) अये! राक्षसस्य मित्रं जीवसिद्धिः। (प्रकाशम्) भदन्त! न खलु राक्षसस्य प्रयोजनमेव किञ्चिदुद्दिश्य गम्यते?

**क्षपणकः** - (कर्णौ पिधाय) शान्तं पापं, शान्तं पापम् । श्रावक ! तत्रैव गमिष्यामि, यत्र राक्षसस्य पिशाचस्य वा नामापि न श्रूयते ।

**भागुरायणः** - भदन्त ! बलीयांस्ते सुहृदि प्रणयकोपः । तत् किमपराद्धं राक्षसेन भदन्तस्य ?

स्वयमेव मन्दभाग्य आत्मनः कर्मसु लज्जे

**क्षपणकः** - श्रावक ! न मे किमपि राक्षसेनापराद्धं, स्वयमेव मन्दभाग्य आत्मनः कर्मसु लज्जे।

**भागुरायणः** - भदन्त ! वर्द्धयसि मे कुतूहलम् ।

**मलयकेतुः** - (स्वगतम्) मम च ।

**भागुरायणः** - श्रोतुमिच्छामि ।

**मलयकेतुः** - (स्वगतम्) अहमपि ।

**क्षपणकः** - श्रावक ! किमेतेनाश्रोतव्येन श्रुतेन ?

**भागुरायणः** - भदन्त ! यदि रहस्यं, तदा तिष्ठतु ।

**क्षपणकः** - श्रावक ! न हि रहस्यम् ।

**भागुरायणः** - हि कथ्यताम् ।

**क्षपणकः**- श्रावक ! नास्तीदं, तथापि न कथयिष्याम्यतिनृशंसम्।

**भागुरायणः** - भदन्त ! अहमपि मुद्रां न दास्यामि।

**क्षपणकः** - (स्वगतम्) युक्तमिदानीमर्थिने कथयितुम् । (प्रकाशम्) का गतिः? निवेदयामि, शृणोतु श्रावकः। अस्ति तावदहमधन्यः प्रथमं पाटलिपुत्रे निवसन् राक्षसस्य मित्रत्वमुपगतः। तस्मिन्नवसरे राक्षसेन गूढं विषकन्याप्रयोगं समुत्पाद्य घातितो देवः पर्वतेश्वरः ।

राक्षसेन घातितस्तातः, न चाणक्येन ?

**मलयकेतुः** - (सबाष्पमात्मगतम्) कथं, राक्षसेन घातितस्तातः, न चाणक्येन ?

**भागुरायणः** - भदन्त ! ततस्ततः?

**क्षपणकः**- ततोऽहं राक्षसस्य मित्रं कृत्वा चाणक्यहतकेन सनिकारं नगरान्निर्वासितः। इदानीमपि राक्षसेनानेकाकार्यकुशलेन किमपि तादृशमारभ्यते, येनाहं जीवलोकान्निष्कासिष्ये ।

**भागुरायणः** - भदन्त ! प्रतिश्रुतराज्यार्द्धमयच्छता चाणक्यहतकेनेद-मकार्यमनुष्ठितं न राक्षसेनेति श्रुतमस्माभिः ।

**क्षपणकः** - (कर्णौ पिधाय ) शान्तं पापम् । श्रावक ! चाणक्यो विषकन्याया नामापि न जानाति । तेनैव दुष्टबुद्धिना राक्षसेनैषाऽकार्यसिद्धिः कृता ।

**भागुरायणः** - भदन्त! कष्टमिदम्, इयं मुद्रा दीयते, एहि कुमारं संश्रावयावः।

*रहसि स्थिते मलयकेतुः सर्वं वृत्तान्तमाकर्ण्य तदेव वक्तुकामं भागुरायणं लक्ष्मीकृत्य ब्रवीति--*

**मलयकेतुः** -

**श्रुतं सखे! श्रवणविदारणं वचः सुहृन्मुखाद्रिपुमधिकृत्य भाषितम्**
**पितुर्वधव्यसनमिदं हि येन मे चिरादवि द्विगुणमिवाद्य वर्द्धते ॥६॥**

*अन्वयः - सखे ! सुहृन्मुखात् रिपुम् अधिकृत्य भाषितं श्रवणविदारणं वचः श्रुतम्, येन हि इदं मे पितुः वधव्यसनं चिरात् अपि अद्य द्विगुणम् इव वर्धते।*

***भावार्थः***- *हे मित्र भागुरायण ! भदन्तमुखात् महाशत्रु राक्षस-मधिकृत्य उक्तं कर्णपीडाजनकं मया श्रुतम्। 'राक्षसेन में पिता घातितः' इति वचसा मे पितृवधजन्यकष्टं पुराकाले संवृत्तमपि अद्य नवीभूतं सत् द्विगुणमिव वर्धते। अत्र उत्प्रेक्षालङ्कारः। रुचिरा वृत्तम्। तद्यथा- 'जभौ सजौ गिति रुचिरा चतुर्ग्रहैरि'ति ।*

**क्षपणकः** - (स्वगतं संस्कृतेन) अये ! श्रुतं मलयकेतुहतकेन !! कृतार्थोऽस्मि । (इति निष्क्रान्त)

**मलयकेतुः** - (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) राक्षस ! युक्तमिदम् ।

*स्वमित्रभूतस्य पर्वतेश्वरस्य राक्षसद्वारा हननमाकर्ण्य तमेवाधिक्षिपन्नाह--*

बन्धुजनाक्षितोयै-
रन्वर्थतोऽपि ननु
राक्षस ! राक्षसोऽसि

**मित्रं ममायमिति निर्वृतचित्तवृत्तिं**
**विश्रम्भतस्त्वयि निवेशितसर्वकार्यम् ।**
**तातं निपात्य, सह बन्धुजनाक्षितोयै-**
**रन्वर्थतोऽपि ननु राक्षस ! राक्षसोऽसि ॥७॥**

*अन्वयः- इदं मम मित्रम् इति विश्रम्भतः त्वयि निवेशितसर्वकार्यं निवृत्तचित्तवृत्तिं तातं बन्धुजनाक्षितोयैः सह निपात्य राक्षस! न तु अन्वर्थतः अपि राक्षसः असि।*

*भावार्थः- राक्षस एव ममोपकारि मित्रमिति कृत्वा विश्वासात् सर्वं स्वराज्यभारधुरं त्वयि निवेश्य निश्चिन्तमनोवृत्तिं मम पितरं बन्धुजनाश्रुभिः सार्धं मारयित्वा भो कृतघ्न राक्षस! त्वं न केवलं नामत अपि तु योगार्थतः अपि राक्षसः असि। तादृशक्रूराचरणं कृतघ्नत्वं च राक्षस एव कर्तुं शक्नोति। अत्र उत्प्रेक्षालङ्कारः, वसन्ततिलकावृत्तम्।*

'रक्षणीया राक्षसस्य प्राणा' इत्यार्यादिशः

**भागुरायणः** - (स्वगतम्) 'रक्षणीया राक्षसस्य प्राणा' इत्यार्यादिशः। भवत्वेवं तावत्। (प्रकाशम्) कुमार! अलमावेगेन। आसनस्थं कुमारं किञ्चिद्विज्ञापयितुमिच्छामि ।

**मलयकेतुः** - (उपविश्य) सखे ! किमसि वक्तुकामः ?

**भागुरायणः** - कुमार ! खल्वर्थशास्त्रव्यवहारिणामर्थवशादरिमित्रोदासीनव्यवस्था, न लौकिकानामिव स्वेच्छावशात्। यतस्तस्मिन् काले सर्वार्थसिद्धिं राजानमिच्छतो राक्षसस्य चन्द्रगुप्तादपि बलीयस्तया सुगृहीतनामा देवः पर्वतेश्वर एवार्थपरिपन्थी महानरातिरासीत् । तस्मिंश्च काले राक्षसेनेदमनुष्ठितमिति नातिदोषमत्र पश्यामि । पश्यतु

कुमारः-

**मित्राणि शत्रुत्वमुपानयन्ती मित्रत्वमर्थस्य वशाच्च शत्रून् ।**
**नीतिर्नयत्यस्मृतपूर्ववृत्तं जन्मान्तरं जीवत एव पुंसः ॥८॥**

*अन्वयः - नीतिः अर्थस्य वशात् मित्राणि शत्रुत्वम् उपानयन्ती च शत्रून् मित्रत्वं (उपानयन्ती) जीवतः एव पुंसः अस्मृतपूर्ववृत्तं जन्मान्तरं नयति।*

*भावार्थः- राजनीतिः कार्यानुरोधेन मित्राणि शत्रुत्वं शत्रूंश्च मित्रत्वं कुर्वाणा जीवनः एव पुरुषान् जन्मान्तरमिव समस्तकृत्यजातं विस्मार्य अवस्थान्तरं प्रापयति। यथा जन्मान्तरे पूर्वजन्मवृत्तं न स्मर्यते तथा जीवतः एव पुरुषान् राजनीतिवशात् पूर्वकृतादि विस्मार्यत्वेन प्रसज्यते। अत्रोत्प्रेक्षातिशयोक्त्योः संसृष्टिः। इन्द्रवज्रावृत्तम्।*

तदत्र वस्तुनि नोपालभ्यो राक्षसः, आ नन्दराज्यलाभादनुग्राह्यश्च। परतस्तस्य परिग्रहे परित्यागे वा कुमारः प्रमाणम् ।

**मलयकेतुः** - एवं भवतु सखे! सम्यक् दृष्टवानसि, अमात्यस्य वधे प्रकृतिक्षोभः स्यात् । एवञ्च सन्दिग्धो विजयः स्यात् ।

**पुरुषः** - (प्रविश्य) - जयतु जयतु कुमारः। अयमार्यस्य गुल्मस्थानाधिकृतो दीर्घचक्षुरार्यं विज्ञापयति - 'एष खल्वस्माभिः कटकान्निष्क्रामन्नगृहीतमुद्रः सलेखः पुरुषो गृहीतस्तत् प्रत्यक्षीकरोत्वेनमार्य' इति ।

**भागुरायणः** - भद्र ! प्रवेशय।

**पुरुषः** - यदार्य आज्ञापयति। (इति निष्क्रान्तः)

(ततः प्रविशति पुरुषेणाऽनुगम्यमानः संयतः सिद्धार्थकः।)

**सिद्धार्थकः** - (स्वगतम् )

*संप्रति स्वारम्भं सिद्ध्यन्मुखं दृष्ट्वा स्वामिभक्तिमेव निदानं मत्वा तां प्रणमति--*

**तृप्यन्त्यै गुणेषु, दोषेषु पराङ्मुखं कुर्वन्त्यै ।**
**अस्मादृशजनन्यै प्रणमामः स्वामिभक्त्यै ॥९॥**

*अन्वयः- दोषेषु पराङ्मुखं कुर्वत्यै, गुणेषु आनयन्त्यै, अस्मादृशजनन्यै स्वामिभक्त्यै प्रणमामः।*

*भावार्थः – सन्ध्यादितत्तत्कर्मकृतेषु प्रसन्नतामुद्वहन्त्यै, किं च प्रमादापि दोषेषु सत्सु ततो दूरीकुर्वत्यै, अस्माकं गूढप्रणिधीनां मातृवत् पालनं कुर्वन्त्यै स्वामिभक्त्यै प्रणमामः।*

**पुरुषः** - (उपसृत्य) आर्य ! अयं स पुरुषः ।

**भागुरायणः** - (नाट्येनावलोक्य) भद्र ! किमयमागन्तुकः, आहोस्विदिहैव कस्यचित्परिग्रहः ?

**सिद्धार्थकः** - आर्य ! अहं खल्वमात्यराक्षसस्य सेवकः ।

**भागुरायणः** - भद्र ! तत् किमर्थमगृहीतमुद्रः कटकान्निष्क्रामसि ?

**सिद्धार्थकः** - आर्य ! कार्यगौरवेण त्वरायितोऽस्मि ।

**भागुरायणः** - कीदृशं तत्कार्यगौरवं, यद्राजशासनमुल्लङ्घयसि?

**मलयकेतुः** - सखे भागुरायण ! लेखमुपानय ।

(सिद्धार्थकः भागुरायणाय लेखमर्पयति ।)

**भागुरायणः** - (सिद्धार्थकहस्ताल्लेखं गृहीत्वा मुद्रां दृष्ट्वा) कुमार! अयं लेखः, राक्षसनामाङ्कितेयं मुद्रा ।

**मलयकेतुः** - मुद्रां परिपालयन्नुद्घाट्य दर्शय।

(भागुरायणस्तथा कृत्वा दर्शयति।)

**मलयकेतुः**- (गृहीत्वा वाचयति) 'स्वस्ति, यथास्थानं कुतोऽपि, कोऽपि किमपि, पुरुषविशेषमवगमयति। अस्मद्विपक्षं निराकृत्य, दर्शिता कापि सत्यता सत्यवादिना। साम्प्रतमेषामपि प्रथममुपन्यस्तसन्धीनामस्मत्सुहृदां पूर्वप्रतिज्ञातसन्धिपरिपणवस्तुप्रतिपादनप्रोत्साहनेन सत्यसन्धः प्रीतिमुत्पादयितुमर्हति। एते ह्येवमुपगृहीताः सन्तः स्वाश्रयविनाशेनैवोपकारिणमाराधयिष्यन्ति। अविस्मृतमप्येतत्--सत्यवतः स्मारयामः। एतेषां मध्ये केचिदरेः कोषदन्तिभ्यामर्थिनः, केचिद् विषयेणेति । अस्मान् प्रत्यलङ्कारत्रयञ्च यत् सत्यवताऽनुप्रेषितं तदुपगतम्। अस्माभिरपि लेखस्याशून्यार्थं किञ्चिदनुप्रेषितं तदुपगमनीयं वाचिकञ्चाप्ततमात् सिद्धार्थकाच्छ्रोतव्यम् इति।

**मलयकेतुः** - भागुरायण ! कीदृशो लेखः?

**भागुरायणः** - भद्र सिद्धार्थक ! कस्यायं लेखः ?

**सिद्धार्थकः**- आर्य ! न जानामि ।

**भागुरायणः** - हे धूर्त! लेखो नीयते, न च ज्ञायते, कस्यायमिति। सर्वं तावत्तिष्ठतु वाचिकं त्वत्तः केन श्रोतव्यम् ?

**सिद्धार्थकः** - (भयं नाटयन्) युष्माभिः ।

**भागुरायणः** - किमस्माभिः?

**सिद्धार्थकः** - मिश्रैर्गृहीतो न जानामि किं भणामीति।

**भागुरायणः**- (सक्रोधम्) एष ज्ञास्यसि। भद्र भासुरक ! बहिर्नीत्वा ताड्यतां तावत्, यावत् सर्वमनेन कथितं भवेत्।

**भासुरकः** - यदार्य आज्ञापयति । (इति सिद्धार्थकेन सह निष्क्रान्तः। पुनः प्रविश्य) आर्य! इयं तस्य ताड्यमानस्य कक्षातः नाममुद्रालाञ्छिताऽऽभरणपेटिका निपतिता ।

**भागुरायणः** - (विलोक्य) कुमार ! इयमपि राक्षसमुद्राङ्कितैव।

**मलयकेतुः**- अयं लेखस्याशून्यार्थो भविष्यति । इमामपि मुद्रां परिपालय-न्नुद्घाट्य दर्शय।

इदम् आभरणं, यन्मया स्वशरीरादवतार्य राक्षसाय प्रेषितम्

(भागुरायणस्तथा कृत्वा दर्शयति।)

**मलयकेतुः**- (विलोक्य) अये! तदिदमाभरणं, यन्मया स्वशरीरादवतार्य राक्षसाय प्रेषितम् । व्यक्तं चन्द्रगुप्तस्यायं लेखः।

**भागुरायणः** - कुमार ! एष निर्णीयते संशयः । भद्र ! पुनरपि ताड्यताम् ।

**पुरुषः** - (इति निष्क्रम्य पुनः प्रविश्य च) यदार्य आज्ञापयति । आर्य ! एष ताड्यमानो विज्ञापयति - 'कुमारस्य स्वयमेव निवेदयामी'ति ।

**मलयकेतुः** - प्रवेशय।

**पुरुषः** - यत् कुमार आज्ञापयति ।

(इति निष्क्रम्य सिद्धार्थकेन सह प्रविशति।)

**सिद्धार्थकः** - (पादयोर्निपत्य) अभयेन मे कुमारः प्रसादं करोतु।

अभयमेव परायत्तजनस्य, तन्निवेद्यतां यथाऽवस्थितम्

**मलयकेतुः** - भद्र! भद्र!! अभयमेव परायत्तजनस्य, तन्निवेद्यतां यथाऽवस्थितम्।

**सिद्धार्थकः** - निशामयतु कुमारः, अहं खल्वमात्यराक्षसेनेमं लेखं दत्त्वा चन्द्रगुप्तसकाशं प्रेषितोऽस्मि।

**मलयकेतुः** - भद्र ! वाचकमिदानीं श्रोतुमिच्छामि।

कृत्रिमं वाक्सन्देशम्

**सिद्धार्थकः** - कुमार! सन्दिष्टोऽस्म्यमात्यराक्षसेन, यथा--'एते मम प्रियवयस्याः पञ्च राजानस्त्वया सह प्रथमसमुत्पन्नसन्धानाः। यथा--कुलूताधिपश्चित्रवर्मा, मलयजनपदाधिपः सिंहनादः, काश्मीरदेशाधिपः पुष्कराक्षः, सिन्धुराजः सिन्धुसेनः, पारसीकाधिपतिर्मेघाक्षः' इति । अत्रैव प्रथमभणितास्त्रयो राजानो मलयकेतोर्विषयमभिलषन्ति, इतरौ द्वौ कोषं हस्तिबलञ्चेति। तद्यथा चाणक्यं निराकृत्य महाराजेन मम प्रीतिरु-त्पादिता, तथैषामपि प्रथमभणितोऽर्थः सम्पादयितव्यः' इत्येतावान् वाक्सन्देश इति ।

**मलयकेतुः** - (स्वगतम्) कथं चित्रवर्मादयोऽपि मामभिद्रुह्यन्ति ? अत्र एवैतेषां राक्षसे निरतिशया प्रीतिः। (प्रकाशम्) विजये ! अमात्यराक्षसं द्रष्टुमिच्छामि।

**प्रतीहारी** - यत् कुमार आज्ञापति ।

(इति निष्क्रान्ता।)

(ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेणानुगम्यमानः सचिन्तो राक्षसः)

**राक्षसः** - (स्वगतम्) सम्पूर्णमस्मद्बलं चन्द्रगुप्तबलैरिति यत् सत्यं न मे मनसः शुद्धिरस्ति। कुतः ?

*इदानीं संदेहहेतुं प्रदर्शयन्नाह--*

**साध्ये निश्चितमन्वयेन घटितं बिभ्रत् सपक्षे स्थितिं**
**व्यावृत्तश्च विपक्षतो भवति यत्, तत् साधनं सिद्धये।**
**तत् साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धश्च यत्**
**तस्याङ्गीकरणेन वादिन इव स्यात् स्वामिनो निग्रहः ॥१०॥**

***अन्वयः*** *- यत् साधनं साध्ये निश्चितं सपक्षे स्थितिं बिभ्रत्, अन्वयेन घटितं विपक्षतः च व्यावृत्तं तत् सिद्धये भवति । यत् स्वयम् एव साम्यम् उभयोः तुल्यं यत् च पक्षे विरुद्धं तस्य अङ्गीकरणेन स्वामिनः इव वादिनः निग्रहः स्यात्।*

***भावार्थः***- *(वादिपक्षे) यद्धूमादिरूपं साधनं, साध्यवह्न्यादौ निश्चितं 'यत्र यत्र धूमः तत्र तत्र वह्निः' इति अन्वयव्याप्त्या घटितं पर्वतादिः पक्षसमाने महानसादौ च स्थितिं बिभ्रत् विपक्षे जलह्रदादौ च निवृत्तं भवति तदेव साधनं वादिना प्रयुक्तं सत् सिद्धये भवति यत्तु साधनं स्वयमेव साध्यम्, न तु सिद्धम् उभयोः स्वपरपक्षयोः पर्वतजलयोश्च तुल्यम्, पक्षे पर्वतादौ विरुद्धं च तादृशसाधनपरिग्रहे वादिनः पराजयो भवति।*

*स्वामिपक्षे -- यत्सैन्यादिरूपं साधनं अभीष्टशत्रुविजये सामर्थ्यं सत् निश्चितवंशपरम्परयानुगतं शत्रुपक्षात् विरक्तं च भवति। एतादृश-साधनाङ्गीकारेण स्वामिनो विजयो भवति, यत् सैन्यादिरूपं साधनम्, स्वयमेव भयादिप्रदर्शनेन वशीकृतं न तु स्ववंशायत्तं शत्रुपक्षे आत्मपक्षे च*

*तुल्यं किञ्चात्मवर्गे अननुकूलं एतादृशसाधनाङ्गीकारेण विजिगीषोः स्वामिनः एव पराभवो भवति। अत्रोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

अथवा तैस्तैर्विज्ञातापरागहेतुभिः प्राक्परिगृहीतोपजापैरापूर्णमिति न विकल्पयितुमर्हामि। (प्रकाशम्) प्रियंवदक ! उच्यन्तामस्मद्वचनात् कुमारानुयायिनो राजानः - संप्रति दिने दिने प्रत्यासीदति कुसुमपुरम् । अतः परिकल्पितविभागैर्भवद्भिः प्रयाणे प्रस्थातव्यम् । कथमिति ?

*विजययात्रायां सैन्यसमावेशप्रकारमाह -*

**प्रस्थातव्यं पुरस्तात् खशमगधगणैर्मामनु व्यूह्य सैन्यै-**
**र्गान्धारैर्मध्ययाने सयवनपतिभिः संविधेयः प्रयत्नः ।**
**पश्चाद् गच्छन्तु वीराः शकनरपतयः संवृताश्चेदिहूणैः**
**कौलूताद्यश्च शिष्टः पथि परिवृणुयाद्राजलोकः कुमारम् ॥११॥**

*अन्वयः - पुरस्तात् व्यूह्य माम् अनु खशमगधगणैः सैन्यैः प्रस्थातव्यम्, मध्ययाने सयवनपतिभिः गान्धारैः प्रयत्नः संविधेयः, पश्चात् चेदिहूणैः सम्भृताः वीराः शकनरपतयः तिष्ठन्तु, शिष्टः कौलूताद्यः राजलोकः पथि कुमारं परिवृणुयात्।*

***भावार्थः-*** *माम् अनु सज्जितस्य सैन्यस्याग्रे खसमगधराजभिः गन्तव्यम्, सैन्यस्य मध्यभागगमने यवनपतिभिः सह गान्धारदेशाधिपैः प्रयत्नः कर्तव्यः। चेदिहूणैः संवृता शकनरपतयः वीराः पश्चाद् गच्छन्तु। किञ्च शिष्टः कौलूताद्यः राजसमूहः मार्गे कुमारं मलयकेतुं चतुर्दिक्षु परिवार्य यायात्। अत्र स्वभावोक्तिरलङ्कारः । स्रग्धरा वृत्तम् ।*

**प्रियंवदकः** - यदमात्य आज्ञापयति । (इति निष्क्रान्तः।)

**प्रतीहारी** - (प्रविश्य) जयतु जयत्वमात्यः । अमात्य ! इच्छति त्वां कुमारः प्रेक्षितुम् ।

**राक्षसः** - भद्रे ! मुहूर्तं तिष्ठ । कः कोऽत्र भोः ?

**पुरुषः** - (प्रविश्य) आज्ञापयत्वमात्यः ।

**राक्षसः** - भद्र ! उच्यतां शकटदासः, यथा--'परिधापिता वयमाभरणं कुमारेण, तन्न युक्तमिदानीमस्माभिरनलङ्कृतैः कुमारदर्शनमनुभवितुम्, अतो यदलङ्करणत्रयं क्रीतं तन्मध्यादेकं दीयतामि'ति ।

**पुरुषः** - (इति निष्क्रम्य पुनः प्रविश्य च) यदमात्य आज्ञापयति । अमात्य ! इदं तदलङ्करणम् ।

**राक्षसः** - (नाट्येनावलोक्यात्मानमलङ्कृत्योत्थाय च) भद्रे ! राजकुलगामिनं मार्गमादेशय ।

अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम्

**प्रतीहारी**- एतु एत्वमात्यः ।

**राक्षसः** - (आत्मगतम्) अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम् । कुतः?

*दासत्वं नाम विविधभीतिजनकत्वमिति प्रदर्शयति--*

**भयं तावत् सेव्यादभिनिविशते सेवकजनं**
**ततः प्रत्यासन्नाद् भवति हृदयेष्वेव निहितम् ।**
**अतोऽव्यारूढानां पदमसुजनद्वेषजननं**
**गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति ॥१२॥**

दासत्वं विविधजाति-जनकत्वम्

***अन्वयः***- *सेवकजनं तावत् भयं सेव्यात् अभिनिविशते, ततः च प्रत्यासन्नात् हृदये निहितम् एव भवति, ततः अध्यारूढानां पदम् असुजनद्वेषजननम्, सोच्छ्रायाणां गतिः अनुकूलं पतनं कलयति।*

***भावार्थः*** - *स्वामिनः सकाशात् भयं सर्वप्रथमं भृत्यवर्गं सर्वतो भावेन प्राप्नोति। तदुत्तरं राज्ञः पार्श्वचरात् जनात् भयं हृदये अधिष्ठितं भवति, उच्चैः पदमधितस्थुषां राजपुरुषाणां पदं दुर्जनप्रीतिजनकं भवति। अतः राज्याधिकारिणां महामहिमशालिनां मनः अधिकाराच्च्यवनम् उचितमेव संभाव्यमानं कलयति। अत्र काव्यलिङ्गमलङ्कारः। शिखरिणी वृत्तम्।*

**प्रतीहारी** - (परिक्रम्य) अमात्य ! अयं कुमारस्तिष्ठति तदुपसर्पत्वेनममात्यः ।

**राक्षसः** - (नाट्येनावलोक्य ) अये ! अयं कुमारस्तिष्ठति । य एषः—

*चिन्तानिमग्नस्य मलयकेतोः अवस्थां वर्णयति-*

**पादाग्रे दृशमवधाय निश्चलन्तीं**
**शून्यत्वादपरिगृहीततद्विशेषाम्**
**वक्त्रेन्दुं वहति करेण दुर्वहाणां**
**कार्याणां कृतमिव गौरवेण नम्रम् ॥१३॥**

*अन्वयः - शून्यत्वात् अपरिगृहीततद्विशेषां निश्चलन्तीं दृशं पादाग्रे अवधाय दुर्वहाणां कार्याणां गौरवेण नम्रं कृतम् इव वक्त्रेन्दुं करेण करोति।*

*भावार्थः - शून्यत्वेन स्वपादविशेषस्थानं, अवधार्य यथाकथंचित् पादाग्रे स्थिरां दृष्टिं स्थापयित्वा दुःखेन वोढुं शक्यानां कार्याणां भारेण नम्रोकृतमिव स्वकीयं मुखचन्द्रं करेण धारयति। उत्प्रेक्षालङ्कारः, 'वक्त्रेन्दुम्' इत्यत्रोपमा च। प्रहर्षिणीवृत्तम्।*

(उपसृत्य) विजयतां विजयतां कुमारः ।

**मलयकेतुः** - आर्य! अभिवादये । इदमासनमास्यताम् ।

(राक्षस उपविशति)

**मलयकेतुः** - अमात्य ! चिरदर्शनेनार्यस्य वयमुद्विग्नाः ।

राक्षसः - कुमार! प्रयाणे प्रतिविधानमनुतिष्ठता मया कुमारादयमुपालम्भोऽधिगतः ।

**मलयकेतुः** – अमात्य ! प्रयाणे कथं प्रतिविहितमिति श्रोतुमिच्छामि ।

राक्षसः – कुमार ! एवमादिष्टाः कुमारस्यानुयायिनो राजानः—

('प्रस्थातव्य'मित्यादि (५।११ ) श्लोकं पुनः पठति ।)

**मलयकेतुः** - (स्वगतम्) विज्ञायते, कथं य एव मद्विनाशेन चन्द्रगुप्तमाराधयितुमुद्यताः, त एव मां परिवृण्वन्ति । (प्रकाशम्) आर्य ! अस्ति कश्चिद् यः कुसुमपुरं प्रति गच्छति, तत आगच्छति वा ?

**राक्षसः** - कुमार ! अवसितमिदानीं गतागतप्रयोजनम् । ननु पञ्चषैरहोभिर्वयमेव तत्र गन्तास्मः।

**मलयकेतुः** - (स्वगतम्) विज्ञायते । (प्रकाशम्) यद्येवं तत् किमयमार्येण सलेखः पुरुषः कुसुमपुरं प्रस्थापितः ?

**राक्षसः** - (विलोक्य) अये ! सिद्धार्थकः । भद्र ! किमिदम् ?

**सिद्धार्थकः** - (सबाष्पं लज्जां नाटयन्) प्रसीदतु प्रसीदत्वमात्यः । अमात्य ! अतिताड्यमानेन मया न पारितममात्यस्य रहस्यं धारयितुम् ।

**राक्षसः** - भद्र ! कीदृशं तद् रहस्यं, न खल्ववगच्छामि ।

**सिद्धार्थकः** - ननु विज्ञापयामि ताड्यमानेन मया..। (इत्यर्द्धोक्ते सभयमधोमुखस्तिष्ठति ।)

**मलयकेतुः** - भागुरायण ! स्वामिनः पुरस्ताद् भीतो लज्जितश्च नैष कथयिष्यति। अतः स्वयमेवार्याय कथय।

**भागुरायणः** - यदाज्ञापयति कुमारः। अमात्य ! एष कथयति, यथा- 'अहममात्यराक्षसेन लेखं दत्त्वा वाचिकञ्च सन्दिश्य चन्द्रगुप्तसकाशं प्रेषितः' इति।

**राक्षसः** - भद्र सिद्धार्थक ! अपि सत्यम् ?

**सिद्धार्थकः** - (लज्जां नाटयन्) एवमतिताड्यमानेन मया निवेदितम् ।

**राक्षसः** - कुमार ! अनृतमेतत् । ताड्यमानः किं न ब्रूयात् ?

**मलयकेतुः** - भागुरायण ! दर्शय लेखं, वाचिकञ्चायमस्मै स्वभृत्यः कथयिष्यति।

**भागुरायणः** - (लेखमवलोकयन्) 'स्वस्ति यथास्थाने कुतोऽपि पुरुषविशेष-मवगमयति' इति वाचयति ।

**राक्षसः** - कुमार ! शत्रोः प्रयोग एषः।

**मलयकेतुः** - लेखस्याशून्यार्थमार्येणेदमाभरणमनुप्रेषितमिति तत् कथं शत्रोः प्रयोग एष स्यात् ? (इत्याभरणं दर्शयति।)

**राक्षसः** - (आभरणं निर्वर्ण्य) कुमार ! नैतन्मयाऽनुप्रेषितम्, एतद्धि कुमारेण मह्यं दत्तम्; मया च परितोषस्थाने सिद्धार्थकाय दत्तम् ।

**भागुरायणः** - भो भो अमात्य ! ईदृशस्याभरणविशेषस्य, विशेषतः कुमारेण स्वगात्रादवतार्य दत्तस्येयं परित्यागभूमिः?

कपटमुद्रामप्युत्पादयितुं शक्नुवन्ति धूर्त्ताः

**मलयकेतुः**- 'वाचिकमप्याप्ततमात्सिद्धार्थकाच्छ्रोतव्यमि'ति लिखितमार्येण।

**राक्षसः** - कुतो वाचिकम् ? कस्य वा लेखः ? अयमेवास्मदीयो न भवति ।

**मलयकेतुः** - इयं तर्हि कस्य मुद्रा ?

**राक्षसः** - कुमार ! कपटमुद्रामप्युत्पादयितुं शक्नुवन्ति धूर्त्ताः ।

**भागुरायणः** - कुमार ! सत्यममात्यो विज्ञापयति। सिद्धार्थक ! केनायं लिखितो लेखः?

(सिद्धार्थको राक्षसमुखमवलोक्य तूष्णीमधोमुखस्तिष्ठति।)

**भागुरायणः** - अलं पुनरात्मानं ताडयित्वा । कथय।

**सिद्धार्थकः** - आर्य ! शकटदासेन।

**राक्षसः** - कुमार ! यदि शकटदासेन लिखितस्तर्हि मयैव लिखितः।

**मलयकेतुः** - विजये ! शकटदासं द्रष्टुमिच्छामि।

**प्रतीहारी** - यत् कुमार आज्ञापयति।

**भागुरायणः** – (स्वगतम् ) न खल्वनिश्चितार्थमार्यचाणक्यप्रणिधयोऽभिधास्यन्ति। आगत्य शकटदासो वा, 'सोऽयं लेखः' इति प्रत्यभिज्ञाय पूर्ववृत्तं प्रकाशयेत्। एवं सति सन्दिहानो मलयकेतुरस्मिन् प्रयोगे श्लथादरो भवेत्। (प्रकाशम्) कुमार! न कदाचिदपि शकटदासोऽमात्यः राक्षसस्याग्रतो 'मया लिखितः' इति प्रतिपत्स्यते, अतोऽन्यलिखितमप्यानीयतां, यतो वर्णसंवाद एवैतत् सर्वं विभावयिष्यति।

**मलयकेतुः** - विजये । एवं क्रियताम् ।

**भागुरायणः** - कुमार ! मुद्रामप्यानयत्वियम् ।

**मलयकेतुः** - उभयमप्यानीयताम् ।

**प्रतीहारी**- (इति निष्क्रम्य पुनः प्रविश्य ।) यत् कुमार आज्ञापयति । कुमार! इदं खलु तत् शकटदासेन स्वहस्तलिखितं पत्रं, मुद्रा च ।

**मलयकेतुः**- (उभयमपि नाट्येनावलोक्य) आर्य ! संवदन्त्यक्षराणि ।

राक्षसः शकटदासं प्रति सन्देहः

राक्षसः - (स्वगतम्) संवदन्त्यक्षराणि, 'शकटदासस्तु मम मित्रमि'ति च विसंवदन्त्यक्षराणि तत् किं शकटदासेन लिखितम् ?

*शकटदासेन यदि एतल्लिखितं तदा एतदपि संभाव्यते--*

**स्मृतं स्यात् पुत्रदाराणां विस्मृताः स्वामिभक्तयः ।**
**चलेष्वर्थेषु लुब्धेन न यशःस्वनपायिषु ॥१४॥**

*अन्वयः- विस्मृताः स्वामिभक्तिषु लुब्धेन चलेषु अर्थेषु पुत्रदारस्य स्मृतं स्यात् अनपायिषु यशःसु न।*

*भावार्थः - स्वामिभक्तिं यशश्च परित्यज्य नश्वरेषु पुत्रदारादिषु अर्थेषु च स्पृहां कुर्वता शकटदासेन कदाचिदेतत्पत्रं लिखितं भवेदित्यपि संभाव्यते नाम। किञ्च स्वामिभक्तयः विस्मृताः स्युरिति शेषः। परिसङ्ख्यालकारः। पथ्यावक्त्रं वृत्तम्।*

अथवा, कः सन्देहः ?

*शकटदासेनैवैतत्पत्रं लिखितमित्यत्र नास्ति संदेहलेशोऽपि--*

**मुद्रा तस्य कराङ्गुलिप्रणयिनी, सिद्धार्थकस्तत्सुहृत्**
**तस्यैवापरलेख्यसूचिमिदं पत्रं प्रयोगाश्रयम् ।**
**सुव्यक्तं शकटेन भेदपटुभिः सन्धाय सार्द्धं परै-**
**र्भर्तृस्नेहपराङ्मुखेन कृपणं प्राणार्थिना चेष्टितम् ॥१५॥**

*अन्वयः - मुद्रा तस्य कराङ्गुलिप्रणयिनी, सिद्धार्थकः तत्सुहृत्, तस्य एव अपरलेख्यसूचितं प्रयोगाश्रयम् इदं लेख्यं सुव्यक्तं भर्तृस्नेहपराङ्मुखेन प्राणार्थिना शकटेन भेदपटुभिः परैः सार्द्धं सन्धाय कृपणं चेष्टितम्।*

*भावार्थः – इयं मन्नामाङ्किता मुद्रा शकटदासेन स्वाङ्गुलिना धृता इत्यत्र न संदेहः। सिद्धार्थकः शकटदासस्य स्नेहभाजनमित्यत्रापि न संन्देहः। तथा च अपरलेख्यसूचितं प्रयोगाश्रयमिदं पत्रमपि तस्यैव इत्यत्र कः संदेहः। अतः प्रतीयते यत् नन्दानुरागात् अस्मत्सौहार्द्दाच्च विमुखीभूतेन स्वप्राणरक्षणपरीप्सुना शकटदासेन संघभेदनिपुणैः शत्रुभिः सह मिलित्वा इदं पत्रं लिखित्वा अतिनिकृष्टम् आचरितम् इति सुस्पष्टम्। अत्र काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

लिखितपत्रे सूचयमानानि आभरणानि वा इति राक्षसं पृच्छति

**मलयकेतुः** - आर्य! 'अलङ्कारत्रयं श्रीमता यदनुप्रेषितं, तदुपगतम्' इत्यार्येण, परिलिखितं तन्मध्यादेकं किमिदम् (निर्वर्ण्यात्मगतम्) कथं तातेन धृतपूर्वमिदमाभरणम् ? (प्रकाशम्) आर्य! कुतोऽयमलङ्कारः?

**राक्षसः** - वणिग्भ्यः क्रयादधिगतः।

**मलयकेतुः** - विजये ! अपि प्रत्यभिजानाति भवती भूषणमिदम् ?

**प्रतीहारी** - (निर्वण्यं सबाष्पम्) कुमार ! कथं न प्रत्यभिज्ञास्यामि ? इदं खलु सुगृहीतनामधेयेन देवेन पर्वतेश्वरेण धारितपूर्वम्।

**मलयकेतुः** - (सबाष्पम् ) हा तात !

*भूषणदर्शनेन पितरं संस्मरन् कुमार आह--*

पितुः पर्वतकेन धारितं भूषणं मलयकेतुः प्रशंसति

**एतानि तानि तव भूषणवल्लभस्य**
**गात्रोचितानि कुलभूषण ! भूषणानि।**
**यैः शोभितोऽसि मुखचन्द्रकृतावभासो**
**नक्षत्रवानिव शरत्समयप्रदोषः ॥१६॥**

*अन्वयः- हे कुलभूषण ! भूषणवल्लभस्य तव गात्रोचितानि एतानि तानि भूषणानि यैः मुखचन्द्रकृतावभासः नक्षत्रवान् शरत्समयप्रदोषः इव शोभितः असि।*

*भावार्थः- हे कुलभूषण! हे पितृदेव! प्रियभूषणस्य महाराजस्य तव बहु-मूल्यानि गात्रार्हाणि तान्येव भूषणानि यैः विद्योतितस्वमुखेन्दुस्त्वं राजसभायां सतारकशारदीयसान्ध्यसमय इव किमपि अद्भुतं रामणीयकं प्रकाशितवानसि। अत्रोपमारूपकालङ्कारौ। वसन्ततिलका वृत्तम्।*

**राक्षसः** - (स्वगतम्) कथं 'पर्वतेश्वरधृतपूर्वाणी'त्याह? (प्रकाशम्) व्यक्तमेतान्यपि तेन चाणक्यप्रयुक्तेन वणिग्जनेनास्मासु विक्रीतानि।

**मलयकेतु** - आर्य! तातेन धृतपूर्वाणामाभरणविशेषाणां विशेषत-चन्द्रगुप्तहस्तगतानां वणिग्भ्यः क्रयादधिगम इति न युज्यते, अथवा युज्यत एवैतत्-

*आदौ व्यापारिजनैरेतेषामलङ्कारजातानां विक्रयस्यायुक्ततां प्रदर्श्य पुनः पक्षान्तरेण तस्य औचित्यं प्रतिपादयन्नाह मलयकेतुः--*

**चन्द्रगुप्तस्य विक्रेतुरधिकं लाभमिच्छतः ।**
**कल्पिता मूल्यमेतेषां क्रूरेण भवता वयम् ॥१७॥**

*अन्वयः - क्रूरेण भवता अधिकं लाभम् इच्छतः विक्रेतुः चन्द्रगुप्तस्य वयम् एतेषां मूल्यं कल्पिताः।*

*भावार्थः- क्रूरकर्मणा कृतघ्नेन भवता विशिष्टलाभाभिलाषिणः चन्द्रगुप्तस्य वणिजः एतेषामाभरणानां मूल्यमहमेव निरूपितः।*

*विक्रेतुः चन्द्रगुप्तसकाशात् एतानि आभरणानि गृहीतवता भवता तन्मूल्यं वयमेव निरूपिताः। अत्र परिवृत्तिरलङ्कारः। पथ्यावक्त्रं छन्दः॥*

राक्षसः - (आत्मगतम्) अहो ! सुश्लिष्टोऽयमभूच्छत्रुप्रयोगः । कुतः ?

*इदानीं सुपुष्टतरप्रमाणेन मया कृतस्यापि लेखादिकस्य मत्कृतत्वं सिद्धं अत एव निरुत्तरतया तूष्णीभाव एवात्र ज्यायानिति इति आत्मानं संबोधयन्नाह राक्षसः--*

**लेखोऽयं न ममेति, नोत्तरमिदं, मुद्रा मदीया यतः**

**सौहार्दं शकटेन खण्डितमिति श्रद्धेयमेतत्कथम् ?**

**मौर्ये भूषणविक्रयं नरपतौ को नाम सम्भावयेत् ?**

**तस्मात् सम्प्रतिपत्तिरेव हि वरं, न ग्राम्यमत्रोत्तरम् ॥१८॥**

*अन्वयः - अयं लेखः मम न इति इदं न उत्तरम्, यतः मुद्रा मदीया शकटेन सौहार्दं खण्डितम् इति एतत् कथं श्रद्धेयं नरपतौ मोर्ये भूषणविक्रयं कः नाम सम्भावयेत्? तस्मात् अत्र सम्प्रतिपत्तिः एव हि वरं ग्राम्यम् उत्तरं न।*

*भावार्थः - हन्त ! मदीयोऽयं लेखो न भवतीत्युत्तरं न समीचीनं यतो हि अत्र मदीया मुद्रा अङ्किता। शकटेन मैत्रीं विनाश्य लिखितमित्यपि कथं विश्व- सनीयम् राज्ञि चन्द्रगुप्ते भूषणविक्रयस्य संभावनापि नास्ति, तस्मादयं लेखो ममैवेति स्वीकार एव वरं भवेत्। यद्यत्र किमपि उत्तरं दीयते नाम तत्सर्वं असमीचीनमेव प्रतिभायादित्यर्थः। अत्र काव्यलिङ्गम् अलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

**मलयकेतुः** - एतदार्य पृच्छामि ।

**राक्षसः** - (सबाष्पम्) कुमार ! य आर्यस्तं पृच्छ, वयमिदानीमनार्याः संवृत्ताः।

**मलयकेतुः –**

*मित्रपुत्रोहम्, सर्वथा त्वदनुसरणं, त्वत्प्रभुत्वस्वीकरणमपि करोमि पुनः केनोद्देश्येन मौर्यमाश्रयसीति जिज्ञासमान आह मलयकेतुः--*

स्वार्थे कस्मिन् समीरा पुनरधिकपरे त्वामनार्यं करोति

**मौर्योऽसौ स्वामिपुत्रः, परिचरणपरो मित्रपुत्रस्तवाहं**
**दाता सोऽर्थस्य तुभ्यं, स्वमतमनुगतस्त्वन्तु मह्यं ददासि ।**
**दास्यं सत्कारपूर्वं ननु सचिवपदं तत्र ते, स्वाम्यमत्र,**
**स्वार्थे कस्मिन् समीरा पुनरधिकपरे त्वामनार्यं करोति ॥१९॥**

*अन्वयः- असौ मोर्यः स्वामिपुत्रः परिचरणपरः, अहं तव मित्रपुत्रः, सः स्वमतं तुभ्यम् अर्थस्य दाता तु अनुगतः त्वं मह्यं ददासि, तत्र सत्कारपूर्वं सचिवपदं दास्यं ननु अत्र ते स्वाम्यं पुनः अधिकतरे कस्मिन् स्वार्थे समीहा त्वाम् अनार्यं करोति।*

*भावार्थः - चन्द्रगुप्तो हि दासीपुत्रः, अहं तव मित्रभूतस्य पर्व- तकस्य पुत्रः, यः तव सेवापरायणः चन्द्रगुप्तो हि भवते अर्थं ददाति, तेन त्वं तस्य भृत्यभूतः, त्वं हि मह्यं स्वसम्मतिं प्रयच्छसि, एवं चन्द्रगुप्ते साचिव्यपदे स्थितोऽपि भवान् तस्य दास्यं करोषि, अत्र तु सम्मतिप्रदानेन मयि प्रभुत्वं करोषि, 'अतः ततोऽपि अतिशयिते मयि पक्षे स्वातन्त्र्ये स्थिते कं स्वार्थमवलम्ब्य भवान् इदमकार्यम् अनार्याचरितमाचरसि भवतामभीष्ट-सिद्धिस्तु मत्पक्षाश्रवणेनैव सेत्स्यति, तत्कथं मां विहाय विपक्षपक्षमाश्रयसीति निष्ठुर उपालम्भः।*

राक्षसः - कुमार ! एवमयुक्तव्याहारिणा भवतैव मे निर्णयो दत्तः। कुतः?

('मौर्योऽसौ स्वामिपुत्र' इति युष्मदस्मदोर्व्यत्ययेन पठति।)

मलयकेतुः - (लेखमलङ्करणस्थगिकाञ्च विनिर्दिश्य) इदमिदानीं किम् ?

राक्षसः - (सबाष्पम् ) विधेर्विलसितमिदं, कुतः ?

*मलयकेतोरुपालम्भेन अनुतप्तः प्रबलपुरुषार्थस्य वैफल्यं च दृष्ट्वा राक्षसः दैवं निर्दिशन्ननुशोचति—*

**भूत्यत्वे परिभावधामनि सति स्नेहात् प्रभूणां सतां**
**पुत्रेभ्यः कृतवेदिनां कृतधियां येषामभिन्ना वयम् ।**
**ते लोकस्य परीक्षकाः क्षितिभृतः पापेन येन क्षता-**
**स्तस्येदं विपुलं विधेर्विलसितं पुंसां प्रयत्नच्छिदः ॥२०॥**

*अन्वयः - कृतधियां कृतवेदिनां सतां येषां प्रभूणां परिभावधामनि भृत्यत्वे सति स्नेहात् वयं पुत्रेभ्यः भिन्नाः न लोकस्य परीक्षकाः ते क्षितिभृतः येन पापेन क्षताः पुंसां प्रयत्नच्छिदः तस्य विधेः इदं विपुलं विलसितम्।*

***भावार्थः-** महामनस्विनां कृतज्ञानां साधुशीलानां येषां स्वामिनां तिरस्कारार्हे भूत्यत्वपदे स्थिता अपि वयं यः पुत्रवल्लालिताः जनचारित्रगुणागुणवेदिनः तादृशाः राजानः येन पापेन दैवेन क्षयं प्रापिताः, पुरुषाणां पौरुषविघातकस्य तस्य देवस्य इदं विरुद्धं चेष्टितम् अत्र मया किमधिकं वक्तुं शक्यते। अत्र अतिशयोक्त्यलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

**मलयकेतुः-** (सक्रोधम्) कथमद्यापि निह्नूयते विधेर्विलसितमिदं न ममेति? अनार्य !

*'दैवविलसितमिदम्' इति राक्षसोक्तिं मृषा मन्यमानो मलयकेतुः संजातकोपः सन् तस्य कृतघ्नतां प्रदर्शयति--*

**कन्यां तीव्रविषप्रयोगविषमां कृत्वा कृतघ्न ! त्वया**
**विस्रम्भप्रवणः पुरा मम पिता नीतः कथाशेषताम् ।**
**सम्प्रत्याहितगौरवेण भवता मन्त्राधिकारे रिपोः**
**प्रारब्धा प्रणयाय मांसवदहो ! विक्रेतुमेते वयम् ॥२१॥**

*अन्वयः- हे कृतघ्न ! पुरा त्वया तीव्रविषप्रयोगविषमां कन्यां कृत्वा विश्रम्भप्रवणः मम पिता कथाशेषतां नीतः। अहो ! सम्प्रति मन्त्राधिकारे आहितगौरवेण भवता एते वयं प्रणयाय रिपोः मांसवत् विक्रेतुं प्रारब्धाः।*

***भावार्थः** - अरे कृतघ्न राक्षस ! त्वयैव विषप्रयोगविषमां विषकन्यां विधाय मम पिता विश्वास्य पुरा घातितः, न तु कदापि चाणक्येन। संप्रति च प्रच्छन्नरूपेण चन्द्रगुप्तसाचिव्यपदे धृताभिलाषेण भवता वयमेव शत्रुभ्यः मांसवद् विक्रेतुमारब्धाः इत्यहो महदाश्चर्यम्, कृतघ्नं भवन्तमन्यत् किं ब्रूमः। अत्रोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

गण्डस्योपरि विस्फोटः

**राक्षसः** - (स्वगतम्) अयमपरो गण्डस्योपरि विस्फोटः। (प्रकाशं, कर्णौ पिधाय) शान्तं पापं, शान्तं पापम्। नाहं विषकन्यामारोपितवानपापोऽहं पर्वतेश्वरे ।

**मलयकेतुः** - केन तर्हि व्यापादितस्तातः?

**राक्षसः** - दैवमत्र प्रष्टव्यम् ।

**मलयकेतुः** - (सक्रोधम्) दैवमत्र प्रष्टव्यं न क्षपणको जीवसिद्धिः?

हृदयमपि मे रिपुभिः स्वीकृतम्

**राक्षसः** - (स्वगतम्) कथं जीवसिद्धिरपि चाणक्यप्रणिधिः? हन्त! हृदयमपि मे रिपुभिः स्वीकृतम् ।

**मलयकेतुः** - (सक्रोधम् ) भासुरक ! आज्ञाप्यतां शिखरसेनः सेनापतिः - 'ये एतेन राक्षसेन सह सौहार्दमुत्पाद्यास्मच्छरीरद्रोहेण चन्द्रगुप्तमाराधयितुकामाः पञ्च राजानः, तद्यथा--'कौलूतः चित्रवर्मा, मलयनरपतिः सिंहनादः, काश्मीरः पुष्कराक्षः, सिन्धुराजः सुषेणः, पारसीकाधिराजो मेघाक्ष' इति । तेषु त्रयः प्रथमा मदीयां भूमिं कामयन्ते, ये गभीरश्वभ्रमुपनीय पांशुभिः पूर्यन्ताम्, इतरौ तु द्वौ हस्तिबलकामौ हस्तिनैव घात्येतामि'ति ।

**पुरुषः** - यत् कुमार आज्ञापयति । (इति निष्क्रान्तः ।)

**मलयकेतुः**- (सक्रोधम्) राक्षस ! राक्षस !! नाहं विस्रम्भघाती राक्षसो, मलयकेतुः खल्वहं, तद् गच्छ, समाश्रीयतां सर्वात्मना चन्द्रगुप्तः । पश्य—

*राक्षसापगमेऽपि स्वस्य परपरिभवसामर्थ्यं प्रकटयन्नाह मलयकेतुः --*

चन्द्रगुप्तं आश्रितानां राज्ञां दण्डाय आज्ञापितः

**विष्णुगुप्तश्च मौर्यश्च सममप्यागतौ त्वया ।**
**उन्मूलयितुमीशोऽहं त्रिवर्गमिव दुर्नयः ॥२२॥**

***अन्वयः***- *अहं त्वया समम् आगतौ विष्णुगुप्तं च मौर्यम् अपि दुर्नयः, त्रिवर्गम् इव उन्मूलयितुम् ईशः।*

***भावार्थः*** - *त्वया सह आगतौ चाणक्यं मौर्यं चन्द्रगुप्तं च नाशयितुं तथैव समर्थोऽस्मि यथा दुर्नीतिः त्रिवर्गः कामश्च नाशयति। अत्रोपमालङ्कारः। अनुष्टुप् वृत्तम्।*

**भागुरायणः** - कुमार! कृतं कालहरणेन, शीघ्रमेव कुसुमपुरोपरोधाय प्रतिष्ठा ज्ञाप्यन्तामस्मद्बलानि –

*पाटलीपुत्रमाक्रमितुं त्वरयति भागुरायणः--*

**गौडीनां लोध्रधूलीपरिमलबहलान् धूम्रयन्तः कपोलान्**
**क्लिश्नन्तः कृष्णिमानं भ्रमरकुलरुचः कुञ्चितस्यालकस्य।**
**पांशुस्तम्बाः बलानां तुरगखुरपुटक्षोदलब्यात्मलाभाः**
**शत्रूणामुत्तमाङ्गे गजमदसलिलच्छिन्नमूलाः पतन्तु ॥२३॥**

***अन्वयः*** *- गौडीनां लोध्रधूलिपरिमलबहुलान् कपोलान् धूमयन्तः भ्रमर-कुलरुचः कुञ्चितस्य अलकस्य कृष्णिमानं क्लिश्नन्तः बलानां तुरगखुरपुटक्षोभलब्धात्मलाभाः गजमदसलिलच्छिन्नमूलाः पांसुस्तम्बाः शत्रूणाम् उत्तमाङ्गे पतन्तु।*

***भावार्थः***- *अस्मत्सैन्ये वर्त्तमानानामश्वानां खुराग्रचूर्णैः जनिता पांशुराशयः मगधवर्त्तिनां गौडनारीणां गण्डस्थलप्रदेशान् मलिनीकुर्वन्तः। तथा च तासामेव भ्रमरश्यामवर्णकान्तेः कुटिलस्य च केशपाशस्य कृष्णरागत्वं निरस्यन्तः, गजमदसलिलैः विनाशमुपयान्तः सन्तः शत्रूणां शिरसि पतन्तु।*

*अत्र कपोलादीनां स्वगुणधावल्यादिपरित्यागेन पांशोः कृष्णत्वग्रहणकथनात् तद्गुणालङ्कारः। भ्रमरकुलरुचः इत्यत्रोपमा च। एवं चोभयोः संसृष्टिः। स्रग्धरावृत्तम्।*

(इति सपरिजनो निर्गतो मलयकेतुः।)

मित्राणां हानिविषये अत्यन्तं व्याकुलः भवति

**राक्षसः**- (सावेगम् ) हा धिक् कष्टम् ! तेऽपि हतास्तपस्विनश्चित्रवर्मादयः !! तत् कथं सुहृन्नाशाय राक्षसश्चेष्टते, न रिपुविनाशाय? तत् किमिदानीं करवाणि मन्दभाग्यः?

*सहसा मलयकेतोरेतादृशं भावपरिवर्तनमवगत्य स्वकृतस्य प्रभूतपुरुषकारस्य व्यर्थतां च विभाव्य खिन्नहृदयः राक्षसः किंकर्त्तव्यविमूढः सन् स्वमनसि बहुधा वितर्कं करोति--*

**किं गच्छामि तपोवनं ? न तपसा शाम्येत् सवैरं मनः**
**किं भर्तृननुयामि जीवति रिपौ स्त्रीणामियं योग्यता।**
**किं वा खड्गसखः पताम्यरिबले ? नेदं न युक्तं भवे-**
**च्चेतश्चन्दनदासमोक्षरभसं रुन्ध्यात् कृतघ्नं न चेत् ॥२४॥**

*अन्वयः - किं तपोवनं गच्छामि, सवैरं मनः तपसा न शाम्येत् । किं रिपौ जीवति भर्तृन् अनुयामि ? इयं स्त्रीणां योग्यता । किं वा खड्गसखः अरिबले पतामि, इदं युक्तं न भवेत् । चन्दनदासमोक्षरभसं चेतः रुन्ध्यात्, चेत् न कृतघ्नं भवेत्।*

*भावार्थः- इदानीं विनष्टाशोऽहं किं संन्यासिवत् तपःकर्तुमरण्यं गच्छामि। किं तु तपसा सामर्षं मनः न शक्यं शमयितुं, किं शत्रुवर्गे विद्यमाने स्वस्वामिपादानामनुगमनं कृत्वात्मानं मृत्यवे दास्यामि, किं तु एतदपि किञ्चित्कर्तुमसमर्थानां स्त्रीणां कृते एवायं व्यापारः शोभते। तर्हि खड्गसहायः सन् एकाकी किं शत्रुदले पतामि, किन्तु अधुना एतदपि कर्त्तव्यं न सम्यक् प्रतिभाति यतो हि बन्धनागारात् चन्दनदासस्य मोक्षणे मदीयं चेतः प्रवणं वर्तते तस्मादेतदपि न कर्त्तव्यं यद्येवं न करोमि तर्हि कृतघ्नतामुपयामीत्यर्थः। अत्र दीपककाव्यलिङ्गालङ्कारौ। शार्दूल-विक्रीडितं वृत्तम् ॥*

(इति निष्क्रान्ताः सर्वे।)

इति मुद्राराक्षसे पञ्चमोऽङ्कः।

## Summarised Overview

पञ्चमोऽङ्के सिद्धार्थकस्य क्षपणकस्य च वार्तालापात् ज्ञायते यत् मलयकेतुः पाटलिपुत्रे आक्रमणं कर्तुं प्रस्थितवान् अस्ति इति। सः मार्गे शिबिरं स्थापितवान् अस्ति। तत्र नियमः कृतः यत् भागुरायणस्य मुद्रायां मुद्रितम् अनुज्ञापत्रं विना कोऽपि व्यक्तिः बहिर्गन्तुं अन्तर्गन्तुम् वा न अनुमीयते।

चाणक्यस्य जीवसिद्धिः नाम क्षपणकः मलयकेतोः सेनायाः समीपम् आगत्य कथयति यत् सः पाटलिपुत्रे निवसन् अमात्यराक्षसस्य मित्रत्वं प्राप्तः इति। तस्मिन् अवसरे राक्षसेन गूढं विषकन्याप्रयोगं विधाय पर्वतेश्वरं गुप्तरूपेण वधं कृतवान्। न चाणक्येन। तदनन्दरं मलयकेतुः राक्षसस्य द्वेषं कर्तुं आरभते।

प्रथमाऽङ्के चाणक्यः शकटदासः यत् पत्रं लिखितवान् तत् पत्रं गृहीत्वा राक्षसस्य मुद्रायां मुद्रयित्वा सिद्धार्थाय दत्तवान् तथा च द्वितीये अङ्के यत् आभरणं राक्षसेन स्वशरीरात् अपसारयित्वा तस्मै प्रसन्नसमये दत्तम् आसीत्। सिद्धार्थकः चाणक्यस्य विश्वसनीयः गुप्तचरः अस्ति। सः पत्रं आभरणं च गृहीत्वा पाटलिपुत्रं प्रति गच्छति। परन्तु मार्गे जीवसिद्धिक्षपणकं मिलति। एतस्मिन् समये एकः सुरक्षाकर्ता सिद्धार्थकम् आनयन् कुमारं मलयकेतुम् अनुरोधं करोति। तस्य हस्तात् राक्षसमुद्रायाः मुद्रितं पत्रम्। तस्मात् पत्रात् च यत्किमपि सिद्धार्थकेन कथितं, तत् स्पष्टं भवति यत् सिद्धार्थकः राक्षसेन चन्द्रगुप्ते

प्रेष्यते। चन्द्रगुप्तः राक्षसं स्वस्य अमात्यं कर्तुम् इच्छति, अतः चाणक्यम् अमात्यपदात् अपसारितः अस्ति। कृत्रिमं वाक्सन्देशम्।

मलयकेतुः अनेन कारणेन राक्षसं विश्वासघातकं मन्यते। मलयकेतुः सन्देशं प्राप्य एव सः राक्षसः तं मिलितुं गच्छति। शकटदासेन क्रीतानां त्रयाणां अलङ्कारणाम् एकं धारयन् राक्षसः आगच्छति। आभूषणानाम् आगमनस्य विषये लिखितम् अस्ति तथा च उपहाराः प्रेषिताः। समीपे राक्षसचिह्नयुक्तायां पेटिका राक्षसस्य कृते प्रेषितं स्वस्य आभूषणं दृष्ट्वा शत्रुपक्षे सम्मिलितस्य मलयकेतोः शङ्का अधिकं दृढं भवति। मलयकेतुः राक्षसम् आहूय पत्रं, आभूषणपेटिकां च दर्शयति। राक्षसः तस्मै शत्रुप्रयोगं कथयति। परन्तु मलयकेतुः राक्षसस्य विषये प्रबलः संशयः अस्ति, सः राक्षसस्य अपमानं करोति तथा च चित्रवर्मा, सिंहनादः, पुष्कराक्षः, सुषेणः, मेघनादः च पञ्चराजानां तेषु त्रयः प्रथमाः मदीयां भूमिं कामयन्ते, ते गभीरश्वभ्रम् उपनीय पांशुभिः पूर्यन्ताम्, इतरौ तु द्वौ हस्तिबलकामौ हस्तिना एव मारितव्यौ इति। राक्षसः अत्यन्तं व्याकुलः भवति। मलयकेतुः बद्धः भवति। एतेन पञ्चमोऽध्यायः समाप्तः भवति।

## Assignments

उत्तरं लिखत ।

1. राक्षसं प्रति मलयकेतोः सन्देहः ।
2. राक्षसस्य शकटदासं प्रति सन्देहः ।

लघुटिप्पणिं लिखत ।

1. मुण्डितमुण्डो नक्षत्राणि पृच्छति ।
2. विचारातिक्रान्तः किमिति परतन्त्रो विमृशति ।
3. अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम् ।
4. गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति ।
5. अयमपरो गण्डस्योपरि स्फोटः ।

निबन्धात्मकः प्रश्नः ।

1. मुद्राराक्षसे पञ्चमसर्गस्य कथासारं लिखत।

## Suggested Readings

1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum

# References

1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वारणासि।
2. महाकवि-विशाखदत्तप्रणीतं मुद्राराक्षसम्, पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.
5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# मुद्राराक्षसे षष्ठः अङ्कः

## Learning Outcomes

- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम्  आर्जयति।
- मुद्राराक्षसस्य षष्ठाङ्कं कथासारं गृह्णाति
- संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यम्।
- चाणक्यस्य कूटनीतिनैपुण्यम्।
- श्लोकानां पठनेन साहित्याभिरुचिर्जायते।

## Background

मुद्राराक्षसस्य षष्ठाङ्कस्य संज्ञा राक्षसनिर्वेदः। अस्मिन् अङ्के सिद्धार्थकस्य स्वमित्रस्य सुसिद्धार्थकस्य च संभाषणम्। तेषां संभाषणात् ज्ञायते यत् मलयकेतुः चन्द्रगुप्तस्य सैनिकैः गृहीतः अस्ति, राक्षसः कुसुमपुरं प्रति गतः इति। अत्र सः राक्षसः कुसुमपुरम् गत्वा स्वस्य दुर्दशायाः विनयस्य च पश्चात्तापं करोति। राक्षसः स्वयं चन्दनदासस्य रक्षणार्थं प्रस्थितः।

## Keywords

सिद्धार्थकस्य मित्रम् सुसिद्धार्थकः, सिद्धार्थकः मलयकेतुकटकात् आगतः, प्रियं वृत्तान्तं कथयति, राक्षसः कुसुमपुरे, कुसुमपुरं निरीक्ष्य दुःखयन्ति, राक्षसस्य दुर्दशा, राक्षसः कुसुमपुरे निवसितः विष्णुदासस्य परममित्रं पश्यति, विष्णुदासस्य मृत्योः निवारणाय श्रमः, राक्षसः चन्दनदासस्य रक्षणार्थं प्रस्थितः।

# Discussion

षष्ठोऽङ्कः

(ततः प्रविशत्यलङ्कृतः सहर्षः सिद्धार्थकः)

*सिद्धार्थकः- राक्षससंग्रहणरूपप्रधानकार्यनिर्वाहाय चन्द्रगुप्तलक्षस्थैर्य-रूपमहाफलाय च षष्ठाङ्कः प्रारभ्यते। तत्रादौ चन्द्रगुप्तेन भूषणादिना अलङ्कृतेन सिद्धार्थकेन स्वेष्टदेवतानां चाणक्यनीतीनां च प्रथमं जय उद्घोष्यते--*

**सिद्धार्थकः -**

**जयति जलदनीलः केशवः केशिघाती**
**जयति च जनदृष्टिश्चन्द्रमाश्चन्द्रगुप्तः ।**
**जयति जयनसज्जं या अकृत्या सैन्यं**
**प्रतिहतपरपक्षा आर्यचाणक्यनीतिः ॥१॥**

*अन्वयः- जलदनीलः केशिघाती केशवः जयति, च जनदृष्टिचन्द्रमा चन्द्र-गुप्तः जयति, च जयनकार्यं यावत् सर्वं कृत्वा प्रतिहतपरपक्षा चाणक्यनीतिः जयति।*

***भावार्थः** - नवजलधरवपुः केशिनिषूदनः श्रीकृष्णः जयति। चन्द्र इव जना-ह्लादकरः चन्द्रगुप्तः जयति। समग्रं विजयं यावदशेषकार्यं सैन्यं विनैव संपाद्य शत्रुवर्गप्रणाशिनी चाणक्यनीतिः जयति। जलदनीलः इत्यत्र उपमा, चन्द्रमा चन्द्रगुप्त इत्यत्र रूपकम्, मालिनीवृत्तम्। 'नन मयथयुतेयं मालिनी-भोगिलोकैः' इति लक्षणात्।*

सिद्धार्थकस्य मित्रम् सुसिद्धार्थकः

तद्यावच्चिरस्य कालस्य प्रियवयस्यं सुसिद्धार्थकं पश्यामि। (परिक्रम्यावलोक्य च)अयं पुनः प्रियवयस्यः सुसिद्धार्थक इत एवागच्छति, तद्यावदुपसर्पामि ।

(ततः प्रविशति सुसिद्धार्थकः।)

**सुसिद्धार्थकः -**

हृदयस्थितानां विभवा विरहे मित्राणां दुर्मनायन्ते

**सन्तापयन्त आपानेषु महोत्सवेषु रुजायन्तः ।**
**हृदयस्थितानां विभवा विरहे मित्राणां दुर्मनायन्ते ॥२॥**

*सिद्धार्थकः प्रियवयस्यस्य सुसिद्धार्थकस्य चिरविरहेण सुहृद्वियोगदुःखं वर्णयन्नाह--*

*अन्वयः- आपानेषु सन्तापयन्तः महोत्सवेषु रुजायन्तः हृदयस्थितानां मित्राणां विरहे विभवाः दुर्मनायन्ते।*

***भावार्थः** - दुःखकाल उपस्थिते चन्द्रवदाह्लादकारिणां गृहे व आमोदप्रमोदोत्सवकाले समेत्यसुखमनुभूयमानानाम् अभिन्नतया निरन्तरं हृदये विद्यमानां मित्राणामभावे सम्पत्तयः खलु खेदमावहन्ति जनम्। अत्र दीपककाव्यलिङ्गालङ्कारौ। आर्या वृत्तम्।*

श्रुतश्च मया यथा- 'मलयकेतुकटकात् प्रियवयस्यः सिद्धार्थक आगत' इति। (परिक्रम्योपसृत्य) तद्यावदेनमन्विष्यामि । एष सिद्धार्थकः।

**सिद्धार्थकः**- (विलोक्य) कथमित्त एव प्रियवयस्यः सुसिद्धार्थकः। (उपगम्य) अपि सुखं प्रियवयस्यस्य ?

(उभावन्योन्यमालिङ्गतः।)

**सुसिद्धार्थकः** - अहो वयस्य ! कुतो मे सुखं यस्य त्वं चिरकालप्रवासप्रत्यागतोऽप्यज्ञापयित्वा वृत्तान्तमन्यतो गतोऽसीति ।

**सिद्धार्थकः**- प्रसीदतु प्रियवयस्यः। अहं खलु दृष्टमात्र एवार्यचाणक्येनाज्ञप्तो यथा-'सिद्धार्थक ! गच्छ, इमं प्रियं वृत्तान्तं प्रियदर्शनस्य देवस्य चन्द्रश्रियो निवेदये'ति । ततस्तस्य तन्निवेद्य एवमनुभूतपार्थिवप्रसादोऽहं प्रियवयस्यं प्रेक्षितुं तव गेहं चलितोऽस्मि ।

**सुसिद्धार्थकः**- वयस्य ! यदि मयेदं श्रोतव्यं भवति, तन्मामपि श्रावय, किं तत् प्रियं प्रियदर्शनस्य चन्द्रश्रियो निवेदितमिति।

प्रियं वृत्तान्तं

**सिद्धार्थकः**- प्रियवयस्य ! तवापि किमश्रोतव्यमस्ति ? तन्निशामय। अस्ति तावदार्यचाणक्यनीतिमोहितमतिना मलयकेतुहतकेन निराकृत्य राक्षसं, हताश्चित्रवर्मप्रमुखाः प्रधानाः पञ्च पार्थिवाः। ततोऽसमीक्ष्यकारी एष दुराचार' इत्युज्झित्वा मलयकेतुकटकभूमिं निजभूमिकुशलतया भयविलोलसैन्यतनूकृतशेषपरिवारेषु स्वकं स्वकं विषयमभिप्रस्थितेषु

पार्थिवेषु, भद्रभट-पुरुषदत्त-हिङ्गुरात-बलगुप्त-राजसेन-भागुरायण-रोहिताक्ष-विजयवर्मप्रमुखैः संयमितो मलयकेतुः।

किं निमित्तमेतत् कुकविनाटकस्येवान्यद् मुखेऽन्यन्निर्वहण इति।

**सुसिद्धार्थकः** - वयस्य! 'भद्रभटप्रमुखाः किल देवस्य चन्द्रश्रियोऽपरक्ता मलयकेतुं समाश्रिता' इति लोके मन्त्र्यते। तत् किं निमित्तमेतत् कुकविनाटकस्येवान्यद् मुखेऽन्यन्निर्वहण इति ?

**सिद्धार्यकः** - वयस्य ! तावत्, देवगत्यै इवाश्रुतगत्यै नम आर्यचाणक्यनीत्यै।

**सुसिद्धार्थकः** - वयस्य ततस्ततः ?

**सिद्धार्थकः** - वयस्य ! ततः प्रभृति सारसाधनसमुदयेनेतो निष्क्रम्य आर्यचाणक्येन प्रतिपन्नमराजलोकमशेषराजबलम् ।

**सुसिद्धार्थकः** - वयस्य ! कुत्र ?

**सिद्धार्थकः** - वयस्य ! यत्रैते

*इदानीं कुत्र कृतप्रश्नस्य समिद्धार्थकस्य उत्तरमाह सिद्धार्थकः--*

**अतिशयगुरुकेण दानदर्पेण दन्तिनः**
**सजलजलदलीलामुद्वहन्तो नदन्ति ।**
**कशाप्रहारभयेन जातकम्पास्त्वरयन्तो**
**गृहीतजयनसज्जाः सम्पद्यन्ते तुरङ्गाः ॥३॥**

*अन्वयः - अतिशयगुरुकेण दानदर्पेण सजलजलदलीलाम् उद्वहन्तः दन्तिनः नदन्ति। कशाप्रहारभयेन जातकम्पाः त्वरयन्तः गृहीतजयनशब्दाः तुरङ्गाः सम्पद्यन्ते।*

*भावार्थः- यथा सजला मेघा नीला सन्तः वर्षन्ति गर्जन्ति च, तथा यस्मिन् रणस्थले नीलवर्णाः हस्तिनः मदजलधराः सन्तः शब्दायन्ते किञ्च कशाभिघातभयभीताः अश्वाः चञ्चलाः सन्तः स्वपक्षविजयोद्घोषं श्रुत्वा आक्रमणार्थमतिशयेन प्लुतिं कुर्वन्ति। जयघोषणां श्रुत्वा सर्वतः कूर्दन्ते इत्यर्थः। उपमारूपकयोः संकरः। मालिनीवृत्तम्।*

**सुसिद्धार्थकः** - वयस्य ! एतत् सर्वं तावत् तिष्ठतु । तथा सर्वलोकप्रत्यक्ष-मुज्झिताधिकारो भूत्वा कथमार्यचाणक्यः पुनरपि तदेव मन्त्रिपदमारूढः ?

**सिद्धार्थकः** - वयस्य! अतिमुग्ध इदानीमसि त्वं, योऽमात्यराक्षसेनानवगाहीतपूर्वमार्यचाणक्यबुद्धिमवगाहितुमिच्छसि ।

अथाऽमात्यराक्षसः इदानीं कुत्र ?

**सुसिद्धार्थकः** - वयस्य ! अथाऽमात्यराक्षस इदानीं कुत्र ?

**सिद्धार्थकः**- वयस्य ! स खलु तस्मिन् प्रलयकोलाहले वर्द्धमाने मलयकेतुकटकात् निष्क्रम्योन्दुरनामधेयेन चरेणानुत्रियमाण इदमेव कुसुमपुरमागत इत्यार्यचाणक्यस्य निवेदितम् ।

**सुसिद्धार्थकः** - वयस्य ! तथा नाम अमात्यराक्षसो नन्दराज्यप्रत्यानयने कृतव्यवसायो निष्क्रम्य साम्प्रतमकृतार्थः पुनरपि कथमिदमेव कुसुमपुरमागतः?

**सिद्धार्थकः** - वयस्य ! तर्कयामि-'चन्दनदासस्य स्नेहेने'ति ।

**सुसिद्धार्थकः** - वयस्य ! सत्यं चन्दनदासस्य स्नेहेनेति ? अथ चन्दनदासस्य मोक्षं प्रेक्षसे ?

**सिद्धार्थकः**- वयस्य ! कुतोऽस्याधन्यस्य मोक्षः? स खलु साम्प्रतमार्यचाणक्यस्याऽऽज्ञस्या द्वाभ्यामप्यावाभ्यां वध्यस्थानं प्रवेश्य व्यापादयितव्यः।

येनावामीदृशे नृशंसे कर्माण नियुज्यावहे?

**सुसिद्धार्थकः** - (सक्रोधम्) वयस्य ! किमार्यचाणक्यस्य घातकजनोऽन्यो नास्ति, येनावामीदृशे नृशंसे कर्मणि नियुज्यावहे ?

**सिद्धार्थकः** - वयस्य ! को जीवलोके जीवितुकामः आर्यचाणक्यस्याज्ञप्तिं प्रतिकूलयति ? तदेहि, चाण्डालवेषधारिणौ भूत्वा चन्दनदासं वध्यस्थानं नयावः । (इत्युभौ निष्क्रान्तौ)

इति प्रवेशकः ।

(ततः प्रविशति रज्जुहस्तः पुरुषः)

*रज्जुधारो पुरुषः स्वहस्तस्थितरज्जु चाणक्यनीतित्वेन वर्णयन्नाह—*

पुरुषः-

**षड्गुणसंयोगदृढा उपायपरिपाटीघटितपाशमुखी ।**
**चाणक्यनीतिरज्जू रिपुसंयमनऋजुका जयति ॥४॥**

*अन्वयः- षड्गुणसंयोगदृढा उपायपरिपाटीघटितपाशमुखी रिपुसंयमनऋजुका चाणक्यनीतिरज्जुः जयति॥*

*भावार्थः - षड्भिः गुणैः सम्मेलनेनात्यन्तपरिपुष्टा, नानाकौशलेन पाशयुता ग्रभागा, मृगादिबन्धने समर्था रज्जुरिव सन्धिविग्रहादि-षड्गुणानां सहघट नयातीव दुर्भेद्या, सामदामादिक्रमरचनया घटिताग्रपाशा रिपुबन्धनसमर्था चाणक्यनीतिः सर्वोत्कृष्टतया वर्त्तते। 'नीतिरज्जुः' इत्यत्र तादात्म्यारोपाद्रूपकम्' विशेषणानां क्लिष्टतया श्लेषेणानुप्राणितम्। आर्यावृत्तम्।*

(परिक्रम्यावलोक्य च) एष स आर्यचाणक्यस्योन्दुरकेण चरेण कथितः प्रदेशः, यत्र मयाऽऽर्यचाणक्याज्ञस्याऽमात्यराक्षसः प्रेक्षितव्यः। (विलोक्य) कथमेष खल्वमात्यराक्षसः कृतशीर्षावगुण्ठन इत एवागच्छति, तद्यावदेभिर्जीर्णोद्यानपादपैरपवारितशरीरः प्रेक्षे, कुत्रासनपरिग्रहं करोतीति ? (इति परिक्रम्य तथा स्थितः)।

(ततः प्रविशति यथानिर्दिष्टः सशस्त्रो राक्षसः)

*इदानीं दुर्भाग्यतया व्यर्थाशेषप्रयासः राक्षसः पूर्ववृत्तमनुस्मरन् अतिनिर्विण्णः शोचति--*

राक्षसः - (सबाष्पम्) कष्टं ! भोः कष्टम् !!

नन्दराजस्य पुरातनः स्मृतयः राक्षसस्य मनसि नवीनाः भवन्ति

**उत्सन्नाश्रयकातरेव कुलटा गोत्रान्तरं श्रीर्गता**
**तामेवानुमता गतानुगतिकास्त्यक्तानुरागाः प्रजाः ।**
**आप्तैरप्यनवाप्त पौरुषफलैः कार्यस्य धूरुज्झिता**
**किं कुर्वन्त्यथवोत्तमाङ्गरहितैर्नागैरिव स्थीयते ॥५॥**

*अन्वयः - उत्सन्नाश्रयकातरा कुलटा इव श्रीः गोत्रान्तरे गता, गतानुगतिकाः त्यक्तानुरागाः प्रजाः ताम् एव अनुगताः अनवाप्तपौरुषफलैः आप्तैः अपि कार्यस्य धूः उज्झिता अथवा किं कुर्वन्ति उत्तमाङ्गरहितैः नागैः इव स्थीयते॥*

*भावार्थः- यथा कुलटा आश्रयविनाशहेतुतया दुःखाभिभूता सती अन्यं पुरुषं समाश्रयति, तथा लक्ष्मीरपि स्वस्वामिनन्दकुलस्य विनाशकारणात् कातरा सती अन्यं वंशं समाश्रितवती, गतानुगतिका परित्यक्तरागाः प्रजाः अपि यत्र लक्ष्मीः गता, तत्रैवाश्रिताः, व्यर्थीभूतं स्वपुरुषार्थमवलोक्य पुरस्कार-*

*भाजनरहिताः हितचिन्तका जना अपि स्वप्रारब्धं कार्यम् उज्झितवन्तः। ते नाम कि कुर्वन्तु? शिरोविहीनाङ्गमिव स्वामिविरहितास्ते तिष्ठन्ति।*

*अत्र कुलटेवेत्यत्रोपमा, द्वितीये तृतीये पादे काव्यलिङ्गम्। चतुर्थपादे बिम्बानुबिम्बभावप्रकटनात् निदर्शना। तदेतेषां संसृष्टिः। शार्दूलविक्रीडितं छन्दः।*

अपि च –

*अनुरागभाजनं पतिं विहाय पत्यन्तरग्रहणेन राज्यश्रियो निन्दाव्याजेनात्र दैवस्यानर्थभूतहेतुत्वमाह--*

राक्षसस्य दुर्दशा

**पतिं त्यक्त्वा देवं भुवनपतिमुच्चैरभिजनं**
**गता च्छिद्रेण श्रीवृषलमविनीतेव वृषली ।**
**स्थिरीभूता चास्मिन् किमिह करवाम स्थिरमपि**
**प्रयत्नं नो येषां विफलयति दैवं द्विषदिव ॥६॥**

*अन्वयः - अविनीता वृषली इव श्रीः अभिजनं भुवनपतिं पतिं देवं त्यक्त्वा छिद्रेण वृषलं गता । अस्मिन् च स्थिरीभूता इह किं करवाम येषां नः स्थिरम् अपि प्रयत्नं द्विषद् इव दैवं विफलयति।*

***भावार्थः-*** *महाकुलीनं लोकाधिपतिं देवतुल्यं नन्दराजं परित्यज्य धृष्टा शूद्रनायिकेव राज्यश्रीः छलेन मौर्यं गता, तत्राचञ्चला सती स्थिता च। वयमिह किं करवामः। येषां नः सर्वमपि प्रयत्नं शत्रुवदाचरद् दैवं विनाशयति। अत्र उपमातिशयोक्त्युत्प्रेक्षालङ्काराणां संकरः। शिखरिणी वृत्तम् ॥*

मया हि-

*अस्मत्कृतानां समस्तप्रयत्नानां विफलत्वे दुर्दैवस्य हेतुत्वं प्रपञ्चयन्नाह--*

**देवे गते दिवमतद्विधमृत्युयोग्ये**
**शैलेश्वरं तमधिकृत्य कृतः प्रयत्नः ।**
**तस्मिन् हते तनयमस्य, तथाप्यसिद्धिः**
**दैवं हि नन्दकुलशत्रुरसौ न विप्रः ॥७॥**

*अन्वयः - अतद्विधमृत्युयोग्ये देवे दिवं गते तं शैलेश्वरम् अधिकृतप्रयत्नः कृतः, तस्मिन् हते अस्य तनयं तथापि असिद्धिः दैवं हि नन्दकुलशत्रुः असौ विप्रः न।*

*भावार्थः- चाणक्यद्वारा मरणानर्हे नन्ददेवे स्वर्गं गते मया पर्वतकेश्वरमाश्रित्य वैरनिर्यातनार्थं प्रयतितः, तस्मिन्विषकन्यायाः प्रयोगेण चाणक्यहतकेन निहते तत्तनयं मलयकेतुमाश्रित्य तत्प्रतीकाराय यत्नो विहितः, तथापि मया असफलतैव प्राप्ता, अतः निश्चीयते यत् दैवमेव नन्दकुलस्य शातयिता, नायं वराकश्चाणक्यविप्रः। सर्वसमृद्धस्य नन्दस्योन्मूलने अनेन ब्राह्मणेन किं कर्तुं शक्यमिति भावः। अत्र काव्यलिङ्गं परिसंख्या च। वसन्ततिलकावृत्तम्।*

अहो ! विवेकशून्यता म्लेच्छस्य मलयकेतोः ?

*स्वस्वामिविनाशे तदनुगतभृत्यस्य न युक्तम् अक्षतशरीरेण जीवितुं न वा शत्रुभिः संगन्तुमित्याह--*

दैवेनोपहतस्य बुद्धिरथवा पूर्वं विपर्यस्यति

**यो नष्टानपि जीवनाशमधुना शुश्रूषते स्वामिन-**
**स्तेषां वैरिभिरक्षतः कथमसौ सन्धास्यते राक्षसः?**
**इत्थं वस्तुविवेकमूढमतिना म्लेच्छेन नालोचितं**
**दैवेनोपहतस्य बुद्धिरथवा पूर्वं विपर्यस्यति ॥८॥**

*अन्वयः - यः अधुना अपि बीजनाशं नष्टान् स्वामिनः शुश्रूषते, असौ राक्षसः अक्षतः तेषां वैरिभिः कथं सन्धास्यते ? एतावत् हि विवेकशून्यमनसा म्लेच्छेन न आलोचितम् अथवा दैवेन उपहतस्य सर्वा बुद्धिः विपर्यस्यति।*

*भावार्थः - यः राक्षसः मरणपर्यन्तं मृतानपि स्वस्वामिनः आराधयति। असौ स्वस्थः सन् कथं स्वामिशत्रुभिः सन्धिं करिष्यति। एतन्मात्रापि म्लेच्छेन मलयकेतुना न विचारितम् अथवाऽयं तस्य दोषो नास्ति, दैवोपहतस्य प्राणिनः विनाशकाले बुद्धिः विपरीता भवति। 'विनाशकाले विपरीतबुद्धिः' इत्युक्तेः। अर्थान्तरन्यासालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

तदिदानीमपि तावदरातिहस्तगतो विनश्येद्राक्षसो न तु चन्द्रगुप्तेन सह सन्धिं कुर्यादिति अथवा मम काममसत्यसन्ध इति वरमयशः, न पुनः शत्रुवञ्चनपरिभूतिः। (समन्तादवलोक्य, सास्रम्) एतास्ता देवस्य पादक्रमणपरिचयपवित्रीकृतरथ्याः कुसुमपुरोपकण्ठभूमयः। इह हि-

राक्षसः मलयकेतोः विवेकहीनतायाः, प्रतिकूलभाग्यविषये च दुःखयन्ति

**शाङ्गर्ज्याकृष्टमुक्तप्रशिथिलकविकाप्रग्रहेणात्र देशे**
**देवेनाकारि चित्रं प्रजविततुरगं बाणमोक्षश्चलेषु ।**
**अस्यामुद्यानराजौ स्थितमिह कथितं राजभिस्तैर्विनेत्थं**
**सम्प्रत्यालोक्यमानाः कुसुमपुरभुवो भूयसा दुःखयन्ति ॥९॥**

*अन्वयः - अत्र देशे देवेन शाङ्गर्ज्याकृष्टमुक्तप्रशिथिलकविकाप्रग्रहेण प्रजविततुरगं चलेषु चित्रं बाणमोक्षः अकारि, अस्याम् उद्यानराजौ स्थितम् इह राजभिः कथितं सम्प्रति तैः विना इत्थम् आलोक्यमानाः कुसुमपुरभुवः भूयसा दुःखयन्ति ॥९॥*

*भावार्थः - महाराजो नन्दः कदापि अस्मिन् स्थाने धनुषः प्रत्यञ्चायां आकृष्यमाणायां हस्तयोः व्यस्ततया प्रशिथिलखलीनवेगतो धावमानस्याश्वस्य पृष्ठोपरि समासीन एव चलेषु लक्ष्येषु पशुमृगादिषु बाणानमुञ्चदिति महच्चित्रम्। अत्र स्थाने उद्यानपङ्क्तौ राजभिः सह समाविशत्, अत्र च राजभिः सह वार्त्तालापमकरोत्। हा हा हन्त! इदानीमस्मिन् कुसुमपुरे दृश्यमानानि तानि तानि स्थानानि नितरां विषादमुत्पादयति। अत्र स्वभवोक्तिरलङ्कारः। स्रग्धरा वृत्तम्॥*

तत् क्व खलु गच्छामि मन्दभाग्यः ? (विलोक्य) भवतु दृष्टमेतज्जीर्णोद्यानम्, अत्र प्रविश्य कुतश्चिच्चन्दनदासस्य वृत्तान्तमुपलप्स्ये । (परिक्रम्य स्वगतम्) अहो! अलक्षितोपनिपाताः पुरुषाणां समविषमदशाविभागपरिणतयो भवन्ति। कुतः ?

*चक्रनेमिक्रमेण दशान्तरमुपागतस्य मम कीदृशी अवस्था जाता इति सक्षोभमाह--*

**पौरैरङ्गुलिभिर्नवेन्दुवदहं निर्दिश्यमानः शनै-**
**र्यो राजेव पुरा पुरान्निरगमं राज्ञां सहस्रैर्वृतः ।**
**भूयः सम्प्रति सोऽहमेव नगरे तत्रैव वन्ध्यश्रमो**
**जीर्णोद्यानकमेष तस्कर इव त्रासाद् विशामि द्रुतम् ॥१०॥**

*अन्वयः - पुरा यः अहं राज्ञां सहस्रैः वृतः राजा इव पौरैः अङ्गुलिभिः नवेन्दुवत् निर्दिश्यमानः पुरात् शनैः निरगमम्, सः एव वन्ध्यश्रमः एषः अहं सम्प्रति भूयः तत्र एव नगरे तस्करः इव त्रासात् द्रुतं जीर्णोद्यानं प्रविशामि॥*

*भावार्थः - पुरा यः अहं बहुभिर्भूपैरनुगम्यमानः पौरजनाङ्गुलिभिः नवेन्दुवन्निर्द्दिश्यमानः मन्दं मन्दं सलीलं नगरान्निरगच्छं स एवाहम् इदानीं असफलप्रयत्नः सन् स्तेन इव त्रासात् द्रुतगत्या अस्मिन् जीर्णोद्याने भूयः प्रविशामि। अत्रोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

अथवा, येषां प्रसादादिदमासीत् ते एव न सन्ति। (नाट्येन प्रविश्य विलोक्य च) अहो ! जीर्णोद्यानस्य नाभिरमणीयता। अत्र हि –

*इदानीम् उद्यानस्य जीर्णतां वर्णयन्नाह--*

**विपर्यस्तं सौधं कुलमिव महारम्भरचनं**
**सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदः ।**
**फलैर्हीना वृक्षा विगुणविधियोगादिव नया**
**स्तृणैश्छन्ना भूमिर्मतिरिव कुनीत्या ह्यविदुषः ॥११॥**

*अन्वयः- महारम्भरचनं सौधं कुलम् इव विपर्यस्तम्, सरः सुहृदां नाशेन साधोः हृदयम् इव शुष्कं वृक्षाः फलैः हीनाः विगुणनृपयोगात् नवाः इव फलैः हीनाः भूमिः कुनीतैः अविदुषः मतिः इव तृणैः छन्नाः।*

*भावार्थः - महता वास्तुकर्मविधानेन निर्मितमिदं राजप्रासादं सर्वथा मलिनभूतं दृश्यते यथा धर्मादि संस्कारयुतं सत्कुलं संस्काराभावेन पतितं भवति। उद्यानस्थ जलपूर्णोऽयं सरोवरः तथा नीरसो दृश्यते यथा मित्रवर्गादिविनाशेन साधोः हृदयं विक्षुब्धं भवति। वृक्षाः फलैः हीनाः तथा दृश्यन्ते यथा सन्ध्यादिगुणहीनस्य योगेन नीतयो लाभहीनाः भवन्ति। उद्यानं तृणैः छन्नं तथा दृश्यते यथा कुनीत्या विदुषः मतिः आच्छन्ना भवति। अत्रोपमालङ्कारः। शिखरिणी वृत्तम्।*

अपि चात्र -

*उद्यानपालकैः सततमुपसेवितानामिदानीं तदभावात् वृक्षाणां कीदृग् विपर्य्यास इति द्वाभ्यामाह--*

**क्षताङ्गानां तीक्ष्णैः परशुभिरुदग्रैः क्षितिरुहां**
**रुजा कूजन्तीनामविरतकपोतोपरुदितैः ।**
**स्वनिर्मोकच्छेदैः परिचितपरिक्लेशकृपया**
**श्वसन्तः शाखानां व्रणमिव निबध्नन्ति फणिनः ॥१२॥**

*अन्वयः- तीक्ष्णैः उदग्रैः परशुभिः क्षताङ्गानां क्षितिरुहां रुजा अविरत-कपोतोपरुदितैः कूजन्तीनां शाखानां व्रणं फणिनः परिचितपरिक्लेशकृपया वसन्तः स्वनिर्मोकच्छेदैः निबन्धन्ति इव।*

*भावार्थः- यथा स्वजनाः करुणया क्षतस्थानं वस्त्रेण वेष्टयन्ति। तथा तीक्ष्णकुठारैः क्षताङ्गानां वृक्षाणां रुजा अविरतकपोतोपरुदितैः कूजन्तीनां शाखानां व्रणं तत् सहवासिनः सर्पाः तेषां परिक्लेशकृपया श्वसन्तः स्वकञ्चुकेन वेष्टयन्ति। अत्रोत्प्रेक्षालङ्कारः। शिखरिणी वृत्तम् ॥*

एते च तपस्विनः

> **अन्तःशरीरपरिशोषमुपाश्रयन्तः**
> **कोटक्षतिस्रुतिभिरस्त्रमिवोद्वमन्तः ।**
> **छायावियोगमसिना व्यसने निमग्ना**
> **वृक्षाः श्मशानमुपगन्तुमिव प्रवृत्ताः ॥१३॥**

*अन्वयः - अन्तःशरीरपरिशोषम् उपाश्रयन्तः कीटक्षतिश्रुतिभिः अस्त्रम् उद्वमन्तः इव छायावियोगमलिना व्यसने निमग्नाः वृक्षाः श्मशानम् उपगन्तुं प्रवृत्ताः इव।*

*भावार्थः - सेकाभावात् शुष्यन्तः, कीटक्षतिरन्ध्रनिर्यासैः अश्रु उद्गिरन्तः छायावियोगशुष्का एते वृक्षाः विपन्निमग्नाः सन्तः श्मशानमनुगन्तुं प्रवृत्ता इव ज्ञायन्ते। यथा आहारविहारादिसंयमात् शरीरं शोषयन्तः देवतासमीपे स्वदुःखं निवेदयितुं अश्रूणि पातयन्तः, आतपक्लिष्टाः मलिनाः कृतवैराग्यावलम्बनाः शोकेन प्रियमुपगन्तुं तपस्विनस्तद् भृत्याः मरणे कृतनिश्चयाः श्मशानं गच्छन्ति। नन्दानां शोकेनताननुगन्तुमुद्यता इव इति उत्प्रेक्ष्यते इत्यतः उत्प्रेक्षालङ्कारः। वसन्ततिलकावृत्तम्।*

यावदस्मिन् विषमदशापरिणामसुलभे भग्नाग्रशिलातले मुहूर्तमुपविशामि (उपविश्याकर्ण्य च) अये ! किमयमाकस्मिकः शङ्खपटहविमिश्रो नान्दीनादः श्रूयते ? य एषः -

*दिक्षु प्रसरन्तम्—सहसा समुत्थितं तमेव नान्दीनादं विवृण्वन्नाह--*

> **प्रकुर्वञ् श्रोतॄणां श्रुतिपथमसारं गुरुतया**
> **बहुत्वात् प्रासादैः सपदि परिवीतोज्झित इव ।**
> **असौ नान्दीनादः पटुपटहशङ्खध्वनिमहान्**
> **दिशां दैर्घ्यं द्रष्टुं प्रसरति सकौतूहल इव ॥१४॥**

*अन्वयः - श्रोतृणाम् असारं श्रुतिपथं गुरुतया प्रकुर्वन् बहुत्वात् प्रासादैः सपदि परिपीतोज्झितः इव पटुपटहशङ्खध्वनिमहान् असौ नान्दीनादः सकौतूहलः इव दिशां दैर्घ्यं द्रष्टुं प्रसरति॥*

*भावार्थः - महत्तया श्रोतृणां कर्णविवरं बधिरीकुर्वन् बहुत्वात् राजप्रासादैरादौ परिपीतोऽपि पश्चादुद्वान्त इव अत्युच्चपटहशंखमिश्रितः अयं माङ्गलिकध्वनिः कुतूहलतया दिशामायामं द्रष्टुं प्रसरति। अत्रोत्प्रेक्षालङ्कारः। शिखरिणी वृत्तम्।*

(विचिन्त्य) आं, ज्ञातम् । एष हि मलयकेतुसंयमनसञ्जातो राजकुलस्य... (इत्यर्द्धोक्ते सासूयम्) मौर्यकुलस्याऽधिकपरितोषं पिशुनयति । (सबाष्पम्) कष्टं भोः ! कष्टम् !!

**श्रावितोऽस्मि श्रियं शत्रोरभिनीय च दर्शितः ।**
**अनुभावयितुं मन्ये यत्नः सम्प्रति मां विधेः ॥१५॥**

*अन्वयः- शत्रोः श्रियं श्रावितः (अस्मि), च अभिनीय दर्शितः अस्मि । मन्ये सम्प्रति विधेः माम् अनुभावयितुं यत्नः।*

*भावार्थः - विधिना शत्रोः श्रियं श्रावितोऽस्मि, तत्तद् व्यञ्जकहेतुमुपन्यस्य समीपमानीय दर्शितश्चास्मि। संप्रति माम् अनुभावयितुं अयम् यत्नः वर्त्तते। अत्रोत्प्रेक्षालङ्कारः। अनुष्टुप् वृत्तम्।*

पुरुषः - आसीनोऽयम् । तद्यावदार्यचाणक्यस्याज्ञां सम्पादयामि ।

(राक्षसमपश्यन्निव तस्याग्रतो रज्जुपाशेन कण्ठमुद्बध्नाति ।)

राक्षसः - (विलोक्य स्वगतम्) अये! कथमयमात्मानमुद्बध्नाति? नन्वयमहमिव दुःखितस्तपस्वी। भवतु, पृच्छाम्येनम् (उपसृत्य प्रकाशम्) भद्र ! भद्र !! किमिदमनुष्ठीयते ?

पुरुषः - (सबाष्पम्) आर्य ! यत् प्रियवयस्यविनाशदुःखितोऽस्मादृशो मन्दभाग्यो जनोऽनुतिष्ठति ।

श्रोतुमिच्छामि किं ते प्राणपरित्याग कारणम् ?

राक्षसः- (स्वगतम्) प्रथममेव मया ज्ञातं - 'नूनमहमिवायमार्त्तस्तपस्वीति'। भवतु, पृच्छाम्येनम् (प्रकाशम्) भद्र! व्यसनसब्रह्मचारिन्! यदि न गुह्यं, नातिभारिकं वा, ततः श्रोतुमिच्छामि किं ते प्राणपरित्यागकारणम् ?

पुरुषः - (निरूप्य) आर्य ! न रहस्यं, न वाऽतिगुरुकं, किन्तु न शक्नोमि प्रियवयस्यविनाशदुःखितहृदय एतावन्मात्रमपि मरणस्य कालहरणं कर्तुम्।

राक्षसः - (निःश्वस्याऽऽत्मगतम्) कष्टमेतेषु सुहृद्व्यसनेषु परवदुदासीनाः प्रत्यादिश्यामहे वयमनेन। (प्रकाशम्) भद्र ! यदि न रहस्यं नाऽतिगुरुकं वा, तत् पुनः श्रोतुमिच्छामि । कथ्यतां का गतिः दुःखस्येति ?

पुरुषः - अहो ! निर्बन्ध आर्यस्य, का गतिरेष निवेदयामि। अस्त्यत्र नगरे मणिकारश्रेष्ठी जिष्णुदासो नाम।

राक्षसः - (स्वगतम्) अस्ति जिष्णुदासश्चन्दनदासस्य परं मित्रम्। (प्रकाशम्) किं तस्य ?

पुरुषः - स मम प्रियवयस्यः।

राक्षसः - (सहर्षमात्मगतम्) अये ! प्रियवयस्य इत्याह। अत्यन्तसन्निकृष्टः सम्बन्धः। हन्त ! ज्ञास्यति चन्दनदासस्य वृत्तान्तम्। (प्रकाशम्) भद्र ! किं तस्य?

पुरुषः - (सबाष्पम्) साम्प्रतं स दीनजनदत्तविभवो ज्वलनं प्रवेष्टुकामो नगरान्निष्क्रान्तः। तदहमपि यावत्तस्य प्रियवयस्यस्याश्रोतव्यं न शृणोमि, तावदात्मानमुद्बध्य व्यापादयामोतीदं जीर्णोद्यानमागतः।

अथाऽग्निप्रवेशे तव सुहृदः को हेतुः?

राक्षसः - भद्र ! अथाऽग्निप्रवेशे तव सुहृदः को हेतुः ?

*अचिकित्स्यो महाव्याधिः राजक्रोधः अगम्यगुरुदारादिप्रघर्षणम् अप्रतिकार्यसुहृद्विनाशश्च इत्येतानि आत्मघातनिमित्तानि तेषु किं सञ्जातम् इति ज्ञातुकामः राक्षस आह--*

**किमौषधपथातिगैरुपहतो महाव्याधिभिः ?**

*अन्वयः - किम् औषधपथातिगैः महाव्याधिभिः उपहतः।*

*भावार्थः - अप्रतिकार्यव्याधिभिः ग्रस्तः असह्यपीडया तव मित्रस्य एष मरणव्यवसायः किम्।*

पुरुषः - आर्य ! नहि नहि ।

राक्षसः -

**किमग्निविषकल्पया नरपतेर्निरस्तः क्रुधा ? ।**

*अन्वयः - किम् अग्निविषकल्पया नरपतेः क्रुधा निरस्तः।*

*भावार्थः - रोगाक्रान्ततया तस्य नायं मरणव्यवसायः। पुनः राक्षसः पृच्छति---अग्निविषकल्पया नरपतेः क्रुधा प्रताडितः म्रियते किम्,*

पुरुषः - आर्य ! शान्तं पापं, शान्तं पापम् । चन्द्रगुप्तस्य जनपदेष्वनृशंसा प्रतिपत्तिः ।

राक्षसः -

**अलभ्यमनुरक्तवान् किमयमन्यनारीजनम् ?**

*अन्वयः - किम् अयं अलभ्यं अन्यनारीजनम् अनुरक्तवान् ।*

*भावार्थः – तर्हि कथय दुष्प्राप्ये नारीजने अनुरक्तः किम्? येन दुःखी भूत्वा प्राणांस्त्यजति।*

पुरुषः- (कर्णौ पिधाय) आर्य ! शान्तं पापं शान्तं पापम् । अभूमिः खल्वेष विनयनिधानस्य, वणिग्जनस्प, विशेषतो जिष्णुदासस्य ।

राक्षसः-

**किमस्य भवतो यथा सुहृद एव नाशोऽवशः ॥१६॥**

*अन्वयः- 'किम् अस्य भवतः यथा सुहृदः एव अवशः नाशः'*

*भावार्थः – पुनराह—किमयम् तव तुल्यः सुहृद्विनाशेन विनश्यति ?*

पुरुषः - आर्य ! अथ किम् ?

राक्षसः - (सावेगमात्मगतम्) चन्दनदासोऽस्य सुहृदः प्रियसुहृत् तस्य प्रियसुहृद्विनाश एवाऽग्निप्रवेशहेतुरिति यत् सत्यं समाकुलित एवाऽस्मि सुहृत्स्नेहपक्षपातिना हृदयेन। (प्रकाशम्) भद्र ! तस्यापि तव सुहृदः सुचरितं विस्तरेण श्रोतुमिच्छामि।

पुरुषः - आर्य ! अतोऽपरं न शक्नोमि मन्दभाग्यो मरणस्य विघ्नमुत्पादयितुम् ।

राक्षसः - श्रवणीयां कथां कथयतु भद्रमुखः।

पुरुषः - का गतिः ? एष खलु निवेदयामि, निशामयत्वार्यः ।

राक्षसः - भद्र ! दत्तावधानोऽस्मि ।

पुरुषः - अस्ति, जानात्यार्यः इह नगरे मणिकारश्रेष्ठी चन्दनदासो नाम ?

राक्षसः - (सविषादमात्मगतम्) एतत्तदपावृतमस्मद्विनाशदीक्षा-प्रकाशद्वारं दैवेन। हृदय ! स्थिरमिव किमपि ते कष्टतरमाकर्णनीयम्। (प्रकाशम्) भद्र ! श्रूयते मित्रवत्सलः स साधुः । किं तस्य ?

पुरुषः - स एतस्य जिष्णुदासस्य प्रियवयस्यो भवति ।

राक्षसः - (स्वगतम्) अयमभ्यर्णः शोकवज्रपातो हृदयस्य । (प्रकाशम्) ततस्ततः?

पुरुषः - ततो जिष्णुदासेन, प्रियवयस्यस्य स्नेहसदृशमद्यविज्ञप्तश्चन्द्रगुप्तः ।

राक्षसः - कथम् किमिति ?

पुरुषः - 'देव ! अस्ति मे गेहे कुटुम्बभरणपर्याप्तोऽर्थः । तस्य विनिमयेन मुच्यतां मे प्रियवयस्यश्चन्दनदास' इति ।

राक्षसः - (स्वगतम्) साधु जिष्णुदास ! साधु !! अहो ! दर्शितो मित्रस्नेहः कुतः?

*स्वार्थपरेऽस्मिन् जगति वणिजोऽपि जिष्णुदासस्य कष्टोपार्जितसर्व-वित्तविनिमयेन मित्रत्राणर्चिकीर्षा विज्ञाय राक्षसः अर्थस्य माहात्म्यं प्रदर्श्य सविस्मयं समर्थयति--*

पितृन् पुत्राः, पुत्रान् परवदभिहिंसन्ति पितरः

**पितृन् पुत्राः, पुत्रान् परवदभिहिंसन्ति पितरो**
**यदर्थं सौहार्दं सुहृदि च विमुञ्चन्ति सुहृदः ।**
**प्रियं मोक्तुं तद्यो व्यसनमिव सद्यो व्यवसितः**
**कृतार्थोऽयं सोऽर्थस्तव सति वणिक्त्वेऽपि वणिजः ॥१७॥**

*अन्वयः - यदर्थं पुत्राः पितृन् पितरः पुत्रान् परवत् अभिहिंसन्ति, सुहृदः सौहार्दं च विमुञ्चन्ति तत् प्रियं यः व्यसनम् इव सद्यः मोक्तुं व्यवसितं सः अयम् अर्थः वणिजः तव वणिक्त्वे सति अपि कृतार्थः।*

*भावार्थः - यमर्थं निमित्तीकृत्य पुत्राः जननीजनकान् पितरः स्वौरसान् पुत्रान् शत्रुवदभिनिघ्नन्ति, किञ्च यदर्थं सुहृदः स्वसुहृदि सौहार्दं च त्यजन्ति' तथैव प्रियमपि धनं त्वं प्रियसुहृदि विपन्ने सति त्यक्तुं समुद्यतः। अतः वणिजः तव वणिक्त्वेऽपि सोऽयमर्थः सफलः।*

*अतः वणिजः तव वणिक्त्वेपि वणिग्जनस्यार्थममतायाः दुष्परिहार्यत्वादिति भावः। स अयं अर्थः कृतार्थः = सफलः । अत्र प्रथमपादे 'परवत्' इत्यत्रोपमा, चतुर्थपादे अर्थस्य कृतार्थतां प्रति तृतीयपादगतवाक्यार्थस्य हेतुतया काव्यलिङ्गम्, 'वणिक्त्वेपि' इत्यत्र अधिकारेण अर्थव्ययविरोध वणिक्त्वप्रदर्शनेन विरोधश्च। इत्येतेषाम् अलङ्काराणां संकरः । शिखरिणीवृत्तम्।*

(प्रकाशम्) भद्र! ततस्तथाऽभिहितेन सता किं प्रतिपन्नं मौर्येण ?

राक्षसपरिवारं न दत्तवान् इति कारणेन मृत्युदण्डं प्राप्नोति

पुरुषः - आर्य ! तत एवं भणितेन चन्द्रगुप्तेन प्रतिणितः श्रेष्ठी जिष्णुदासः-- जिष्णुदास ! न मयाऽर्थस्य कारणेन श्रेष्ठी चन्दनदासः संयमितः, किन्तु प्रच्छादितोऽनेनामात्यराक्षसस्य गृहजनः, बहुशो याचितेनाऽपि न समर्पित' इति। तद्यद्यमात्यराक्षसस्य गृहजनं समर्पयति, ततोऽस्त्यस्य मोक्षः, अन्यथा प्राणहरोऽस्य दण्ड' इति भणित्वा बध्य- स्थान-मानीतश्चन्दन-दासः। ततो 'यावत् प्रियवयस्यस्य चन्दनदासस्याश्रोतव्यं न शृणोमि, तावदेवात्मानं व्यापादयामि' इति ज्वलने प्रवेष्टुकामः श्रेष्ठी जिष्णुदासो नसरान्निर्गतः। अहमपि यावत् प्रियवयस्यस्य जिष्णुदासस्याश्रोतव्यं न शृणोमि, तावदुद्बध्यात्मानं व्यापादयामि, इतीदं जीर्णोद्यानमागतोऽस्मि।

राक्षसः - न खलु व्यापादितश्चन्दनदासः ?

पुरुषः - आर्य ! न तावत् व्यापाद्यते। स खलु साम्प्रतं पुनः पुनरमात्य-राक्षसस्य गृहजनं याच्यते। न स मित्रवत्सलतया याच्यमानोऽपि तं समर्पयति, तदेतेन कारणेन भवत्यस्य मरणस्य कालहरणम् ।

राक्षसः - (सहर्षमात्मगतम्) साधु वयस्य चन्दनदास ! साधु साधु !

**शिवेरिव समुद्भूतं शरणागतरक्षया ।**<br>**विचीयते त्वया साधो ! यशोऽपि सुहृदा विना ॥१८॥**

*अन्वयः - साधो ! शरणागतरक्षया समुद्भूतं शिवेः इव त्वया सुहृदा विना अपि यशः विचीयते।*

***भावार्थः*** *- पुरा शिविना शरणागतस्य कपोतरूपधारिणः अग्नेः रक्षणार्थं तत्सन्निधावेव स्वशरीरमुत्कृत्य श्येनरूपधारिणे इन्द्राय प्रदत्तवान्, त्वं तु सुहृदा मयाविनैव स्वप्राणान् दातुं समुद्यतः। अतस्त्वं ततोऽपि महानसि। कपोतवेषधारिणः अग्नेः शरणागते जाते तत्सन्निधावेव श्येनरूपधारिणः इन्द्रात् शिबिना संरक्षणं कृतमिति कथा महाभारते द्रष्टव्या। उपमाव्यतिरेकयोः संसृष्टिः। अनुष्टुप् छन्दः।*

(प्रकाशम्) भद्र! भद्र!! गच्छ शीघ्रमिदानीं जिष्णुदासं ज्वलनप्रवेशान्निवारय। अहमपि चन्दनदासं मरणान्मोचयामि।

पुरुषः - अथ केन पुनरुपायेनार्यश्चन्दनदासं मरणान्मोचयामि ?

राक्षसः - (खड्गमाकृष्य) नन्वनेन व्यवसायमहासुहृदा निस्त्रिंशेन।

ननु पश्य –

*पुरुषेण चन्दनदासरक्षणोपाये पृष्टे राक्षसः स्वकरस्थितं निस्त्रिंशरूपमुपायं संकेतयन् तमेवोपवर्णयति--*

राक्षसः तं पुरुषं विष्णुदासस्य मृत्योः निवारणाय प्रेषयति

**निस्त्रिंशोऽयं विगतजलदव्योमसङ्काशमूर्त्ति-**
**र्युद्धश्रद्धापुलकित इव प्राप्तसख्यः करेण।**
**सत्त्वोत्कर्षात् समरनिकषे दृष्टसारः परैर्मे**
**मित्रस्नेहाद् विवशमधुना साहसे मां नियुङ्क्ते ॥१९॥**

*अन्वयः - विगतजलदव्योमसङ्काशमूर्तिः करेण प्राप्तसख्यः युद्धश्रद्धापुलकितः इव सत्त्वोत्कर्षात् परैः समरनिकषे दृष्टसारः अयं मे निस्त्रिंशः अधुना मित्रस्नेहात् विवशं मां साहसे नियुङ्क्ते।*

***भावार्थः****- मेघावरणरहितं आकाशमिव कृष्णवर्णः करेण प्राप्तसौहार्दः युद्धश्रद्धया पुलकितः, बलशालितया परैः समरनिकषे दृष्टसारः अयं मे खड्गः इदानीं मित्रस्नेहात् व्याकुलं माम् ईदृशे साहसकार्ये नियोजयति।*

*अत्र व्योमसंकाशमूर्त्तिरित्यत्रोपमा, युद्धश्रद्धापुलकितः इत्यत्रोत्प्रेक्षा समर निकषे इत्यत्र रूपकम्। एषां त्रयाणां संकरः। मन्दाक्रान्तावृत्तम्।*

पुरुषः - (विलोक्य पादयोर्निपत्य) आर्य! एवं श्रेष्ठिचन्दनदासजीवितं भवतीति श्रुतं विषमदशाविभागपरिणामपतितो न शक्नोमि निश्चितपदं

प्रतिपत्तुम् । अथ सुगृहीतनामधेया अमात्यराक्षसपादा यूयमिति, तत् कुरु मे प्रसादं सन्देहनिर्णयेन ।

**राक्षसः** - भद्र! सोऽहमनुभूतभर्तृवंशविनाशः सुहृद्विनाशहेतुरनार्यो दुर्गृहीतनामा यथार्थी राक्षसः ।

**पुरुषः** - (सहर्षं पुनः पादयोनिपत्य) प्रसीदत, प्रसीदत । आश्चर्यम् ! दिष्ट्या कृतार्थोऽस्मि ।

**राक्षसः** - भद्र! उत्तिष्ठोत्तिष्ठ, कृतमिदानीं कालहरणेन, निवेद्यतां जिष्णुदासाय - 'यथैष राक्षसः चन्दनदासं मरणान्मोचयति'। (इति 'निस्त्रिंशोऽयम्' इत्यादि पठन् आकृष्टखड्गः परिक्रामति।)

**पुरुषः** - (पादयोर्निपत्य) प्रसीदन्तु प्रसीदन्त्वमात्यराक्षसपादाः। अस्ति तावदत्र नगरे प्रथमं चन्द्रगुप्तहतकेनाऽऽर्यशकटदासस्य वध आज्ञप्तः । स च केनापि वध्यस्थानादपहृत्य देशान्तरमपवाहितः। अतश्चन्द्रगुप्तहतकेन 'कस्मात् प्रमादः कृतः।' इति आर्यशकटदासवधवञ्चनया समुज्ज्वलितो रोषाग्निर्घातकजनवधजलेन निर्वापितः । ततः प्रभृति घातका यं कमपि गृहीतशस्त्रम् अपूर्वं पुरुषमग्रतः पश्चाद्वा प्रेक्षन्ते, तदाऽर्द्धपथे एवात्मनो जीवितं परिरक्षन्तोऽप्रमत्ता एतेऽप्राप्तवध्यस्थानं वध्यं व्यापादयन्ति। तस्मादेवं गृहीतशस्त्रैरमात्यपादैस्तत्र गच्छद्भिः श्रेष्ठिचन्दनदासस्य वध-स्त्वरायितो भवति । (इति निष्क्रान्तः)

**राक्षसः** - (स्वगतम्) अहो ! दुर्बोधश्चाणक्यवटोर्नीतिमार्गः । कुतः ?

*इदानीं चाणक्यनीतेर्दुरवगाहत्वं विभावयन् किंकर्त्तव्यविमूढो राक्षसः विचारयति--*

**यदि स शकटो नीतः शत्रोर्मतेन ममान्तिकं**
**किमिति निहतस्तेन क्रोधाद् वधाधिकृतो जनः।**
**अथ न कृतकं तादृक्कष्टं कथं नु विभावये-**
**दिति मम मतिस्तर्कारूढा न पश्यति निश्चयम् ॥२०॥**

*अन्वयः - यदि शत्रोः मतेन सः शकटः मम अन्तिकं नीतः तेन क्रोधावेशात् वधाधिकृतः जनः किम् इति निहतः, अथ कृतकं न तादृक् कष्टं कथं नु विभावयेत् इति तर्कारूढा मम मतिः निश्चयं न पश्यति।*

*भावार्थः- यदि चन्द्रगुप्तस्य चाणक्यस्य वानुमत्या अयं शकटदासः वध्य-स्थानादपवाह्य मम समीपं प्रापितस्तदा स्वाभिप्रायसंपादनेन घातकस्य अपराधाभावात् वधाधिकृतः घातकजनः किमर्थं निहतः। अथैतत् सर्वं न कपटकार्यं किं तु ययार्थतयैव पर्यवसन्नम्, तदा तादृक् स्वामिद्रोहरूपं पापकर्म शकटदासः कथमाचरेदिति। इत्थं मम बुद्धिः संशयदोलाया-मधिरूढा किञ्चिन्निर्णयं नाधिगच्छति। अत्र काव्यलिङ्गमलङ्कारः। शिखरिणी वृत्तम्।*

(विचिन्त्य) तस्मात् –

*एवं बहुधा वितर्कयन् चन्दनदासमोक्षणार्थं स्वात्मसमर्पणं कर्तव्यमिति निश्चिन्वन्नाह--*

राक्षसः स्वयं चन्दनदासस्य रक्षणार्थं प्रस्थितः

**नायं निस्त्रिंशकालः प्रथममिह कृते घातकानां विघाते**
**नीतिः कालान्तरेण प्रकटयति फलं किं तया कार्यमत्र ?**
**औदासीन्यं न युक्तं प्रियसुहृदि गते मत्कृते चातिघोरां**
**व्यापत्तिं, ज्ञातमस्य स्वतनुमहमिमां निष्क्रयं कल्पयामि ॥२१॥**

*अन्वयः - इह प्रथमं घातकानां विघाते कृते अयं निस्त्रिंशकालः न नीतिः कालान्तरेण फलं प्रकटयति, तया अत्र किं कार्यं प्रियसुहृदि मत्कृताम् एव घोरां व्यापत्तिं गते औदासीन्यं न युक्तं ज्ञातम्। अहम् इमां स्वतनुम् अस्य-निष्क्रयं कल्पयामि।*

*भावार्थः - अस्मिन् समये चन्दनदासस्य घातकानां विघाते कृते तत्पूर्वं त्वरितं चन्दनदासघातः प्रसज्येत। अतः खड्गधारणमनुचितं राजनीते-राचरणं, न सद्यः फलदायकम्, अपि तु कालान्तरे फलदायकम्। संप्रति हि शिरसि भयं तत्प्रतीकारः दूरे इति न्यायेन अनुपपन्नम्--औदासीन्येन वर्त्तनमपि सर्वथानुचितं यतोऽयमस्मत्सुहृद् चन्दनदासः मत्कृते एवैतादृशीं घोरां विपत्तिमुपलब्धवान्। अतः चन्द्रगुप्ताय स्वशरीरं समर्प्य चन्दनदासं मोक्षयिष्यामि इत्येव युक्तम्।*

*प्रथमं छलतः परमार्थतो वा घातकानां विघाते कृते चन्दनदासस्य त्वरिततरं घातनभयः प्रसज्येत अतः खड्गधारणमनुचितम्, नीत्याचरणन्तु न सद्यः फलदायि किन्तु कालान्तरे फलति, संप्रति हि शिरसि भयम्, तत्प्रतीकारः दूरे' इति न्यायेन तदनुपपन्नमित्यर्थः। किञ्चौदासीन्येन वर्त्तने तु सुहृद्विनाशोपेक्षणात् कृतघ्नतादिमहादोषमापतेत्। अतश्चन्द्रगुप्तायात्मानं*

*दासीभावेन निवेद्य सुहृदो विमोक्षणं न्याय्यम्। अत्र स्वशरीरमूल्येन प्रिय-सुहृदो विमोचनात् परिवृत्तनामालङ्कारः। स्रग्धरावृत्तम्।*

(इति निष्क्रान्ताः सर्वे।)

इति मुद्राराक्षसे षष्ठोऽङ्कः ।।६।।

## Summarised Overview

अस्मिन् अङ्के मलयकेतुकटकात् सिद्धार्थकः आगतः। सिद्धार्थकः स्वमित्रं सुसिद्धार्थकं कथयति यत् आर्यः चाणक्यः मम आदेशं दत्तवान् यत् 'सिद्धार्थक! गत्वा चन्द्रगुप्ताय मलयकेतुहतकेन राक्षसस्य निराकृत्य राक्षसं, हताः चित्रवर्मप्रमुखाः प्रधानाः पञ्च पार्थिवाः, मलयकेतुः बद्धः भवति इति। सः कथयति यत् आर्यचाणक्यः पाटलिपुत्रात् सेनायाः सह सम्पूर्णं आराजलोकं आक्रमितवान्, चन्दनदासस्य स्नेहात् पुनः राक्षसः पाटलिपुत्रम् आगतः। अत्र सः राक्षसः कुसुमपुरम् आगत्य स्वस्य दुर्दशायाः, स्वस्य विनयस्य च पश्चात्तापं करोति। कुसुमपुरस्य नन्दराजस्य च पुरातनाः स्मृतयः राक्षसस्य मनसि नवीनाः भवन्ति। मलयकेतोः विवेकहीनतायाः, प्रतिकूलभाग्यस्य च विषये सः अपि अनुपातं करोति।

सः एवं कथयति यत् आर्यचाणक्यस्य आदेशानुसारं चाणक्यस्य अन्यः गुप्तचरः चाणक्यस्य चण्डालरूपेण वेषं धारयित्वा वधस्थानं प्रति नेतुम् अस्ति। तदा राक्षसः पुरुषं पुरतः लम्बमानं पश्यति, वस्तुतः सः चाणक्यस्य एव व्यक्तिः अस्ति। राक्षसेन आत्मनः लम्बनस्य कारणं पृष्टे सति सः कथयति यत् सः कुसुमपुरे निवसतः मणिकारश्रेष्ठी विष्णुदासस्य मित्रम् अस्ति तथा च विष्णुदासः चन्दनदासः नाम मणिकरश्रेष्ठ्याः परममित्रमस्ति। विष्णुदासः सर्वं धनं दानं कृत्वा अग्निप्रवेशं कर्तुं गच्छति यतः तस्य मित्रं चन्दनदासः राक्षसपरिवारं न दत्तवान् इति कारणेन मृत्युदण्डं प्राप्नोति। तथा च विष्णुदासः अग्निं प्रविशति इति कारणतः सः स्वस्य मृत्युविषयं श्रुत्वा भीतः अस्ति। राक्षसः तं पुरुषं विष्णुदासस्य मृत्योः निवारणाय प्रेषयति, स्वयं चन्दनदासस्य रक्षणार्थं प्रस्थितः। राक्षसः समाधानस्य चिन्तनं आरभते।

## Assignments

उतरं लिखत।

1. सुसिद्धार्थकः कः?

**लघुटिप्पणिं लिखत।**

1. येनावामीदृशे नृशंसे कर्मणि नियुज्यावहे ?
2. 'किंनिमित्तं कुकविकृतनाटकस्येवान्यद् मुखेऽन्यन्निर्वहणे'।
3. तथा सर्वलोकप्रत्यक्षमुज्झिताधिकारो भूत्वा कथमार्यचाणक्यः पुनरपि तदेव मन्त्रिपदमारूढः ?
4. 'दैवेनोपहतस्य बुद्धिरथवा सर्वा विपर्यस्यति' ।
5. 'अलक्षितनिपाता पुरुषाणां समविषमदशापरिणतयो भवन्ति' कुतः?
6. अथाऽग्निप्रवेशे तव सुहृदः को हेतुः? विशदयत।

**निबन्धात्मकप्रश्नौ ।**

1. राक्षसस्य कुसुमपुरागमनान्तरं स्वस्य दुर्दशायाः, तथा विनयस्य च पश्चात्तापं विशदयत।
2. मुद्राराक्षस्य षष्ठाङ्कस्य कथां स्ववाक्यैः संक्षिपत ।

# Suggested Readings


1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum


# References


1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वारणासि।
2. महाकवि-विशाखदत्तप्रणीतं मुद्राराक्षसम्, पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.

5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# मुद्राराक्षसे सप्तमः अङ्कः

## Learning Outcomes

- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् अवगच्छति।
- मुद्राराक्षसनाटकपठनद्वारा राजनैतिकनाटकानां सविशेषविज्ञानं गृह्णाति।
- मुद्राराक्षसस्य सप्तमाङ्ककथां जानाति।
- संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यम्।
- चाणक्यस्य कूटनीतिनैपुण्यम्।
- श्लोकाना पठनेन साहित्याभिरुचिः जायते।

## Background

राक्षसः अत्यन्तं विचलितः भूत्वा स्वमित्रस्य मणिकरश्रेष्ठीचन्दनदासस्य उद्धारस्य उपायं चिन्तयितुं आरभते। द्वौ चण्डालौ चन्दनदासं वधस्थानं प्रति नयतः। चन्दनदासस्य पत्नी पुत्रश्च शोचन्ति। चन्दनदासः तौ सान्त्वयति। अथ राक्षसः तत्र प्रादुभूय समर्पणं करोति। चाणक्यः अपि तत्र प्रादुभूय राक्षसं अभिवादयति। चाणक्यः राक्षसं वदति यत् मया त्वां चन्द्रगुप्तस्य मन्त्रिणं कर्तुं एषा लीला निर्मिता। चन्द्रगुप्तः अग्रे आगत्य राक्षसं अभिवादयति। सः राक्षसः अपि अन्ते चन्द्रगुप्तस्य उपदेशं स्वमित्रचन्दनदासस्य रक्षणार्थं स्वीकुर्वति। एवं चाणक्येन नन्दवंशस्य वधस्य प्रतिज्ञा, चन्द्रगुप्तः राक्षसस्य अमात्यं च कृता सिद्ध्यति। चाणक्यः शिथिलकेशान् बध्नाति, भरतवाक्येन सह सुखेन नाटकस्य समाप्तिः भवति।

## Keywords

चण्डालः, चन्दनदासस्य पत्नी कुटुम्बिनी, चाणक्यस्य आगमनम्, चाणक्यस्य राक्षसप्रशंसा, चण्डालानां कपटलेखं विषयम् अधिकृत्य कथनम्, कूटनीतिमधिकृत्य विशदीकरणम्, मलयकेतोः प्राणरक्षायाचनं, चन्द्रगुप्तस्य अमात्यः राक्षसः आर्यचाणक्यः च, चन्दनदासं पृथिव्याः सर्वनगरनायकपदे नियुक्तिः, चाणक्यः शिथिलकेशान् बध्नाति, भरतवाक्यम्।

# Discussion

**सप्तमोऽङ्कः**

(ततः प्रविशति चाण्डालः)

**चण्डालः-**

अपसरत आर्याः ! अपसरत, अपेत मान्याः ! अपेत—

*इदानीं राक्षसमित्रस्य सपुत्रकलत्रस्य चन्दनदासस्य निकारं राजाहितकारिणो दुर्दशावर्णनमिषेण प्रकटयन् आह--*

**यदि रक्षितुं मन्यध्वं प्राणं विभवं कुलं कलत्रं च ।**
**परिहरत तस्माद् विषमिव राजापथ्यं प्रयत्नेन ॥१॥**

*अन्वयः - यदि प्राणं विभवं कुलं कलत्रं च रक्षितुं मन्यध्वम्, तस्मात् विषम् इव राजापथ्यं प्रयत्नेन परिहरत।*

*भावार्थः - कुलविभवकलत्रादिसहितं स्वजीवनमिच्छेच्चेत्तदा राज्ञोऽहितं सर्वविधचेष्टया विषमिव परिहरेत्। अत्रायं विशेषः--विषसेविनः पुरुषस्य कादाचित्कन्यायेन मरणं भवति वा न वा। यदि भवति मरणं तदा तस्यैवैकस्य न तत्कुलविभवकलत्रादेः परं राजापथ्यकारिणः कुलादि-सहितस्य सर्वविधविनाशो निश्चित इति।*

**अपि च –**

*प्रकारान्तरेण पुनः तदेव द्रढयति--*

**भवति पुरुषस्य व्याधिर्मरणं वा सेविते अपथ्येऽपि ।**
**राजापथ्ये पुनः सेविते हि सकलमपि कुलं म्रियते ॥२॥**

*अन्वयः - अपथ्ये सेविते पुरुषस्य व्याधिः वा मरणं भवति पुनः राजापथ्ये सेविते सकलम् अपि कुलं म्रियते।*

*भावार्थः - अपथ्ये कस्मिंश्चिद् विषादिसेविते जनस्य व्याधिर्मरणं वा - सकलं कुलं वि भवति। किं तु राजद्रोहरूपापथ्ये सेवितेनश्यति। तस्मात् सर्वथा राजद्रोह परिहर्तव्यः।*

तद्यदि न प्रत्ययध्वं, तदा प्रेक्षध्वमेनं राजापथ्यकारिणं श्रेष्ठिचन्दनदासं वध्यस्थानमानीयमानं सपुत्रकलत्रम् ।(आकाशे) आर्याः ! किं भणथ? 'अस्ति किं चन्दनदासस्य मोक्षोपाय' इति ? कुतोऽस्याधन्यस्य मोक्षोपायः? एतत् पुनरस्ति--स यद्यमात्यराक्षसस्य गृहजनं समर्पयति। (पुनराकाशे) किं भणथ ? 'एष शरणागतवत्सल आत्मनो जीवितस्य कारणेनेदृशमकार्यं न करिष्यती' ति। आर्याः! यद्येवं, तेन ह्यवधत्तास्य शुभगतिम्। किमिदानीं युष्माकं प्रतीकारविचारेण?

दौ चण्डालौ चन्दनदासं वधस्थानं प्रति नयतः

मुद्राराक्षसे चन्दनदासस्य पत्न्याः नाम 'कुटुम्बिनी'

(ततः प्रविशति द्वितीयचाण्डालानुगतो वध्यवेषधारी शूलं स्कन्धेनादाय कुटुम्बिन्या पुत्रेण चानुगम्यमानश्चन्दनदासः।)

**चन्दनदासः-** हा धिक्, हा धिक् ! अस्मादृशानामपि नित्यचारित्र-भङ्गभीरूणां चौरजनोचितं मरणं प्राप्तमिति नमः कृतान्तस्य। अथवा न नृशंसानामुदासीनेष्वितरेषु वा विशेषोऽस्ति । तथा हि—

*इदानीं नृशंसानां निर्दोषसदोषविचारो नास्तीति सोदाहरणं प्रस्तौति—*

**मुक्त्वा आमिषाणि मरणभयेन तृणैर्जीवन्तम् ।**
**व्याधानां मुग्धहरिणं हन्तुं को नाम निर्बन्धः ?॥**

*अन्वयः- मरणभयेन आमिषाणि मुक्त्वा तृणैः जीवन्तं मुग्धहरिणं हन्तुं व्याधानां कः नाम निर्बन्धः?*

*भावार्थः - मरणभीत्या मांसादीनि त्यक्त्वा घासादिना जीवनं यापयतः हरिणान् हन्तुं व्याधानां कीदृशो दुराग्रह इति नावधारयितुं शक्यते। तत्र केवलं तेषां क्रौर्यमेव कारणम्।*

(समन्तादवलोक्य) भो प्रियवयस्य जिष्णुदास! कथं प्रतिवचनमपि मे न प्रतिपद्यसे इति । अथवा, दुर्लभाः खल्वेते पुरुषाः, येऽस्मिन् काले दृष्टिपथेऽपि तिष्ठन्ति। (सबाष्पम्) एतेऽस्मत्प्रियवयस्या अश्रुपातमात्रेण कृतप्रतीकारा निवर्तमानाः परिवर्द्धमानशोकदीनवदना बाष्पगुर्व्या दृष्ट्या मामनुगच्छन्ति । (इति परिक्रामति)

**चण्डालौ** - (परिक्रम्यावलोक्य च) आर्य चन्दनदास ! आगतोऽसि वध्यस्थानं तद् विसर्जय परिजनम् ।

**चन्दनदासः** - आर्ये ! कुटुम्बिनि ! निवर्तस्व त्वं सपुत्रा । वध्यस्थानं खल्वेतत्, अतोऽपरमभूमिः खल्वनुगन्तुम् ।

**कुटुम्बिनी** - (सबाष्पम्) परलोकं प्रस्थित आर्यो न पुनर्देशान्तरं तदयोग्यमिदानीं कुलजनस्य निवर्तितुम् ।

मित्रकार्येण मम विनाशो, न पुरुषदोषेण

**चन्दनदासः** - ' आर्ये ! सत्यं, मित्रकार्येण मम विनाशो, न पुरुषदोषेण; तत् किं हर्षस्थानेऽपि रोदिषि' ? इति ।

**कुटुम्बिनी** - आर्य ! यद्येवं, तदनुचितमिदानीं कुलजनेन निवर्तितुम् ।

**चन्दनदासः** - अथ किं व्यवसितमार्यया ?

**कुटुम्बिनी** - (सबाष्पम्) भर्तुश्चरणमनुगच्छन्त्या--आत्माऽनुग्रहो भवति इति ।

**चन्दनदासः** - आर्ये ! दुर्व्यवसितम्, तदिदानीमार्ययाऽयमश्रुतलोक-व्यवहारः कुमारोऽनुग्रहीतव्य इति ।

चन्दनदासस्य पत्नी पुत्रश्च दुःखम् अनुभवतः

**कुटुम्बिनी** - अनुगृह्णन्त्वेनं प्रसन्नाः कुलदेवताः। जात ! पुत्रक ! प्रणम अपश्चिमस्य पितुः पादयोः ।

**पुत्रः** - (पादयोर्निपत्य) तात ! मया तातविरहितेन किमनुष्ठातव्यम् ?

**चन्दनदासः** - पुत्र ! चाणक्यविरहिते देशे वस्तव्यम् ।

**चाण्डालौ** - आर्य चन्दनदास ! निखातः शूलः, तदिदानीं सज्जो भव ।

**कुटुम्बिनी** – आर्य ! परित्रायध्वं परित्रायध्वम् ।

चन्दनदासः तौ सान्त्वयति

**चन्दनदासः** - भद्रमुख ! मुहूर्तं तिष्ठ । अयि जीवितवत्सले ! किमत्राक्रन्दसि? स्वर्गं गताः खलु ते देवाः नन्दाः, ये दुःखितं स्त्रीजनं प्रतिदिनमनुकम्पन्ते।

**प्रथमश्चण्डालः** - अरे वेणुवेत्रक ! गृहाणेमं चन्दनदासम् । गृहजनः स्वयमेव गमिष्यति ।

**द्वितीयश्चाण्डालः** - अरे वज्रलोमक ! एष गृह्णामि ।

अवश्यम्भवितव्येऽपि विनाशे मित्रकार्यं समुद्वहमानो विनाशमनुभवामि

**चन्दनदासः** - (इति पुत्रं परिष्वज्य मूर्ध्नि समाघ्राय) भद्रमुख ! तिष्ठ मुहूर्त्तम्, यावत् पुत्रकं परिष्वजामि । जात ! पुत्रक ! अवश्यम्भवितव्येऽपि विनाशे मित्रकार्यं समुद्वहमानो विनाशमनुभवामि ।

**पुत्रः** - तात ! इदं खलु भणितव्यं किं कुलक्रमः खल्वेषोऽस्माकम् ? (इति पादयोः पतति)

**द्वितीयश्चण्डालः** - अरे गृहाण वज्रलोमक !

(चाण्डालौ गृह्णीतश्चन्दनदासमारोपयितुं शूले)

**कुटुम्बिनी** - (सोरस्ताडम् ) आर्याः ! परित्रायध्वम् परित्रायध्वम् ।

राक्षसः तत्र प्रत्यक्षो भवति

**राक्षसः** - (पटाक्षेपेण प्रविश्य) भवति ! न भेतव्यं न भेतव्यम् । भो भो शूलायतनाः ! न खलु व्यापादनीयश्चन्दनदासः । कुतः?

**येन स्वामिकुलं रिपोरिव कुलं दृष्टं विनश्यत् पुरा**
**मित्राणां व्यसने महोत्सव इव स्वस्थेन येन स्थितम् ।**
**आत्मा यस्य वधाय वः परिभवक्षेत्रीकृतोऽपि प्रिय-**
**स्तस्यायं मम मृत्युलोकपदवी वध्यस्रगाबध्यताम् ॥४॥**

चन्दनदासस्य स्थाने चाणक्यं वधं याचते

*अन्वयः- येन पुरा स्वामिकुलं रिपोः कुलम् इव विनश्यत् दृष्टम्, येन मित्राणां व्यसने महोत्सवे इव स्वस्थेन स्थितं परिभवक्षेत्रीकृतः अपि यस्य आत्मा वधाय वः प्रियः तस्य मम मृत्युलोकपदवी इयं वध्यस्रक् आबध्यताम्।*

*भावार्थः - येन मया पूर्वं शत्रुकुलमिव स्वस्वामिनन्दकुलं विनाशमुपगच्छत् दृष्टम्। येन च मया मित्राणां व्यसने समापन्ने महोत्सवे इव प्रकृतिस्थेन सता स्थितम्। यस्य मम आत्मा वः तिरस्कारपात्रीकृतः अपि प्रियः जातः। तस्य मम कण्ठे यमलोकगमनार्थं वध्यचिह्नभूतेयं स्रक् अर्प्यताम्।*

**चन्दनदासः** - (विलोक्य सबाष्पम्) अमात्य ! किमिदं ते व्यवसितम् ?

**राक्षसः** - त्वदीयसुचरितैकदेशस्यानुकरणं किल ।

**चन्दनदासः**- अमात्य ! सर्वमपि मे निष्फलमिमं प्रयासं कुर्वता न प्रियमनुष्ठितममात्येन ।

**राक्षसः**- सखे चन्दनदास ! कृतमुपालम्भेन, स्वार्थप्रधानो हि जीवलोकः। भद्रमुख ! अयमर्थो निवेद्यतां तावद् दुरात्मने चाणक्याय ।

**चण्डालौ** - अथ किमिति ?

**राक्षसः –**

*चण्डालाभ्यां चाणक्याय निवेद्यमर्थं राक्षसः प्रियसुहृदं चन्दनदासं प्रशंसन्नाह-*

> **दुष्कालेऽपि कलावसज्जनरुचौ प्राणैः परं रक्षता**
> **नीतं येन यशस्विनाऽतिलघुतामौशीनरीयं यशः ।**
> **बुद्धानामपि चेष्टितं सुचरितैः क्लिष्टं विशुद्धात्मना**
> **पूजार्होऽपि स यत्कृते तव गतो वध्यत्वमेषोऽस्मि सः ॥५॥**

*अन्वयः - असज्जनरुचौ दुष्काले कलौ अपि प्राणैः परं रक्षता येन यशस्विना औशीनरीयं यशः अतिलघुतां नीतम्, विशुद्धात्मना सुचरितैः बुद्धानाम् अपि चेष्टितं क्लिष्टम्, पूजार्हः अपि सः यत्कृते तव बध्यत्वं गतः, सः एषः अहम् अस्मि॥*

***भावार्थः** - अस्मिन् दुष्टकाले कलियुगेऽपि औशीनरशिवेः चरितं स्वप्राणदानेनान्यं परिरक्षिता येन मन्दीकृतं किञ्च स्वकीयविशुद्धचरणैः येन बौद्धानां विचेष्टितम् तिरस्कृतम्। सर्वथा सम्मानार्हः अपि सः महात्मा चन्दनदासः यस्य कृते शूलमारोपितः, स अहं राक्षसः वध्यस्थाने समागतोऽस्मि इति निवेदय। अत्र दीपक व्यतिरेकपरिवृत्तिभिः सङ्करः। शाद्रूलविक्रीडितं वृत्तम्।*

**प्रथमः** - अरे वेणुवेत्रक! त्वं तावच्छ्रेष्ठिचन्दनदासं गृहीत्वाऽस्य श्मशानपादपस्य छायायां मुहूर्तन्तिष्ठ, यावदार्यचाणक्यस्य निवेदयामि, यथा- 'गृहीतोऽमात्यराक्षस' इति ।

**द्वितीयः** - अरे वज्ज्रलोमक ! एवं भवतु ।

(इति सपुत्रदारेण चन्दनदासेन सह निष्क्रान्तः।)

**प्रथमः** - (राक्षसेन सह परिक्रम्य) कः कोऽत्र दौवारिकाणाम् ? निवेदयत तावत् नन्दकुलसैन्यसञ्चयचूर्णनकुलिशस्य मौर्यकुलप्रतिष्ठापितधर्म-सञ्चयस्यार्यचाणक्यस्य ।

**राक्षसः** - (स्वगतम्) एतदपि नाम राक्षसेन श्रोतव्यम् ?

**चाण्डालः** - 'एष खल्वार्यनीतिसंयमितबुद्धिपरिसरो गृहीतोऽमात्यराक्षसः' इति।

(ततः प्रविशति जवनिकावृतशरीरो मुखमात्रदृश्यः सहर्षश्चाणक्यः।)

**चाणक्यः** - भद्र! कथय कथय--

चाणक्यस्य आगमनम्

**केनोत्तुङ्गशिखाकलापकपिलो बद्धः पटान्ते शिखी ?**
**पाशैः केन सदागतेरगतिता सद्यः समासादिता ?।**
**केनानेकपदानवासितसटः सिंहोऽर्पितः पञ्जरे ?**
**भीमः केन चलैकनक्रमकरो दोर्भ्यां प्रतीर्णोऽर्णवः ? ॥६॥**

*अन्वयः - उत्तुङ्गशिखाकलापकपिलः शिखी पटान्ते केन बद्धः, पाशैः सदागतेः अगतिता सद्यः केन समासादिता ? अनेकपदानवासितसटः सिंहः पिञ्जरे केन अर्पितः, दोर्भ्यां चलैकनक्रमकरः भीमः च अर्णवः केन प्रतीर्णः।*

*भावार्थः - पटाञ्चलेन वह्निबन्धनमिव, रज्वा वायुनिरोधनमिव, मत्तहस्तिघातिनं सिंहं पञ्जरे स्थापनमिव, किञ्च बाहुभ्यां नक्रमकराकीर्णं भीममर्णवसंतरणमिव, नीतिनिष्णातराक्षसबन्धनं दुष्करम्। अत्र अतिशयोक्तिरूपकालङ्कारौ। शार्दूलविक्रीडितं वृत्तम्।*

*नन्दकुलेति। नन्दकुलं दैवेन घातितं न मया, अतः सर्वथा अदृष्टवशादयं मद्वशीभूत इत्यर्थः।*

**चण्डालः** - ननु नीतिनिपुणबुद्धिनाऽऽर्येणैव।

**चाणक्यः** - भद्र ! मा मैवम्। नन्दकुलद्वेषिणा दैवेनेति ब्रूहि।

**राक्षसः** - (विलोक्य स्वगतम्) अये ! अयं स दुरात्मा, अथवा अयं स महात्मा कौटिल्यः। यतः –

आकरः सर्वशास्त्राणां रत्नानामिव सागरः

*स्वयं चाणक्यस्य दुरात्मत्वमभिधाय, पुनस्तदपोह्य तं 'महात्मा' इत्युक्तवान् तदेव समर्थयति-*

**आकरः सर्वशास्त्राणां रत्नानामिव सागरः।**
**गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम् ॥७॥**

*अन्वयः - रत्नानां सागरः इव सर्वशास्त्राणाम् आकरः, यस्य गुणैः मत्सरिणः वयं न परितुष्यामः।*

*भावार्थः- महार्घाणां मणीनां उत्पत्तिभूमिसागर इव सर्वशास्त्राणाम् आकरः अयं चाणक्यः। यस्य गुणैः मत्सरिणो वयं सन्तोषं न लभामहे अतः अयं निश्चितरूपेण महात्मा। अत्र उपमारूपकालङ्कारौ। अनुष्टुप् वृत्तम्।*

**चाणक्यः** - (विलोक्य सहर्षम्) अये ! अयममात्यराक्षसः, येन महात्मना—

चाणक्यः राक्षसं प्रशंसति

*चाणक्यः स्वनीतिनिगृहीतमपि अलौकिकबुद्धिविभवसंपन्नं राक्षसं प्रशंसन्नाह—*

**गुरुभिः कल्पनाक्लेशैर्दीर्घजागरहेतुभिः ।**
**चिरमायासिता सेना वृषलस्य, मतिश्च मे ।।८।।**

*अन्वयः - दीर्घजागरहेतुभिः गुरुभिः कल्पनाक्लेशैः वृषलस्य सेना मे मतिः च चिरम् आयासिता।*

*भावार्थः - यन्मतिपौरुषभयात् अहर्निशं जागरूकतया मौर्यसैन्येन निरन्तरं सन्नहनादिरूपेणावस्थानात् क्लेशमनुभूतम्, रात्रौ ऊहापोहतया ऊनिद्रामलभमाना मन्मतिश्च खेदावहा जाता ।*

*अत्र सेनामत्योर्द्वयोरपि प्रकृतयोरायासितत्वरूपैकधर्मसम्बन्धात् तुल्ययोगितालङ्कारः। पथ्यावक्त्रं नाम वृत्तम्।*

(जवनिकामपनीयोपसृत्य च)

चाणक्यस्य पितृप्रदत्तनाम विष्णुगुप्तः इति

भो भो अमात्यराक्षस! विष्णुगुप्तोऽभिवादयते।

**राक्षसः** - (स्वगतम्) 'अमात्य' इति लज्जाकरमिदानीं विशेषणपदम् ।

(प्रकाशम्) भो भो विष्णुगुप्त ! न मां श्वपाकस्पर्शदूषितं स्प्रष्टुमर्हसि।

चण्डालानां कपटलेखं विषयम् अधिकृत्य चाणक्यः राक्षसं कथयति

**चाणक्यः** - अमात्यराक्षस ! नायं श्वपाकः । अयं खलु दृष्टपूर्व एव भवता सिद्धार्थकनामा राजपुरुषः, योऽयमसौ द्वितीयः, सोऽपि सुसिद्धार्थकनामा राजपुरुष एव । ताभ्यामेव सह सौहार्दमुत्पाद्य शकटदासोऽपि तपस्वी तं तादृशमजानन्नेव कपटलेखं मयैव लेखितः ।

**राक्षसः** - (आत्मगतम्) दिष्ट्या शकटदासं प्रत्यपनीतो विकल्पः ।

**चाणक्यः** - किं बहुना, सङ्क्षेपतः कथयामि –

चाणक्यः तस्य सर्वं कूटनीतिमधिकृत्य विशदीकरोति

*राक्षसवशीकरणार्थं स्वविस्तारितं नीतिजालं कथयितुं स्वसहायकानां गुप्तचराणां स्वरूपपरिचर्यं कुर्वाण आह चाणक्यः--*

**भृत्या भद्रभटादयः, स च तथा लेखः, स सिद्धार्थकः,**

**तच्चालङ्करणत्रयं, स भवतो मित्रं भवन्तः किल ।**

**जीर्णोद्यानगतः स चार्तपुरुषः, क्लेशः स च श्रेष्ठिनः,**

**सर्वं मे -** (इत्यर्द्धोक्ते लज्जां नाटयति)

**- वृषलस्य वीर ! भवता संयोगमिच्छोर्नयः ॥९॥**

*अन्वयः - भद्रभटादयः भृत्याः तथा च सः लेखः, सः सिद्धार्थकः, तत् च अलङ्करणत्रयं, सः भवतः किल मित्रं भदन्तः जीर्णोद्यानगतः स च पुरुषः अपि स च श्रेष्ठिनः क्लेशः सर्वं मे (इत्यर्द्धोक्ते लज्जां नाटयति) हे वीर ! भवता वृषलस्य संयोगम् इच्छोः नयः।*

*भावार्थः - भद्रभटादयो भृत्याः, तथाविधो कूटनीतिको लेखः, सच सिद्धार्थकः त्रयोऽलङ्काराः भवतः मित्रं भदन्तो जीवसिद्धिः उद्वन्धनार्थं उद्यानगतः स आर्त्तपुरुषः श्रेष्ठिवरस्य चन्दनदासस्य तथाविधः क्लेशः-- हे वीर! ममैव प्रयुक्ता नीतयः। पुनश्च स्वोत्कर्षवर्णनमनुचितमित्याह--हे वीर! भवता सह मैत्रीसंपादनार्थं चन्द्रगुप्तस्य नीतयः इति।*

*एतत् सर्वं भवत्प्राप्त्याशया चन्द्रगुप्तेनैव कृतं मयेति शेषः। शार्दूलविक्रीडितं वृत्तम् ।*

तदेष वृषलस्त्वां द्रष्टुमागच्छति । पश्यैनम् ।

**राक्षसः -** (स्वगतम्) का गतिः? (प्रकाशम्) एष पश्यामि ।

(ततः प्रविशति राजा, विभवतश्च परिवारः।)

**राजा -** (स्वगतम्) विनैव युद्धादार्येण पराजितं दुर्जयं रिपुकुलमिति लज्जित इवास्मि । मम हि—

*सायकानां रिपुवधाद्यनियोगावस्थां वर्णयन्नाह चन्द्रगुप्तः--*

**फलयोगमवाप्य सायकानामनियोगेन विलक्षतां गतानाम् ।**
**न शुचेव भवत्यधोमुखानां निजतूणीशयनव्रतं प्रतुष्टयै ॥१०॥**

*अन्वयः - सायकानां फलयोगम् अवाप्य, अनियोगेन विलक्षतां गतानां शुचा इव अधोमुखानां (सायकानाम्) निजतूणीशयनव्रतं प्रतुष्ट्यै न भवति।*

***भावार्थः-** यथा शल्ययोगमवाप्यापि प्रयोगं विना लक्ष्यशून्यानां, किञ्च कार्ये नियोगाभावेन सलज्जत्वं गतानाम् अतः शुचा अधोमुखानां बाणानां निजतूण्यां निश्चेष्टतया अवस्थानं मम तुष्ट्यै न भवति तथा फलयोगं सम्प्राप्य अपि कार्यावियोगेन लक्षशून्यतां गतानाम् अत एव शोकेन लज्जमानानां मम सहायकानां स्वगृहे तूष्णीमवस्थानं संतोषाय न भवति। अत्र काव्यलिङ्गमलङ्कारः। मालभारिणी वृत्तम्।*

**अथवा-**

*अथवा एवं लज्जितोऽपि चन्द्रगुप्तः स्वगतं सर्वं समादधान आह--*

**विगुणीकृतकार्मुकोऽपि जेतुं भुवि जेतव्यमसौ समर्थ एव ।**
**स्वपतोऽपि ममेव यस्य तन्त्रे गुरवो जाग्रति कार्यजागरूकाः ॥११॥**

*अन्वयः - स्वपतः अपि मम इव यस्य तन्त्रे कार्यजागरूकाः गुरवः जाग्रति विगुणीकृतकार्मुकः अपि असौ भुवि जेतव्यं समर्थः एव।*

*भावार्थः - निश्चेष्टस्यापि यस्य राज्ञः राष्ट्रे राष्ट्रचिन्तकाः अप्रमत्ता गुरुगणाः निरन्तरं यतमानास्तिष्ठन्ति स राजा धनुषि अनारोपितकार्मुकोऽपि भुवि सर्वजेतव्यं जेतुं समर्थो भवति--*

*पैतृकमिति--पितुः आगतः पैतृकः, नन्देन मुरायामुत्पादितत्वात् तस्य नन्दात्मजत्वेन तत्संबन्धात् पैतृकत्वम्। अमात्येषु मुख्यो राक्षस एव अत एव एनमभिवादयस्वेति फलितार्थः।*
*अत्र प्रथमार्द्धवाक्यं प्रति द्वितीयार्द्धवाक्यस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः। मालभारिणीयं वृत्तम् ।*

चाणक्यः राक्षसं नमस्कारं कर्तुं निर्देशति

(चाणक्यमुपसृत्य) आर्य! चन्द्रगुप्तः प्रणमति ।

**चाणक्यः** - वृषल ! सम्पन्नास्ते सर्वाशिषः, तदभिवादयस्व तत्रभवन्तममात्यराक्षसम्; पैतृकस्तवायममात्यमुख्यः ।

**राक्षसः** - (स्वगतम्) योजितोऽनेन सम्बन्धः।

**राजा** - (राक्षसमुपसृत्य) आर्य ! चन्द्रगुप्तोऽहमभिवादये।

**राक्षसः** - (विलोक्य स्वगतम्) अये ! अयं चन्द्रगुप्तः । य एषः—

*शैशवे दृष्टपूर्वं चन्द्रगुप्तं प्राप्तयौवनं कार्यक्षमं चावलोक्य राक्षसस्तं प्रशंसन्नाह--*

**बाल एव हि लोकेऽस्मिन् सम्भावितमहोदयः ।**
**क्रमेणारूढवान् राज्यं यूथैश्वर्यमिव द्विपः ॥१२॥**

*अन्वयः - बालः एव हि अस्मिन् लोके सम्भावितमहोदयः द्विपः इव यूथैश्वर्यं क्रमेण राज्यम् आरूढवान्।*

*भावार्थः - अयं स एव चन्द्रगुप्तः यः शैशवे सर्वजनैः राज्यलक्षणलक्षिततया महोन्नतः संभावितः। यः क्रमेण प्राप्तयौवनः शैशवमारभ्य संभावितमहोदयः हस्तिशावक इव क्रमेण वर्धमानः प्राप्तयूथैश्वर्यम् इव अधिष्ठितसिंहासनोऽभूत्।*
*अत्र उपमा-लङ्कारः । अनुष्टुप् वृत्तम् ।*

(प्रकाशम्) राजन्! विजयस्व ।

राजा - आर्य !

*त्वद्विजयेन मे जगद्विजय इति भङ्ग्या निवेदयति चन्द्रगुप्तः।*

**जगतः किं न विजितं मयेति प्रविचिन्त्यताम् ।**
**गुरौ षाड्गुण्यचिन्तायामार्ये चार्ये च जाग्रति ॥१३॥**

*अन्वयः – आर्ये गुरौ च आर्ये षाड्गुण्यचिन्तायां जाग्रति मया जगतः किं न विजितम् इति प्रविचिन्त्यताम्।*

*भावार्थः - भवति चाणक्ये गुरो पैतृकामात्यत्वेनातीव मान्ये भवति च षाड्गुण्यरूपस्य संधिविग्रहादेः कर्तव्याकर्तव्यविवेचनायां यतमाने मया जगतः सर्वमेव जितम् अधुना न किमप्यवशिष्यत्ते।*

*अत्र आर्ये आर्ये च इति प्रस्तुतयोः द्वयोरेव समधर्मकथनात् तुल्ययोगिता। एकस्मिन् एव आर्ये कार्यसाधके सत्यपि अपरस्यापि तत्करत्वात् समुच्चयः। उभयोः षाड्गुण्यचिन्तैव मम त्रिभुवनविजयहेतुः इति पदार्थगतं काव्यलिङ्गम्। इत्येतेषां संसृष्टिः। अनुष्टुप् वृत्तम् ।*

कौटिल्यशिष्यः चन्द्रगुप्तः आसीत्

राक्षसः - (स्वगतम्) स्पृशति मां कौटिल्यशिष्यो भृत्यभावेन, अथवा विनय एवैषः। चन्द्रगुप्तस्य मत्सरस्तु मे विपरीतं कलयति । सर्वथा स्थाने यशस्वी चाणक्यः । कुतः ?

*सत्स्वामिसेवकस्याकुशलस्यापि सिद्धिम् एतद् वैपरीत्ये असिद्धिं भङ्ग्या वर्णयति राक्षसः--*

द्रव्यं जिगीषुमधिगम्य जडात्मनोऽपि
नेतुर्यशस्विनि पदे नियता प्रतिष्ठा ।
अद्रव्यमेत्य तु विविक्तनयोऽपि मन्त्री
शीर्णाश्रयः पतति कूलजवृक्षवृत्त्या ॥१४॥

*अन्वयः - द्रव्यं जिगीषुम् अधिगम्य जडात्मनः अपि नेतुः यशस्विनि पदे प्रतिष्ठा नियता, अद्रव्यम् एत्य भुवि शुद्धनयः अपि मन्त्री शीर्णाश्रयः कूलजवृक्षवृत्या पतति।*

*भावार्थः - सत्पात्रं विजिगीषुं नृपमाश्रित्य अकुशलस्यापि मन्त्रिणः लोके प्रतिष्ठा निश्चिता। किं पुनः यः चाणक्यसदृशः नीतिप्रयोगकुशलः? किन्तु नीतिप्रयोगकुशलोऽपि मन्त्री हीनपक्षाश्रयमभिप्रेत्य आधारस्य जीर्णत्वात् नदीकूलजवृक्षवत् पराजयो पतनञ्च निश्चितं प्राप्नोति यथा हीनं मलयकेतुमाश्रितवतो मम पतनं जातम्।*

*सत्पात्रस्य चन्द्रगुप्तस्याश्रयेण चाणक्यस्य कार्यसिद्धिः। मलयकेतोः असत्पात्रत्वेन तदाश्रयात् मम कार्यसिद्धिःपतनं चेति भावः। अत्र अप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः। वसन्ततिलका वृत्तम्।*

**चाणक्यः** - अमात्यराक्षस ! अपीष्यते चन्दनदासस्य जीवितम् ?

**राक्षसः** - भो विष्णुगुप्त ! कुतः सन्देहः ?

स्वमित्रस्य प्राणम् इच्छति तर्हि आमात्यपदं गृह्यताम्

**चाणक्यः** - अमात्यराक्षस ! अगृहीतशस्त्रेण भवताऽनुगृह्य ते वृषल इत्यतः सन्देहः । यद्यदि सत्यमेव चन्दनदासस्य जीवितमिष्यते, ततो गृह्यतामिदं शस्त्रम् ।

**राक्षसः** - भो विष्णुगुप्त ! मा मैवम् । अयोग्या वयमेतस्य ग्रहणे, विशेषतस्त्वया गृहीतस्य शस्त्रस्य ।

राक्षसः संकोचयति

**चाणक्यः**- अमात्यराक्षस ! योग्योऽहमयोग्यो भवान् इति कथमेतत् ?

पश्य –

*इदानीं चाणक्यः स्वसैन्याद्यायासमुखेन राक्षसस्य नीतीचातुर्यं तद् योग्यतां च समर्थयमान आह--*

चाणक्यः स्वसैन्याद्यायासमुखेन राक्षसस्य तद् योग्यतां च स्तौति।

**अश्वैः सार्द्धमजस्रदत्तकविकाक्षामैरशून्यासनैः**
**स्नानाहारविहारपानशयनस्वेच्छासुखैर्वर्जितान् ।**
**माहात्म्यादतिपौरुषस्य भवतो दृप्तारिदर्पच्छिदः**
**पश्यैतान् परिकल्पनाव्यतिकरप्रोच्छूनवंशान् गजान् ॥१५॥**

*अन्वयः- दृप्तारिदर्पच्छिदः भवतः अतिपौरुषस्य माहात्म्यात् अशून्यासनैः, अजस्रदत्तकविकाक्षामैः अश्वैः सार्धं स्नानाहारविहारपानशयनस्वेच्छासुखैः वर्जितान् परिकल्पनाव्यतिकरप्रोच्छूनवंशान् एतान् गजान् पश्य।*

*भावार्थः - भवतः प्रतापमाहात्म्यादश्वाः सदैव युद्धसज्जाः सन्ति तथा अश्वारोहिणः स्वेच्छया आहारविहारादिसुखैः वञ्चिता सन्ति। गजानां पृष्ठानि सदैव युद्धसामग्रीभरितानि सन्ति अतः शोथयुक्तानि जातानि। एतान् भवान् पश्यतु। अत्र तुल्ययोगिताऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।*

अथवा किमनेन ? न खलु भवतः शस्त्रग्रहणमन्तरेण चन्दनदासस्य जीवितमस्ति।

राक्षसः - (स्वगतम्)

*मित्रप्राणरक्षार्थं शस्त्रग्रहणार्थमनुरुद्धः मलयकेतोश्चानिष्टमाशङ्कमानः राक्षसः स्वकर्तव्यं चिन्तयन्नाह--*

कार्याणां गतयो विधेरपि न यान्त्यालोचना-गोचरम्

**नन्दस्नेहकणाः स्पृशन्ति हृदयं, भृत्योऽस्मि तद्विद्विषां**

**ये सिक्ताः स्वयमेव पाणिपयसा छेद्यास्त एव द्रुमाः ? ।**

**शस्त्रं मित्रशरीररक्षणकृते व्यापारणीयं मया**
**कार्याणां गतयो विधेरपि न यान्त्यालोचनागोचरम् ॥१६॥**

*अन्वयः - नन्दस्नेहगुणाः हृदयं स्पृशन्ति, (अहं) तद्विद्विषां भृत्यः अस्मि, ये द्रुमाः स्वयम् एव पाणिपयसा सिक्ताः ते स्वयम् एव छेद्याः? मित्रशरीररक्षणकृते मया शस्त्रं व्यापारणीयं कार्याणां गतयः चिरात् विधेः अपि आलोचनागोचरं न यान्ति।*

*भावार्थः - प्रमृतेऽपि नन्दे तत्स्नेहकणाः मम हृदयं संबध्नन्ति। एतावतापि हा दैव तदरेः दासतां भूयासम्। किं करोमि ये स्वपाणिजलेन सिक्ताः द्रुमाः सन्ति ! ते एव तैः प्राणिभिः संछेद्याः, न स्युः एतदर्थं, मित्रस्य*

*चन्दनदासस्य जीवनरक्षणार्थं च मम शस्त्रग्रहणमावश्यकमेव प्रतिभाति। कार्यगतयः खलु विधिनाऽपि विवेक्तुमशक्याः।*

*अत्र विषमकाव्यलिङ्गार्थान्तरन्यासालङ्काराणां संसृष्टिः। शार्दूलविक्रीडितं वृत्तम् ।*

(प्रकाशम्) भो विष्णुगुप्त! उपानय खड्गम् । नमः सर्वकार्यप्रतिपत्तिहेतवे सुहृत्स्नेहाय । का गतिः? एष सज्जोऽस्मि ।

**चाणक्यः** - (सहर्ष शस्त्रमर्पयित्वा) वृषल ! वृषल !! अमात्यराक्षसेनेदानीं गृहीतशस्त्रेणानुगृहीतः दिष्ट्या वर्द्धते भवान् ।

**राजा** - आर्यप्रसाद एष चन्द्रगुप्तेनानुभूयते ।

**पुरुषः** - (प्रविश्य) जयतु जयत्वार्यः। आर्य! एष खलु भद्रभटभागुरायणप्रमुखैः संयमितकरचरणो मलयकेतुः प्रतीहारभूमावुपस्थापितः तदिदं श्रुत्वाऽत्रार्यः प्रमाणमिति ।

**चाणक्यः** - आं श्रुतम् । भद्र ! निवेद्यताममात्यराक्षसाय, अयमिदानीं राजकार्यं करिष्यति ।

राक्षसः चन्द्रगुप्तं याचते यत् मलयकेतोः प्राणान् संरक्ष

**राक्षसः**- (स्वगतम्) कथं दासीकृत्येदानीं विज्ञापनाय मां मुखरीकरोति कौटिल्यः ! का गतिः? (प्रकाशम्) राजन् चन्द्रगुप्त! विदितमेव यथा वयं मलयकेतौ किञ्चित् कालान्तरमुषिताः, तत् परिरक्ष्यन्तामस्य प्राणाः।

(राजा चाणक्यमुखमवलोकयति)

**चाणक्यः** - वृषल! प्रतिमानयितव्योऽयममात्यराक्षसस्य प्रथमः प्रणयः। (पुरुषमवलोक्य) भद्र! अस्मद्वचनादुच्यन्तां भद्रभटप्रभृतयः अमात्यराक्षसविज्ञापितो देवश्चन्द्रगुप्तः प्रयच्छति मलयकेतवे पित्र्यमेव विषयम्; अतो गच्छन्तु भवन्तः सहानेन, प्रतिष्ठिते चास्मिन् पुनरागन्तव्यम् ।

**पुरुषः** - यदार्य आज्ञापयतीति ।

**चाणक्यः** - तिष्ठ तावत्, भद्र ! भद्र !! एवमपरमुच्यतां विजयपालो दुर्गपालश्च-अमात्यराक्षसस्य गृहीतशस्त्रस्य प्रीत्या देवश्चन्द्रगुप्तः

चन्दनदासः पृथिव्यां सर्वनगरनायकपदे नियुक्तः भवति

समाज्ञापयति 'एष तावच्छ्रेष्ठी चन्दनदासः पृथिव्यां सर्वेषु नगरेषु श्रेष्ठिपदमारोप्यतामि'ति ।

**पुरुषः** - यदार्य आज्ञापयति ।

(इति निष्क्रान्तः)

**चाणक्यः** - भो राजन् चन्द्रगुप्त ! किं ते भूयः प्रियमुपकरोमि ?

**राजा** - किमतःपरं प्रियमस्ति ?

सर्वोऽपि मनोरथः परिपूर्णः नाधुने किमपि मे कर्तव्यमवशिष्यते

*भवत्प्रसादान्मे सर्वोऽपि मनोरथः परिपूर्णः नाधुना किमपि मे कर्तव्यमवशिष्यते इत्यत आह--*

**राक्षसेन समं मैत्री राज्ये चारोपिता वयम् ।**
**नन्दाश्चोन्मूलिताः सर्वे किं कर्त्तव्यमतः परम् ? ॥१७॥**

*अन्वयः - राक्षसेन समं मैत्री वयं च राज्ये आरोपिताः, सर्वे नन्दाः च उन्मूलिताः, अतः परं किं कर्तव्यम् (अस्तीति)।*

**चाणक्यः** - विजये ! उच्यतां दुर्गपालो विजयपालश्च, अमात्यराक्षसपरिग्रहेण प्रीतो देवश्चन्द्रगुप्तः समाज्ञापयति--विना हस्त्यश्वं क्रियतां सर्वबन्धमोक्ष इति, अथवा अमात्यराक्षसे नेतरि किं हस्त्यश्वेन प्रयोजनम् ? तदिदानीम्—

*राक्षसे मन्त्रिणि संवृत्ते अन्यत्सर्वं निष्प्रयोजनम्। इदानीं सर्वबन्धनमोचनमिषेण प्रतिज्ञातार्थे सिद्धे मे शिखाबन्धनकालः उपस्थितः इत्याह--*

सर्वबन्धनमोचनमिषेण प्रतिज्ञातार्थे सिद्धे मे शिखा बन्धनकालः उपस्थितः

**सह वाहनहस्तिभ्यां मुच्यतां सर्वबन्धनम् ।**
**मया पूर्णप्रतिज्ञेन केवलं बध्यते शिखा ॥१८॥**

*अन्वयः- वाहनहस्तिभ्यां सह सर्वबन्धनं मुच्यताम्, पूर्णप्रतिज्ञेन मया केवलं शिखा बध्यते।*

*भावार्थः - अश्वगजाभ्यां सहितानां समेषां निगडत्यागः क्रियताम्। केवलं नन्दान्वयोन्मूलनेन तीर्णप्रतिज्ञार्णवकारणेन मया शिखा बध्यते। विषमालङ्कारः। अनुष्टुप् वृत्तम्।*

**प्रतीहारी** - यदार्य आज्ञापयति । (इति निष्क्रान्ता) ।

**चाणक्यः** - अमात्यराक्षस ! तदुच्यतां, किं ते भूयः प्रियमुपकरोमि?

**राक्षसः** - किमतःपरमपि प्रियमस्ति ? यदि न परितोषस्तदिदमस्तु ।

(भरतवाक्यम्)

*चाणक्यकर्त्तव्यावशेषकथनमिषेण चन्द्रगुप्तस्य शुभमाशंसमाना आह राक्षसः--*

**वाराहीमात्मयोनेस्तनुमतनुबलामास्थितस्यानुरूपां**
**यस्य प्राग्दन्तकोटिं प्रलयपरिगता शिश्रिये भूतधात्री ।**
**म्लेच्छैरुद्वीज्यमाना भुजयुगमधुना पीवरं राजमूर्तेः**
**स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः ॥१९॥**

*अन्वयः - प्राक् प्रलयपरिगता भूतधात्री अतनुबलाम् अनुरूपां वाराहीं तनुम् आस्थितस्य यस्य आत्मयोनेः दन्तकोटिं शिश्रिये, अधुना म्लेच्छैः उद्वीज्यमाना राजमूर्तेः भुजयुगं संश्रिता, सः श्रीमद्बन्धुभृत्यः पार्थिवः चन्द्रगुप्त चिरं महीम् अवतु।*

*भावार्थः - प्रलयान्तकाले यथा विष्णुना वराहरूपमास्थायार्णवनिमग्ना पृथिवी स्वदंष्ट्राग्रेणोद्धृत्य परित्राता, तथाधुनाऽपि म्लेच्छैः संपीड्यमानेयं वसुधा विष्णुरूपस्य चन्द्रगुप्तस्य स्थूलभुजयुगमाश्रित्य संस्थिता, अत एव श्रीमद्बन्धुभृत्यः अयं पार्थिवः चन्द्रगुप्तः चिरं प्रशासन् पृथ्वीं पातु।*

*पुरा श्रीविष्णुः किल प्रलयपयोधिं निमग्नं भुवं वराहमूर्त्या स्वदंष्ट्राग्रेण उज्जहार इति पौराणिकी कथा। अत्र श्रीविष्णोश्चन्द्रगुप्तस्य चाभेदकथनाद्रूपकालङ्कारः। स्रग्धरावृत्तम्। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्तीति भाष्यात् 'धन्या केयं स्थिता ते शिरसि' इत्यादौ 'आकाशं काशपुष्पच्छविम्' इत्यादिना मध्ये; अनेन श्लोकेन चान्ते मङ्गलमाचरितवान् कविर्विशाखदत्तः।*

(इति निष्क्रान्ताः सर्वे)

इति 'मुद्राराक्षसे' सप्तमोऽङ्कः ।।७।।

इति विशाखदत्तविरचितं मुद्राराक्षसं नाटकं समाप्तम् ।

## मुद्राराक्षसम्

मुद्राराक्षसं विशाखदत्तेन लिखितं संस्कृतनाटकम्। चाणक्यः धननन्दस्य निग्रहं कर्तुं चन्द्रगुप्तमौर्यम् उपकरोति। चन्द्रगुप्तः राज्ञा पर्वतकेन सह नन्दराज्यं जयति। ततः युक्त्या विषदग्धः पर्वतकः म्रियते। तस्य पुत्रः मलयकेतुः नन्दमन्त्री राक्षसः च मगधं जेतुं योजनां कुरुतः। परं चाणक्यः छलेन मलयकेतुं जयति।

संस्कृतस्य निखिलेभ्यः नाटककारेभ्यः भिन्नोऽयं विशाखदत्त नामा नाट्यकारः यः कूटनीतिं, राजनीतिञ्चाश्रित्य नाटकं निर्मितवान्। कवेः राजवंशसम्भवात् राजनीतिषु पक्षपातो दृश्यते। विशाखदात्तस्य पितामहः श्रीवटेश्वरदत्तः वत्सराजाभिधस्य देशस्य सामन्तराजः आसीत्। पिता चास्य भास्करदत्तः 'महाराज' इत्युपाधिना अलङ्कृत आसीत्। विशाखदत्तः कौटिल्यार्थशास्त्रस्य शुक्रनीतिशास्त्रस्य च प्रकाण्डविद्वान् आसीत्। ज्योतिश्शास्त्रदर्शनन्यायशास्त्रेषु चास्य नैपुण्यं दृश्यते। वैदिकधर्मावलम्बी विशाखदत्तः बौध्दधर्ममपि अत्यादरेण समवलोकयति स्म। अस्यैतानि नाटकानि प्राप्यन्ते - (१) मुद्राराक्षसम्, (२) देवीचन्द्रगुप्तम्, (३) अभिसारिकावञ्चितम् चेति

विशाखदत्तस्य स्थितिकालविषये विविधानि मतानि सन्ति। डा. जायसवालमहोदयः अस्य स्थितिकालं ४०० ईस्वीयशताब्द्याः समीपे मन्यते। केचित् समालोचकाः षष्ठयां शताब्द्याम् अस्य समयं मन्यन्ते। ४९० शताब्द्यां श्रीवराहमिहिरः बृहत्संहितायामस्योल्लेखं करोति, अतः वराहमिहिरात् पूर्वं पञ्चमशताब्द्यां विशाखदत्तस्य समयः स्वीकरणीयम् इति न्यायसङ्गतं प्रतिभाति। अस्य कृतिषु मुद्राराक्षसं महनीयं नाटकं विद्यते। पात्राणां चरित्रचित्रणबलेन कथितुं शक्यते यत् सफलमिदं नाटकं यत्र विशाखदत्तस्य भाषाशैली, कवित्वशक्तिः एतद् द्वयमपि कवेः वैशिष्ट्यं तनोति। वस्तुतः अस्मिन् नाटके न हि कालिदाससदृशं कल्पना - भाव-चाञ्चल्यं, न वा भवभूतिरिव हृदय विदारककरुणधारा कुत्रापि प्रवहति, न च भट्टनायकसदृशं सैनिकानां प्राणान् प्रणयितुः निमन्त्रणं विलोक्यते। विशाखदत्तस्य नाटकेऽपि युध्दं भवति, परमत्र द्वयोः राजनीतिज्ञयोः बुध्दिवैभवास्त्रेण समरं भवति नास्त्रेण, मुद्राराक्षसे चाणक्यराक्षसौ निजकूटनीत्या विलक्षणं राजनीतिकयुध्दं सन्दर्श्य दर्शकान् मोहयतः। अत्र तु विनैवास्त्रं शत्रुजयो भवति। अतः मुद्राराक्षसं संस्कृतनाटकेषु निःसन्देहम् द्वितीयनाटकमिति निश्चप्रचम्।

## मुद्राराक्षसस्य विशिष्टता

असत्यामपि शृङ्गारकथायामसत्यपि च प्रणयव्यापारकाले नाटकमिदमलौकिकेन सरसत्वेनामूलमाचूडं चाप्यायितं वर्तते। ओजोगुण एवात्र तथा समृध्दो यथा सामाजिकमनोरञ्जनाय वस्त्वन्तरं नापेक्षते। स्त्रीपात्रस्याभावे विदूषकस्य चाभावे सत्यपि यदिदं नाटकमेतावत्सरसं जातं तदस्य रचयितुः काव्यकलाप्रवीणतायाः परमं प्रमाणम्।

यद्यपि वेणीसंहारनामकं नाटकमपि भूयसा प्रोक्तगुणशालि, परं तत्र युध्दस्य वातावरणं दर्शकानां मनसि किमपि विचित्रं भीतिमिश्रं वैरस्यं सृजति। अस्मिंस्तु 'विनैव युध्दादार्येण जितं दुर्जयं परबलमिति परा तृप्तिः। यथाऽऽधुनिकेष्वुपन्यासेषु गहनः कथातन्तुर्वाचकानाकर्षति, मध्ये विरन्तुमवसरं न ददात्ति, तथैवात्र पाठकानां जिज्ञासा कदापि मध्ये न विश्रान्तिमासादयति। कुतूहलवर्धकमाख्यानं नाट्यस्य जीवितं तदत्र पर्याप्तभावेनावस्थितमिति चमत्कारि नाटकमिदम्। सुघटितकथावस्तु-योजनायां व्यक्तित्वपूर्णपात्रचरित्रचित्रणे, ओजस्विवातावरणोपन्यासे च नाटकमिदमद्वितीयमिति सर्वसम्मतम् ।

## मुद्राराक्षसे नायकः

अस्य नाटकस्य नायक चन्द्रगुप्तश्चाणक्यो वेति विचारविषयः। केचित् प्रधानफलाश्रयतया चन्द्रगुप्तं नायकं मन्येन्तेऽपरे कथातन्तुसञ्चालन-प्रधानतया चाणक्यमेव नायकं स्वीकुर्वन्ति। वस्तुतत्त्वे चिन्त्यमाने चाणक्य एव नायकः सिद्ध्यति। मुद्रया निगृहीतो राक्षसो यत्र तन्मुद्राराक्षसमिति व्युत्पत्तौ मुद्राप्रवर्त्तकस्य नायकत्वं सिध्दिप्रायम्। सत्यव्रतसिंह-द्विजेन्द्रनाथावपि मतमिदं समर्थयतः। विशाखदत्तस्य देवीचन्द्रगुप्तं नाम नाटकान्तरम् अस्ति।

## नाटकस्य स्वरूपम्

नाटकमिदम् आद्यन्तं यावत् ओजस्वितायाः पौरुषस्य चोपरि आधारीभूतमस्ति। यद्यपि महाकविभासस्य 'प्रतिज्ञायौगन्धरायणम्' कूटनीत्याधारीभूतं नाटकं विद्यते, परमस्मिन् मुद्राराक्षसे या ओजस्विता दरीदृश्यते। न सा प्रतिज्ञायौगन्धरायणे। संस्कृतसाहित्ये 'वेणीसंहारम्' निःसन्देहं वीररसस्य सफलं नाटकमस्ति, परन्तु अनेनापि मुद्राराक्षसस्य

तुलनां कर्तुं न शक्यते। यतो हि वेणीसंहारनाटके युध्दभीषणता, नाटकस्य वातावरणं नितरां भयावहं करोति स्थाने - स्थाने सैनिकानाम् अन्योऽन्यसंघट्टने नाटकस्य वातावरणं सर्वदैव खटखटायते। अतः ऐतिहासिक- राजनैतिक- कथाभूतं वीररसपूर्णमपि 'वेणीसंहारनाटकं' मुद्राराक्षसस्य न तुलामुपयाति। मुद्राराक्षसेऽपि युध्दं तु भवति, परमत्र सैनिकानां युध्दं न भवति द्वयो राजनीतिज्ञयोः राजनीति- समराङ्गणे कूटबुद्ध्यस्त्रेण समरं भवति नास्त्रेण" न, धनुषापि वा। चन्द्रगुप्तस्य कथनमिदम्- *'विनैव युध्दादार्येण जितं दुर्जयं परबलमिति* युक्तियुक्तं प्रतिभाति। अतः मुद्राराक्षसं नाटकसाहित्येऽद्वितीया कृतिरिति कथने नातिशयोक्तिः। मुद्राराक्षसे विशाखदत्तस्य शैली पुरुषार्थपूर्णास्ति। पात्रानुरुपं भावनिरुपणं तथा भाषाप्रयोगश्च दृश्यते। तृतीयाङ्के शरदर्तोः वर्णनं नितान्तं प्रभावपूर्णं विद्यते। विशाखदत्तः नाटकं वीररसपूर्णं तथौजपूर्णं च कर्तुं यथाशक्ति प्रयत्नशीलः दृश्यते सफलश्चाभूत्। पौराणां चरित्रचित्रणेऽपि कविप्रतिभा सर्वातिशायिनी। भाषाभावयोः शैलीपात्रचरित्रचित्रणयोः कवित्वशक्तेश्च सम्यक्तया कृतायां समालोचनायां मुद्राराक्षसः विशाखदत्तस्य अद्वितीयम् ऐतिहासिकं नाटकमस्ति।

## Summarised Overview

सप्तमे अङ्के चाणक्यस्य आदेशेन सिद्धार्थः समसिद्धार्थकश्च चण्डालवेषेण चन्दनदासस्य समक्षं वधार्थं गच्छतः। चन्दनदासस्य पत्नी कुटुम्बिनी पुत्रश्च विलपतः। चन्दनदासः तौ सान्त्वयति। चण्डालः गत्वा चाणक्यं राक्षसस्य आगमनं सूचयति।

एतस्मिन्नेव क्षणमागत्य चाणक्यं याचते तस्य मध्यस्थतां कर्तुम्। चाणक्यः राक्षसं प्रशंसति। राक्षसोऽपि चाणक्यस्य पुरतः आगच्छति। चाणक्यः(विष्णुगुप्तः) 'आमात्य' इति राक्षसं अभिवादयते। किन्तु राक्षसः 'आमात्य' इति लज्जाकरम् इदानीं विशेषणपदम् इति कथयति। चण्डालानां कपटलेखं विषयम् अधिकृत्य चाणक्यः राक्षसं कथयति, एषः चण्डालः नास्ति' इति। अयं खलु दृष्टपूर्व एव भवता सिद्धार्थकनामा राजपुरुषः, योऽयमसौ द्वितीयः, सोऽपि सुसिद्धार्थकनामा राजपुरुष एव। ताभ्याम् एव सह सौहार्दम् उत्पाद्य शकटदासः अपि तपस्वी तं तादृशं जानन् एव कपटलेखं मयैव लेखितः। चाणक्यः राक्षसं वदति यत् मया त्वां चन्द्रगुप्तस्य मन्त्रीं कर्तुं मया एषा लीला निर्मिता। चाणक्यः सङ्क्षिप्तरुपेण कथयति, भद्रभटप्रभृतयः भृत्याः मलयकेतोः आश्रिताः तथा च सः लेखः, सः सिद्धार्थकः शकटदासस्य मित्रत्वेन त्वां

सेवितवान्, तथाविधं पर्वतेश्वरधृतपूर्वम् आभूषणत्रयम्, सः भवतः खलु मित्रं भदन्तः जीर्णोपवनगतः आत्महत्यां कर्तुं सज्जः स च पुरुषः, श्रेष्ठिनः चन्दनदासस्य क्लेशः सर्वं हे वीर ! भवता वृषलस्य (चन्द्रगुप्तस्य) संयोगम् इच्छोः मे नयः।

एतस्मिन्नन्तरे चन्द्रगुप्तोऽपि तत्र आगत्य चाणक्यम् अभिवादनं करोति, परन्तु चाणक्यः तं राक्षसं नमस्कारं कर्तुं निर्दिशति। चन्द्रगुप्तः नमस्कारं करोति, राक्षसः आशीर्वादं ददाति। राक्षसः चन्द्रगुप्तं प्रशंस्यते। चन्द्रगुप्तः अमात्यं राक्षसं, चाणक्यं च स्वीकृतवान्। चाणक्यः राक्षसं वदति यत् यदि त्वं स्वमित्रस्य चन्दनदासस्य प्राणम् इच्छसि तर्हि चन्द्रगुप्तस्य मुख्यामात्यस्य शस्त्रं ग्रहणं क्रियताम्। मित्रप्राणरक्षार्थं शस्त्रग्रहणार्थं अनुरुद्धः मलयकेतोः चानिष्टमाशङ्कमानाः राक्षसः स्वकर्तव्यं चिन्तयति। राक्षसः संकोचयति, चाणक्यस्तु तं स्तौति। चाणक्यः राक्षसस्य तद् योग्यतां च सूचितवान्। राक्षसः चन्द्रगुप्तस्य अमात्यपदं स्वीकरोति। सः मलयकेतुं मुक्तिं कर्तुम् अपि आग्रहं प्रकटयति। चन्द्रगुप्तः तं मुक्त्वा तस्य पैतृकराज्यं प्रतिददाति, चन्दनदासः पृथिव्यां सर्वनगरनायकपदे नियुक्तवान्। सर्वे बन्दिनः मुक्ताः भवन्ति। यदा चाणक्यः व्रतं पूर्णं करोति तदा केवलं नन्दान्वयोन्मूलनेन तीर्णप्रतिज्ञार्णवकारणेन स्व-शिखां बबन्ध। भरतवाक्येन सह सुखेन नाटकस्य समाप्तिः।

## Assignments

**लघुटिप्पणिं लिखत।**

1. 'अद्रव्यमेत्य तु विविक्तनयोऽपि मन्त्री
   शीर्णाश्रयः पतति कूलजवृक्षवृत्त्या'।
2. सर्वथा स्थाने यशस्वी चाणक्यः । कुतः ?
3. अगृहीतशस्त्रेण भवताऽनुगृह्य ते वृषल इत्यतः सन्देहः । विशदयत
4. 'कार्याणां गतयो विधेरपि न यान्त्याज्ञाकरत्वं चिरात्' ।
5. राक्षसं चन्द्रगुप्तस्य अमात्यं कर्तुं चाणक्यस्य प्रयत्नान् विशदयत ।

**निबन्धात्मकप्रश्नाः।**

1. संस्कृतनाटकेषु मुद्राराक्षसस्य वैशिष्ट्यं समर्थयत।
2. मुद्राराक्षसानुसारेण विशाखदत्तस्य राजनीतिनैपुण्यं निरूपयत।
3. मुद्राराक्षसम् इति नाम्नः औचित्यं स्पष्टयत।
4. अमात्यराक्षसस्य स्वभावचित्रणम्।
5. चाणक्यस्य स्वभावचित्रणम्।
6. मलयकेतोः स्वभावचित्रणम्।
7. सप्तमाङ्कस्य कथासारः।

# Suggested Readings


1. Indian Kavya Literature, A.K. Warder, Motilal Banarsidass, New Delhi, 1992.
2. Mudraraksam by Visakhadatta, (with English translation equipped with an exhaustive Introduction and Appendices), Dr. Naveen Kumar Jha, Dr. Anjana, JP Publishing house, 27/28 Shakti Nagar Delhi, 2023
3. Mudraraksasam, Kannampuzha S Krishnavariar, C.M.M Publishers, Puthenchanthai, Trivandrum


# References


1. विशाखदत्तप्रणीतं मुद्राराक्षसम्, डां गङ्गासागररायः, (गङ्गा-संस्कृत-हिन्दी-व्याख्या-भूमिका-परिशिष्टादिसमन्वितम्), चौखम्बा संस्कृत संस्थान, वारणासि।
2. महाकवि-विशाखदत्तप्रणीतं मुद्राराक्षसम्, पं.परमेश्वरदीन पाण्डेय, श्री अवनिकुमार पाण्डेय (सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्) चौखम्बा सुरभारति प्रकाशन्, वाराणसी, 2014
3. Mudrārākṣasa of Viśākhadatta with English Commentary of M.R. Kale, Motilal Banarsidass, New Delhi, 2006.
4. Mudrārākṣasanāṭakam, Subodhini Sanskrit and Hindi commentaries, Acharya Madhav Janardhan Ghatate, Bharatiya Vidya Prakasan, Delhi.
5. Viśākhadatta's Mudārākṣasa (The signet ring) translated by R.S. Panditt, Global Academic Publishers and Distributors.


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# मत्तविलासप्रहसनम्

# BLOCK - 4

SGOU

UNIT 1

# प्रहसनपरिचयः

## Learning Outcomes

- रूपकेषु प्रहनसस्य महत्वं जानाति।
- प्रहसनविभागस्य सविशेषतां गृह्णाति।
- प्रहसनस्य उदाहरणानि जानाति।

## Background

नायिकानायकयोः प्रकृतिः, मुख्यो रसः, अङ्कानां संख्या चेत्यादिकमाधारीकृत्य रूपकाणां मुख्यतया दशधा विभागः कृतः। तदुक्तं दशरूपके -

"नाटकं सप्रकरणं भाणः प्रहसनं डिमः।

व्यायोगसमवकारौ वीथ्यङ्केहामृगाः॥" (दशरूपकं1- 8)इति।

दशरूपकेषु अन्यतमं प्रहसनम्। हास्यरसप्रधानम् एतदिति तस्य नाम्ना एव स्पष्टम्। एकाङ्के अस्मिन् कविकल्पितं कथानकम्। 'साहित्यदर्पणं' नामके ग्रन्थे तु प्रहसनस्य त्रयो भेदाः कीर्तिताः - शुद्धः, सङ्कीर्णः, विकृतं च। विकृतं तु संकीर्णभेदे एव गतार्थं भवतीति पृथक् नोक्तम्। विकृतभेदे षण्डकञ्चुकीतापसादीनां वेषमाकलय्य नटादयः विकृतमभिनयं कुर्वन्तीति विकृतरूपप्रयुक्ताभिनयात्मकत्वाद् विकृतं नाम प्रहसनमिदमुच्यते।

## Keywords

कविकल्पितम्, भाणवत्, आरभटी, शुद्धवैकृतसङ्करैः, चेटचेटीव्यवहारयुक्तम्, धूर्तसमुदायैर्व्याप्तम्।

# Discussion

## प्रहसनम्

दशरूपकेषु अन्यतमं प्रहसनम्। हास्यरसप्रधानम् एतदिति तस्य नाम्ना एव स्पष्टम्। एकाङ्के अस्मिन् कविकल्पितं कथानकम्।

प्रहसनं प्रतिपादयता धनञ्जयेन निगदितं यत् भाणवत् प्रहसनमपि धूर्तचरित्रात्मकम्, आकाशभाषितेनोक्तिप्रयुक्तियुक्तम्, भारवीवृत्तिसहितं भवति। तद्वद् प्रहसनं त्रेधा।

प्रहसन्ति सहृदया अनेनेति प्रहसनम्। अस्य लक्षणं साहित्यदर्पणे तावदिदं –

**भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम् ।**
**भवेत्प्रहसनं वृत्तं निन्द्यानां कविकल्पितम् ।।(६.२६४)**

एकाङ्कः, सन्धिद्वयं, हास्यरसः

अत्र भाणे इव सन्धयः; तदङ्गानि लास्याङ्गानि अङ्काः च भवन्ति। मुखं निर्वहणं चेति सन्धिद्वयं, अङ्कः एको भवतीति ज्ञायते। कुत्सितानां जनानां संबन्धिकल्पितम् इतिवृत्तं भवति। अत्र आरभटी वृत्तिः न भवति। विष्कम्भकः प्रवेशको न भवति। हास्यरस अत्र प्रधानः। तदुक्तं –

अत्र आरभटी, नापि विष्कम्भप्रवेशकौ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा।।(६.२६५)

आरभटी तु माया इन्द्रजालं संग्रामः क्रोधः तेन उद्भ्रान्तं तदादिचेष्टितैः हननबन्धनप्रभृतिभिः व्यापारैः सहिता। अत्र यानि वीथ्यङ्गानि प्रयुक्तानि तानि न भवन्ति।

तपस्विभागद्विप्रप्रभृतिषु नायकः।

एको यत्र भवेद्धृष्टो हास्यं शुभमुच्यते।।

अस्मिन् प्रहसने तापसाः संन्यासिनः ब्राह्मणाः तदादिषु अन्यतमः नेता भवेत्।

प्रहसनं तु शुद्धं विकृतं संकीर्णं चेति त्रेधा

प्रहसनस्य त्रैविद्यम्–

**"तद्वत्प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः।"** इति प्रहसनं त्रिविधं भवति।

शुद्धम्, विकृतम्, सङ्करः च इति।

तद्वदिति भाणवद्वस्तुसन्धिसन्ध्यङ्गकलादीनामतिदेशः।।

प्रहसनमपि भाणवदेव। भाणवद्वस्तु – सन्धि - सन्ध्यङ्गादीनि अस्मिन्नपि विद्यन्त इत्यर्थः। अस्य शुद्धं, वैकृतं, सङ्करं चेति त्रयः प्रकाराः सन्ति। पाखण्डिनः, विप्राः, चेटचेटीविटादयश्च अस्मिन् प्राचुर्येण भवेयुः। तेषां चरितैः, वेषभाषादिभिश्च सङ्कुलं हास्यप्रधानञ्चापि भवति शुद्धं प्रहसनम्।

## 1. शुद्धप्रहसनम्

तत्र शुद्धप्रहसनं दशरूपके–

यस्मिन् प्रहसने विप्रलिङ्गीनां, चेट-चेटीविटानाञ्च सम्मेलनम् एतेषां वेषभाषाचरितादिभिर्मण्डितं हास्यवचोभिश्च युक्तं भवेत् तत् तु शुद्धमुच्यते। लक्षणम्-

**"पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्॥**
**चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोन्वितम्।"**(५४) इति।

पाखण्डिनः शक्यनिर्ग्रन्थप्रभृतयः। विप्राश्चात्यन्तमृजवः, जातमात्रोपजीविनो वा। प्रहसनाङ्गी हास्यविभागः, तेषां च यथावत्स्वव्यापारोपनिबन्धनं चेटचेटीव्यवहारयुक्तं शुद्धं प्रहसनम्। शुद्धप्रहसनस्य उदाहरणं भवति 'शशिविलासः' इति।

## 2. विकृतप्रसनम्

विकृतं तु दशरूपके –

कामुकवचोवेषसमन्विताः षण्डकञ्चुकितापसाः यत्र निबद्धाः भवन्ति तत् विकृतं प्रहसनमिति।

**"कामुकादिवचोवेषैः षण्डकञ्चुकितापसैः।"** विकृतम् (५५) इति लक्षणम्।

कामुकादयो भुजङ्गचारभटाद्याः। तद्वेषभाषादियोगिनो यत्र षण्ड-कञ्चुकितापसवृद्धादयस्तद्विकृतम्।

कामुकादीनां वचोवेषादिकं स्वीकृतवतां नपुंसक – कञ्चुकि – तापसादीनां चरितैर्युक्तं भवति वैकृतं प्रहसनम्।

साहित्यदर्पणे विकृतं प्रहसनं लक्षयति–

**विकृतं तु विदुर्यत्र षण्डकञ्चुकितापसाः ।**
**भुजङ्गचारणभटप्रभृतेर्वेषवाग्युताः ।।(६.२६८)**

यस्मिन् प्रहसने नपुंसकः वारवाणधारी तपस्वी च एते विटनटयोद्धातदादेः प्रभृतिपदेन राजपुरुषादयो गृह्यन्ते। तथा च एतेषां वेषवाग्युताः नेपथ्यभाषाभिः सहिताः भवन्ति, तत्प्रहसनं विद्वांसः विकृतनायकं जानन्ति।

अत्र मुनिमतं निर्दिशति – 'इदं तु सङ्कीर्णेनैव गतार्थमिति मुनिना(भरतेन) पृथक् प्रोक्तम्'। (इदं विकृतप्रहसनं संकीर्णप्रहसनेन गतप्रयोजनं तत्रैव अन्तर्भूतम्।।)

### 3. सङ्करं प्रहसनम् / सङ्कीर्णं प्रहसनम्

सङ्करं तु दशरूपके-

धूर्तजनसमन्वितं प्रहसनं सङ्करप्रहसनमित्युच्यते

धूर्तजनसमन्वितं प्रहसनं सङ्करप्रहसनमित्युच्यते। यत् वीथ्यङ्गैः मिश्रितं धूर्तसमुदायैर्व्याप्तं स्यात् तत् सङ्कीर्णं सङ्करं वेति कथ्यते। यथा-

**"सङ्कराद्वीथ्या सङ्कीर्णं धूर्तसङ्कुलम्।"** (५६) इति लक्षणम्।

स्वस्वरूपप्रच्युतविभावत्वात्। वीथ्यङ्गैस्तु सङ्कीर्णत्वात् सङ्कीर्णम्।।

वीथ्याख्यस्याङ्गैः मिश्रितं धूर्तसङ्कुलं च भवति सङ्कीर्णम्।

यत्र तु संकरं तत् संकीर्णमिति

साहित्यदर्पणे सङ्कीर्णं प्रहसनं लक्षयति-

**आश्रित्य कञ्चन जनं सङ्कीर्णमिति तद्विदुः ।**

धृष्ठभिन्नं नायकम् आश्रित्य यत् प्रहसनं भवति तत् सङ्कीर्णम्। यथा धूर्तचरितम् ।

**वृत्तं बहूनां धृष्ठानां सङ्कीर्णं केचिदूचिरे ।**
**तत्पुनर्भवति द्व्यङ्कमथवैकाङ्कनिर्मितम् ।।(६.२६७)**

मतान्तरेण सङ्कीर्णं प्रहसनं लक्षयति– वृत्तमिति। कतिपये विद्वांसः प्रभूतानां नायकानां चरित्रं यत्र भवति, तत् प्रहसनं तद्विशेषणं रूपकविशेषं जगदुः। पुनः तत् प्रहसनम् अङ्कद्वयोपेतं अथवा एकाङ्कनिर्मितं भवति। यथा लटकमेलकादिः।

सङ्कीर्णविधस्य बोधायनकविप्रणीतं भगवदज्जुकीयम्, महेन्द्रविक्रमकृतं मत्तविलासप्रहसनम् इति द्वे अतिप्रसिद्धे।

प्रहसनेषु षड्विधो हास्यरसः नूनमेव प्रदर्शनीयः। उक्तं यथा-

"रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु।" इति चोक्तम्। ततः षट्प्रकारस्यापि हास्यस्य सन्निवेशोऽस्मिन् युज्यते।

- प्रहसने वस्तु कवेः काल्पनिकमनुसृत्य उत्पाद्यं भवति। धीरललितात्मकाः नीचपात्राभूताः तापस-सन्यासी-विटाद्याः नेतारः भवितुमर्हन्ति, हास्यरसः प्रधानरसो भवति।
- अङ्कः :- एक एवाङ्कः स्यात्।
- सन्धिः :- मुखनिर्वहणे सन्धी भवतः।

उदा -

1. भगवदज्जुकसंज्ञकप्रहसनम् :- बोधायनः
2. मत्तविलासप्रहसनम् :- महेन्द्रविक्रमः
3. लटकमलकम् :- शङ्खधरः
4. हास्यचूडामणिः :- वत्सराजः
5. हास्यार्णवम् :- जगदीशः
6. कौतुकसर्वस्वम् :- गोपीनाथचक्रवर्ती
7. अङ्गदप्रहसनम् :- जग्गुबकूलभूषणः – इत्यादीनि कानिचन प्रहसनानि सन्ति।

## Summarised Overview

दशरूपकेषु अन्यतमं प्रहसनम्। हास्यरसप्रधानम् एतदिति तस्य नाम्ना एव स्पष्टम्। एकाङ्के अस्मिन् कविकल्पितं कथानकम्।

प्रहसन्ति सहृदया अनेनेति प्रहसनम्। अत्र भाणे इव सन्धयः तदङ्गानि लास्याङ्गानि अङ्काः भवन्ति। मुखं निर्वहणं चेति सन्धिद्वयं, अङ्काः च एको भवतीति ज्ञायते। कविकल्पितमितिवृत्तं भवति। त्रयोभेदाः कीर्तिताः- शुद्धं, सङ्कीर्णं, विकृतं च। शुद्धम्- पाषण्डश्रोत्रियः, ब्राह्मणः, भिक्षुः इत्यादीनां हास्यमयवचोभिर्युक्तम्, चेटचेटीविटादिभिर्युक्तम्, वेषभाषादिभिर्हास्यजनकम्। विकृतम्- कञ्चुकी- षण्ड-तापस-वृद्धादीनां विट-चार-भटादिवेषभाषा-युक्ततया विपरीतधर्म प्रवृत्तिरूपतया च वर्णनम्। सङ्कीर्णम्- वीथ्यङ्गैः सङ्कीर्णम्। चोरकितब- धूर्तादिभिश्च सङ्कीर्णम्। यत्र तु संकरं तत् संकीर्णमिति। तथैव दर्शयति तद्वदित्यादिना। प्रहसनेषु षड्विधो हास्यरसः नूनमेव प्रदर्शनीयः।

# Assignments

**उत्तरं लिखत।**

1. प्रहसनं किम् ?
2. प्रहसनस्य भेदान् लिखत।

**टिप्पणिं लिखत।**

1. प्रहसनस्य लक्षणं कृत्वा भेदाः प्रतिपादनीयाः।
2. भाणवत् प्रहसनमपि धूर्तचरित्रात्मकम्।
3. पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्॥
   चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोऽन्वितम्।" विशदयत ।
4. विकृतं तु विदुर्यत्र षण्डकञ्चुकितापसाः ।
   भुजङ्गचारणभटप्रभृतेर्वेषवाग्युताः ।।

**निबन्धात्मकप्रश्नौ।**

1. संस्कृतरूपकसाहित्ये प्रहसनस्य स्थानं सङ्क्षिप्य वर्णयत।
2. प्रहसनस्वरूपं लिखत।

# Suggested Readings

1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी।
3. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
4. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992

# References

1. दशरूपकम्, श्रीधनञ्जयविरचित-by Dr. Kesavarao Musalgaonkara, Chaukhambha Prakasan, Varanasi, 2020
2. Dasarupaka, Dhanjaya, Chapter III, Chaukhamba Sanskrit Series, Varanasi, 2014
3. साहित्यदर्पणम् –Ed.Devadattakausika, Bharatiyavidyaprakashan, New Delhi,1978
4. साहित्यदर्पणम् – Ed.AcharyasesharajasharmaResmi, Krishnadas Academy, Varanasi, 1993

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# संस्कृते प्रहसनानि

## Learning Outcomes

- रूपकेषु प्रहसनस्य महत्वं जानाति।
- प्रहसनविभागान् गच्छति।
- प्रहसनस्य उदाहरणानि जानाति।
- विविधप्रहसनानि परिचिनोति।

## Background

दशरूपकेषु अन्यतमं प्रहसनम्। हास्यरसप्रधानम् एतदिति तस्य नाम्रा एव स्पष्टम्। एकाङ्के अस्मिन् कविकल्पितं कथानकम्। मुखनिर्वहणे द्वे सन्धी भवतः। संस्कृतसाहित्ये अनेकानि प्रहसनानि सन्ति। उदा- भगवदज्जुकसंज्ञकप्रहसनम् - बोधायनः, मत्तविलासप्रहसनम् - महेन्द्रविक्रमः, लटकमलकम् - शङ्खधरः, हास्यचूडामणिः - वत्सराजः, कुहनाभैक्षवम्, मृदङ्गदासप्रहसनम् -अभिराजराजेन्द्रमिश्रः, स्नुषाविजयम्- कविसुन्दरराजः, हास्यार्णवप्रहसनम्- श्रीजगदीश्वरः, पलाण्डुमण्डनप्रहसनम्- श्रीहरिजीवनमिश्रः, विवाहविडम्बनम् – श्रीमज्जीवन्यायतीर्थभट्टाचार्यः इत्यादय कृतयः। किन्तु केचन ग्रन्थाः इतः पर्यन्तं न प्रसिद्धीकृताः।

## Keywords

परिव्राजकः, बौद्ध-कापालिक-पाशुपतादीनाम्, कलाकरण्डकम्, लम्पटाः, दुराशा, व्याधिसिन्धुः, पलाण्डुमण्डलम्, विवाहविडम्बनम्।

# Discussion

## 1. भगवदज्जुकसंज्ञकप्रहसनम्

भगवदज्जुकसंज्ञकप्रहसनम्-बोधायनः

क्रिस्त्वब्दस्य सप्तदशे शतके जातस्य बोधायनकवेः भवति इयं नाट्यकृतिः। दशरूपकेषु अन्यतमं प्रहसनम्। हास्यरसप्रधानम् एतदिति तस्य नाम्ना एव स्पष्टम्। एकाङ्के अस्मिन् कविकल्पितं कथानकम्। अस्मिन् तपस्विजनाः, बाह्मणाः, गणिकाः, धूर्ताः एतादृशानि कथापात्राणि सन्ति। तेषां स्वभावविशेषाः, संवादाः, अभिनयः, सर्वमेव हास्यकरं भवति।

भगवान् इति एकः परिव्राजकः। अज्जुका नाम गणिका। प्रमादात् यमदूतः एकस्य प्राणान् अन्यस्य शरीरे स्थापयति। तेन आचार्यः गणिकासदृशं व्यवहरति, गणिका च आचार्यसदृशम्। अतः सञ्जायते "भगवदज्जुकीयम्"।

शाण्डिल्यनामकः कश्चन ब्राह्मणयुवा शाक्यसंन्यासं परिगृह्णाति। तस्य गुरुः तं नानाप्रकारैः सत्सिद्धान्तं बोधयति। एवं स्थिते, कदाचित् तत्त्वचिन्तनपरौ तौ किञ्चन अरण्यं प्रविशतः।

तस्मिन्नेव समये वसन्तसेना सखीभ्यां सह प्रियस्य रामिलकस्य सङ्गमार्थं सुमधुरं गायन्ती तद्वनं प्रविशति। तेन गानेनाकृष्टः शाण्डिल्यः दूरत एव वसन्तसेनां वीक्ष्य तस्याम् आसक्तो भवति। तावता केनचित् सर्पेण दष्टा वसन्तसेना गतप्राणा भूमौ निपतति। मृतां ताम् अवलोक्य तदनुरक्तः शाण्डिल्यः अतितमं शोकसन्तप्तो भवति। तस्याः कलेवरम् उपसृत्य सुकोमलानि अङ्गानि स्पृशन् बहुधा विलपति च। सख्याः आकस्मिकेन निपतनेन सम्भ्रान्ते चेट्यौ तस्याः मातरम् आनेतुं ततो निर्गच्छतः। तावता शिष्यस्य शोकं कञ्चित् कालं निवारयामीति कृतनिश्चयो गुरुः स्वशरीरं परित्यज्य भूमिस्थितं वसन्तसेनायाः कलेवरं प्रविशति। झटिति गतनिद्रेव उत्तिष्ठति वसन्तसेना। अनेन शाण्डिल्यो मोदमनुभवति।

विषापनोदनार्थम् आगतं विषवैद्यमपि नानाशास्त्रीयैः प्रश्नैः परीक्षते। किञ्च, वसन्तसेनायाः प्राणान् नयता यमदूतेन पश्चात् ज्ञायते यत् यस्याः वसन्तसेनायाः आयुः समाप्तं सा अन्या इयम् अन्या चेति। तस्मात् तस्याः प्राणान् पुनरपि तत्तनौ स्थापयामीति प्रत्यागतः स सचेतनां वसन्तसेनां दृष्ट्वा विस्मितो भवति। ततश्च तत्रैव पतिते परिव्राजकस्य शरीरे तस्याः प्राणान् क्षिप्त्वा निर्गच्छति।

अन्ते, यमदूतः 'मदीयेन प्रमादेन जातम् एतद् वैपरीत्यं परिहर्तव्यम्' इति निश्चित्य उभयोरपि प्राणान् स्वस्वस्थाने निवेशयति। तदा उभयोरपि स्वाभाविकः व्यवहारः पुनरायातो भवति। एवं प्रहसनमिदं सुखान्तं भवति।

**2. मत्तविलास-प्रहसनम्**

सर्वप्राचीनाः प्रहसनग्रन्थः 'मत्तविलासः'। पल्लववंश्येन काञ्चीपुराधीशेन सिंहविष्णोः सुतेन महेन्द्रविक्रमेण मत्तविलासाख्यं प्रहसनरूपकं प्रणीतमस्ति। अस्य हि प्रणयनकालः ६६७ मितवैक्रमाब्दमभितः। अयं च राजा हर्षवर्धनपुलकेशिद्वितीययोः समकालिक इत्यस्य समयः क्रिस्त्वीयसप्तम-शतकस्य पूर्वार्धभागो मान्यः। अत्र हि काञ्चीपुर्याः नागरिकजीवनं चित्रितमस्ति। ग्रन्थे अस्मिन् बौद्ध-कापालिक-पाशुपतादीनां दुर्व्यसनग्रस्तत्वं दर्शितं सनिपुणम्।

मत्तविलास प्रहसनम्- महेन्द्रविक्रमवर्मा

महाकविमहेन्द्रविक्रमवर्मप्रणीते मत्तविलास-प्रहसने काञ्चीपुरनगरमार्गे सत्यसोमनामा कापालिकः मद्यपानं कृत्वा देवसोमानाम्न्याः युवत्याः सौन्दर्यं प्रशंस्य तया सह विहरति। पुनः सः कापालिकधर्मप्रवर्तकस्य परमशिवस्य स्तुतिं करोति। देवसोमा जैनधर्मसिद्धान्तानुसारेण तस्य वाक्यानि खण्डयति। तदनु विनष्टं कपालमन्विष्य उभौ काञ्चीनगरे भ्रमणं कुरुतः। एतस्मिन्नन्तरे नागसेननामकशाक्यभिक्षुः स्वकीयं भिक्षापात्रं वस्त्रान्तरे गोपयित्वा प्रविशति। स तु उपासकस्य धनदासस्य मन्दिरात् सम्यग् भोजनं कृत्वा राजविहारं गच्छति। तदानीं तं कपालचोरं मत्वा सत्यसोमा गृह्णाति। कापालिकस्य प्रश्नस्य उत्तररूपेण नागसेनः वदति यत् बुद्धोपदेशानुसारेण भिक्षापात्रं निगूह्य एव गन्तव्यमिति।

नागसेनः देवसोमाम् अतिलोलुपतया अवलोकयति। देवसोमा कापालिकं वदति यत् मदिरां पीत्वा शक्तिम् आर्जयित्वा भिक्षुणा सह विवादं कर्तुं आगन्तव्यम् इति। कापालिकः मदिरा पिबति, नागसेनाय अपि मदिरां दातुं देवसोमां प्रेरयति। पुनः कापालिकः बलपूर्वकं नागसेनात् भिक्षापात्रं ग्रहीतुं

प्रवर्तते। किन्तु नागसेनस्य प्रहरात् पतितो भवति। तन्मिथः देवसोमा अपि पतति। नागसेनः देवसोमां हस्तं गृहीत्वा यदा उत्थापयति तदा कापालिकः उच्चैर्वदति यत् नागसेनः तस्य प्रियायाः पाणिग्रहणं करोति इति।

अस्मिन्नवसरे बभ्रुकल्पो नाम पाशुपतः प्रविशति। नागसेनः बौद्धधर्मोपदेशं करोति। पुनरपि भिक्षापात्रविषये कोलाहलः भवति। निर्णयार्थं न्यायालयं गन्तुं बभ्रुकल्पः तौ उपदिशति। अस्मिन् क्षणे कोऽपि विक्षिप्तचित्तः उन्मत्तकः स्वहस्ते कापालिकस्य कपालं स्वीकृत्य प्रविशति। एवं तस्य हस्तात् कपालं कापलिकः स्वीकरोति। प्रसन्नः कापालिकः नागसेनस्य पुरतः क्षमायाचनं करोति। ततः भरतवाक्यानन्तरं प्रहसनं समाप्तिम् एति।

### 3. हास्यचूडामणिः

हास्यचूडामणिर्नाम प्रहसनं महाकविना वत्सराजेन विरचितं रूपकम्। वत्सराजस्य स्थितिकालः ११६३-१२०२ क्रिस्त्वब्दः भवति।

हास्यचूडामणि-वत्सराजः

नाटकारम्भे गणिकायाः कपटकेल्याः गृहे तदीयमाभूषणं चोरितम्। सा सन्दिहते यत् इदं चौर्यं तत्पुत्र्यामासक्तो दरिद्रो द्यूतकरः कलाकरण्डकोऽकार्षीत्। सा चौर्यरहस्यं ज्ञातुं केवली-विद्याविशारदं ज्ञानराशिं निकषा जीर्णोद्यानं व्रजति। कपटकेल्याः सेवकस्य मुद्गरकस्य परिहासेन यदा स जानाति यत् स्वयं कपटकेलिश्चौर्यरहस्यं ज्ञातुमायाता वर्तते तदा स प्रतिपादयति यत् सा स्वसेवकाभ्यां कोकिलपारावताभ्यां चौरितमाभूषणं गृह्णीयात्।

प्रहसनस्य द्वितीयदृश्ये मदनोद्याने कलाकरण्डकं निग्रहीतुमागतयोः गुरुशिष्ययोर्ज्ञानराशिकौण्डिन्ययोर्दृष्टिर्निपतति तत्रोपस्थितायां मदनसुन्दर्याम्। गुरुशिष्यौ तस्यामासक्तौ भवतः। उभौ वृत्तमिदं परस्परं गोपयतः। गुरुर्ज्ञानराशिः स्वकीयं ज्वरमवतारयितुं लेखपत्रमानाय्य पत्रे "ज्वरविजयवशीकरणमन्त्रः" इत्यस्य स्थाने "मदनसुन्दरीवशीकरणमन्त्रः" इति लिखति। वशीकरणप्रभावेण कपटकेलिः ज्ञानराशिं प्रति स्वीयमनुरागातिशयं प्रदर्शयति। अत्रान्तरे कोकिलपारावतौ आयातः। तौ ज्ञानराशिं हन्तुमुद्यतौ। ज्ञानराशिः कौण्डिन्यमाह्वयति।

अन्ते कलाकरण्डकः गुरुं ज्ञानराशिं सम्मन्यमानः तं प्रणमति। एवं भरतवाक्येन प्रहसनमिदं सम्पन्नतामेति।

## 4. लटकमेलकम्

लटकमेलकम्- कविवरशङ्खधरः

लटकमेलकं हि कविवर-शङ्खधर-विरचितम् अतीव लोकप्रियं प्रहसनम्। लटकानाम् (धूर्तानाम्), मेलकम् (सम्मेलनम्) इति लटकमेलकम्। अस्य रचनाकालः द्वादशशताब्दीपूर्वार्धः इति।

दन्तुरा-नामक-कुट्टनी मदनमञ्जरीनामक वेश्यायाः परिचारिका वर्तते। तस्या गृहमेव धूर्त्तमण्डलीकृत्यस्थलं भवति। आदौ एव दन्तुरा विविधधूर्तानां परिचयोल्लेखं करोति। तथा हि तपस्वी अज्ञानराशिः, दिगम्बरसाधुः जटासुरः, महामहोपाध्यायः सभासलिः, दार्शनिकः फुङ्कटमिश्रः, महावैद्यो जन्तुकेतुः, ब्रह्मचारी कुलव्याधिः, बौद्धभिक्षुः व्यसनाकरः, नीरसपण्डितो मिथ्याशुक्लः, निष्फलप्रेमी सङ्ग्रामविसरश्चेत्यादयः अनुपमसौन्दर्यस्वामिन्या मदनमञ्जर्याः प्रणयलोलुपा विविधा लम्पटाः तत्र प्रायेण उपस्थिता भवन्ति।

मदनमञ्जर्याः गल-नाल-लग्नं मत्स्य-कण्टकं निष्कासयितुं महावैद्यम्मन्यो जन्तुकेतुः आगच्छति। तस्य हास्यास्पदं कृत्यम् अवलोक्य उच्चैर्हसन्त्याः मदनमञ्जर्या गलनालाद् मत्स्य-कण्टकं स्वयमेव बहिरागच्छति। जन्तुकेतोः एतद् अद्भुतचिकित्साकौशलं सर्वे प्रशंसन्ति। स च मूर्खा गर्वप्रफुल्लितो भवति।

द्वितीयोऽङ्को दन्तुरा-परिणय-नामा भवति। स्वधर्मपत्नी-परिपीडितः सभासलिः मदनमञ्जरी-सङ्गमोपाय-चिन्तनपरायणो वर्तते। अपरतो दिगम्बरो जटासुरोऽपि स्वकामसन्तृप्तये मदनमञ्जरीशरणम् अभिलषति। परन्तु सभासलिः चातुर्येण दन्तुरया सह कामातुरस्य दिगम्बरजटासुरस्य परिणयं सम्पादयति।

## 5. कुहनाभैक्षवम्

तिरुमलनाथप्रणीते कुहनाभैक्षवे नान्द्यनन्तरं नटी सूत्रधारं पृच्छति यत्- "आर्य! सम्प्रति किं करणीयम् "?

कुहनाभैक्षवम् - तिरुमलनाथः

सूत्रधारः कथयति यत् "तिरुमलनाथकृतं कुहनाभैक्षवं नाम प्रहसनम् अभिनेतव्यम्" इति।

प्रस्तावनानन्तरं चन्द्रलेखेव चन्द्ररेखायां गणिकायाम् आसक्तं भिक्षुं निवारयितुं शङ्करकौशिकी छद्मवैष्णवी भूत्वा भिक्षुशिष्याय दामोदराय

निवेदयति। चन्द्ररेखायां गुर्वासक्तिमपहर्तुं दामोदरः शङ्करकौशिकीं ब्रवीति यत्- "उपायेन केनापि चन्द्ररेखायामासक्तः अहमदखानो यदि इमं वृत्तान्तम् अवागमिष्यत् तर्हि भयाद् गुरोः कामज्वरोऽपागमिष्यत्"। किन्तु अहमदखानाय निवेदितुं न कोऽपि शशाक। अतः स्वयं गुरुं शिक्षयितुं शङ्करकौशिकी हिम्मीरखानस्य वेषं धृत्वा गुरुसमया गच्छति युद्धं च करोति, किन्तु पराजितो भूत्वा ततः पलायनं करोति। तत्रैवोद्याने आगतायां सत्यां चन्द्ररेखायां गुरुः पादपान्तर्हितो भूत्वा चन्द्ररेखारूपं पिबति। तन्मध्य एव मधुमक्षिकाः तं दंशन्ति।

पुनः चन्द्ररेखया साकं गुरोः समागमनेच्छया गोविन्दो गुरुं नयति। किन्तु चन्द्ररेखाया गृहद्वारे उपविष्टम् अहमदखानं विलोक्य उभावपि जडीभूतौ। अतः सम्मेलनकालं परिवर्त्य सायङ्काले उभौ चन्द्ररेखागृहं व्रजतः। तत्र हालापानमत्तस्य अहमदखानस्य पुरो माधविकावेषधरो गोविन्दो गच्छति, तत्पृष्ठान्तर्हितश्च गुरुश्चन्द्ररेखाया गृहं प्रविशति।

एवं सुखान्तकस्य रूपकस्यास्य सम्पूर्तिः भरतवाक्येन भवति।

### 6. मृदङ्गदास-प्रहसनम्

मृदङ्गदासप्रहसनम्- अभिराजराजेन्द्र मिश्रः

मृदङ्गदासप्रहसनम् अभिराजराजेन्द्रमिश्र-विरचितमेकं समस्यामयिकं प्रहसनमस्ति। अस्मिन् प्रहसने पाखण्डपरायणः कृतकसाधुः मृदङ्गदासः नगरोपकण्ठस्थिते उद्याने वितानमातत्य निवसति। तस्य प्रवञ्चनकुशलौ शिष्यौ कुम्भदासः नकुलदासश्च तन्महिमानं प्रचार्य मुग्धान् जनान् समस्या-सङ्कट-व्याधिग्रस्तान् तदन्तिकमानयतः, समस्यानिवारणनाटकं च विधाय धनं मुष्णीतः।

एतस्यामेव परम्परायां कुम्भदासः एकं श्वासरोगिणं वशीकृत्य दूरभाषमाध्यमेन रोगं गुरवे निवेद्य मृदङ्गदाससमीपमानयति। तमवलोक्य मृदङ्गदासः तच्छिष्यो नकुलदासश्च पाखण्डसाधनां कुरुतः। तदनन्तरं मृदङ्गदासः रोगिणे सप्तदिवसात्मकमौषधं दत्वा रोगनिवारणं प्रकल्प्य तस्मै आश्वासं ददाति। रोगिणा सह आगतः पुरुषः औषधमौल्यरूपे पञ्चशतरूप्यकाणि प्रदाय गच्छति। श्वासरोगी वृद्धः तृतीयदिवसे एव म्रियते। एतत् विज्ञाय वृद्धस्य कश्चित् सम्बधी रक्षिपुरुषः पुरुषेण सह मृदङ्गदाससमीपमायाति।

मृदङ्गदासं वृद्धमृत्युं निवेद्य स्वं च अङ्गभङ्गदासं कथयति। यदा शिष्यौ आश्वस्तौ भवतः तदैकः शिष्यः स्वगुरुमाह्वयति। गुरुरागत्य पाखण्डेन नृत्यति। द्वयोर्मध्ये वार्ता भवति। उभौ नृत्यतः। पुनः रक्षिपुरुषः वज्रमुष्टिप्रहारेण मृदङ्गदासमुखं भनक्ति। स्वकीयं रक्षिपुरुषपरिचयपत्रं च दर्शयति। तथा च मृदङ्गदासं कुम्भदासं नकुलदासं च बद्ध्वा रक्षिभिः साकं तान् कारागारं नयति।

## 7. स्नुषाविजयम्

स्नुषाविजयम्- कविसुन्दरराजः

स्नुषाविजयाख्यं रूपकं कविसुन्दरराजस्य कृतिः वर्तते। दुराशा (श्वश्रूः) स्वस्नुषां सच्चरित्रां सर्वदैव तर्जयत्येव दोषाञ्च आरोपयति। परञ्च श्वशुरः सुशीलः तां स्नुषां सुगुणां सुशीलाञ्च बहु मन्यते। स च परिवारे सामञ्जस्यं स्थापयितुं बहुधा सत्परामर्शं कथयति, किन्तु पत्या अवमानने सति सः उदासीनो जायते। चारुवृत्ता या दुराशायाः प्रातिवेशिनी सखी चासीत्, साऽपि स्नुषां सच्चरित्राम् एव अभिनन्दयन्ती दुराशां कैकेयीवत् कथयति। सा दुराशा पुत्रसमक्षेऽपि स्नुषां प्रति द्वेष्टि स्वपुत्रीं दुर्ललितां प्रशंसति, या श्वशुरालये पैशुन्यमाचरन्ती भर्तृगेहात् निर्वासिता।

दुश्चरितं पुत्रं दुर्नयमपि स्तौति, यः स्वस्यामेव प्रजावत्यां कुदृष्टिं पातयति। पुत्रः सुगुणः तु जननीं सान्त्वयत्येव। तस्य पत्नी सच्चरित्रा श्वश्रू-व्यवहारात् खिन्नमना भूत्वा पत्या सार्द्धं पृथक् स्थातुं तु वाञ्छति परञ्च तदर्थं तं नैव प्रेरयति।

सुशीलो नाम श्वशुरः दुराशाया व्यवहारेण म्लानचित्तो भूत्वा कुटुम्बे कलहनिवारणाय तां दुराशां पृथक् गृहे वासयितुं चिन्तयति। दुर्ललिता यदा एतस्य विषये ज्ञातवती साऽपि प्रभूतधनमिच्छन्ती मात्रा सह गन्तुमिच्छति। अन्ते सा दुराशा स्वपुत्र्याः कृते महद्धनं प्राप्य पुत्र्या सह गृहं परित्यज्य पृथक्गृहे निवासं स्वीकरोति।

इत्थमत्र स्नुषायाः विजयो भवति। इदं रूपकं खलु प्रतीकात्मकं वर्तते, यस्य अवसानः वर्तमानकालीनसमाजस्य परिप्रेक्ष्ये प्रश्नचिह्नम् उपस्थापयति यत् इयं सामाजिकी दुरवस्था कियत्पर्यन्तं सफला भवितुमर्हतीति। अस्मिन् विषये सहृदयाः एव प्रमाणम्।

## 8. हास्यार्णव-प्रहसनम्

हास्यार्णवप्रहसनम्- श्रीजगदीश्वरः

हास्यार्णवप्रहसनं द्व्यङ्कविशिष्टं कविना श्रीजगदीश्वरेण विरचितमस्ति। प्रस्तावनानन्तरम् अनयसिन्धुराजो नाम नृपतिः कुमतिवर्मणा मन्त्रिणा सह नगरवासिनां सुखदुःखानि ज्ञातुं बन्धुरायाः वृद्धवेश्यायाः गृहे सभाकार्यं चालयितुं प्रविशति। बन्धुरायाः पुत्रीं सुन्दरीं तरुणीं मृगाङ्कलेखां विलोक्य राजा अनयसिन्धुः तद्रूपं प्रशंसति। अनन्तरं विश्वभाण्डनामा उपाध्यायः मृगाङ्कलेखां कामशास्त्रं पाठयितुं शिष्येण कलहाङ्कुरेण सह तत्रोपस्थितः मृगाङ्कलेखारूपं प्रशंसति। अनन्तरं तत्रोपस्थितां मृगाङ्कलेखामालोक्य व्याधिसिन्धुः कामाकुलः भवति। ततः बन्धुरायाः मृगाङ्कलेखायाश्च स्वास्थ्यनिमित्तं सः उद्भटौषधिव्यवस्थां करोति। ततः परं रक्तकल्लोलनामा नापितः कस्यचित् पौरस्य नखोत्पाटनापराधेन पौरेणानायितः। तस्मिन् काले मिथ्यार्णवनामा ब्राह्मणः प्रातिवेशिगृहे परकलत्रं रजकीं रममाणस्य प्रस्तराघातेन मारितस्य कस्यचित् ब्राह्मणस्य कृते किं प्रायश्चित्तमस्तीति जिज्ञासुः प्रविशति। उत्तरप्रदाने विश्वभाण्डः कथयति-'ब्राह्मण्याः तत्पुत्रस्य च वदने अत्युत्तप्तं गोमयजलं पातनीयम्'। अनन्तरं मिथ्यार्णवस्य प्रस्थानं भवति। राज्यसुरक्षाविषये किञ्चित् सूचयितुं रणजम्बूकनामा सेनापतिरागच्छति। ततः परं महायात्रिकनामा ज्योतिर्विद् तत्रोपस्थाय राज्ञः मरणवेलां सूचयति।

द्वितीयाङ्के प्रातःकाले विश्वभाण्डः तस्य शिष्यश्च बन्धुरागृहमागच्छति। तदा मदनान्धमिश्रोऽपि स्वशिष्येण कुलालेन सह तत्रागच्छति। विश्वभाण्डः मदनान्धमिश्रश्च मिथः वञ्चयितुकामः आत्मनः वैष्णवत्वं प्रकाशयतः। बन्धुरा स्वगृहे कन्दर्पहवनं कर्तुं मदनान्धमिश्रं सूचयति। मदनान्धमिश्रः गृहमध्ये मृगाङ्कलेखया सह शृङ्गारक्रीडां समपादयति। ततः विश्वभाण्डः मदनान्धमिश्रश्च मृगाङ्कलेखां परिणेतुं मन्त्रणं कुरुतः। उभयोः शिष्यौ अपि वृद्धां बन्धुरां परिणेतुं निश्चितवन्तौ। अनन्तरं महानिन्दकाचार्यः विवाहकार्यं सम्पादयति।

## 9. पलाण्डुमण्डनम्

पलाण्डुमण्डन प्रहसनम् - श्रीहरिजीवनमिश्रः

'पलाण्डुमण्डनप्रहसनम्' श्रीहरिजीवनमिश्रेण प्रणीतम्। अत्र दाक्षिणात्यस्य लिङ्गोजीभट्टस्य द्वे पत्न्यौ स्तः ज्येष्ठा पूर्णपोलिका, कनिष्ठा चिञ्चा च। तत्र चिञ्चायां गर्भाधानस्यावसरे लिङ्गोजीभट्टेन पलाण्डुलशुनादिभक्षणरसिकाः पलाण्डुमण्डनाद्याः दाक्षिणात्याः निमन्त्र्यन्ते स्वावुत्तस्य त्र्यम्बकभट्टस्य स्वभगिन्याः क्वथिकायाश्च तरुणेन पुत्रेण गृञ्जनाद्रिणा

रजोयोग्यायाः पूर्णपोलिकाजातायाः रक्तमूलिकायाः पुत्र्या विवाहो निश्चीयते च। तदानीं विंशत्युत्तरशतवर्षाधिकस्य स्वभ्रातुः पलाण्डुमण्डनस्य रक्तमूलिकया विवाहं धनबलेन कारयितुमभिलषन् लशुनपन्तो लिङ्गोजीभट्टं छलेन वदति यदस्याः रक्तमूलिकाया विवाहो मया सह करणीयः, यतोऽहमस्यामस्या गर्भाधानादेवानुरक्तः, तरुणस्य गृञ्जनाद्रेर्विवाहस्तया कन्यया कार्यो या गर्भाधानादनन्तरं चिञ्चायां भविष्यति। वृद्धो लशुनेन परिपुष्टो लशुनपन्तो यदा पलाण्डुल-शुनोत्पत्तियोग्यं क्षेत्रं कन्यायाः शुल्करूपेण दित्सति तदा तस्य विवाहो रक्तमूलिकया निश्चीयते। अनिच्छन्त्यपि पूर्णपोलिका लशुनपन्तेन सह स्वपुत्र्या विवाहमनुमन्यते।

तदानीमेव पलाण्डुलशुनादिप्रियैः पलाण्डुमण्डनलिङ्गोजीभट्टप्रभृतिभिः दाक्षिणात्यैः प्रयुक्तानां पलाण्डुलशुनादीनां दुर्गन्धेन नासां भ्रुवं च संकोचयन्, अवलम्बमानान् मत्स्यान् करेण दधानैरुदीच्यैः शिष्यैरनुगम्यमानः, पलाण्डुलशुनादिभक्षणमशास्त्रीयं मत्स्यभक्षणं च विविधैः प्रमाणैः शास्त्रीयं साधयन् झल्लरीझङ्कार-भेरीभाङ्कारभट्टाचार्यः प्रविशति। तस्य शास्त्रीयेण तर्केण पराभूता दाक्षिणात्याः 'एष दुष्टो भट्टाचार्यो मारणकर्म करोति, अनेनैव वेदीं परितः पलाण्डुलशुनादिपत्राणि विकीर्णानि' इति मिथ्यारोपं विधायोदीच्यं तं भट्टाचार्यं छलेन राजपुरुषेण ग्राहयन्ति। लिङ्गोजीभट्टस्ततो वदति यद् रक्तमूलिकया विवाहस्य विषये पश्चाद् विचारयिष्यामि। अथ भरतवाक्येन प्रहसनं पूर्णं भवति। एवमिदं प्रहसनं धर्मशास्त्रेण निषिद्धं पलाण्डुलशुनादिभक्षणम् अविहितमत्स्यादिभक्षणं च कुर्वतो धार्मिकम्मन्यान् प्रति कटाक्षः।

## 10. विवाहविडम्बनम्

विवाहविडम्बनम्- श्रीमज्जीवन्यायतीर्थ भट्टाचार्यः

संस्कृतरूपकेषु भाणवत् प्रहसनमपि धूर्तचरित्रात्मकम्। कामुकवचोवेष-समन्वितत्वात् धूर्तजनसमन्वितत्वाच्च सङ्करं प्रहसनं प्रसिद्धम्। प्रकृते श्रीमज्जीवन्यायतीर्थभट्टाचार्यविरचितं विवाहविडम्बनं नाम सङ्करप्रहसनं भाणवदेकाङ्क हास्यरसभूयिष्ठं विलसति।

विघ्नविघातार्थकेन मङ्गलेन अस्य प्रारम्भो भवति। नान्द्यन्ते सूत्रधार-विदूषकौ प्रविश्य प्रस्तावनां विधत्तः। विवाहविडम्बनस्य इतिवृत्तः तावद् यथा-

रतिकान्तो नाम कश्चित् प्रवयाः चन्द्रलेखाभिधां कामपि दरिद्रकन्यकां प्रभूतधनव्ययेनापि परिणेतुं प्रयतते। परिणयनार्थं तद्भृत्यो यं कमपि विवाहघटकमानीय चन्द्रलेखाजनकं धनेन वशीकर्तुं निश्चिनोति। स्वप्ने सः चन्द्रलेखां पश्यति।

वृद्धोऽपि रतिकान्तः स्वकीयं सौन्दर्यं वर्धयितुं पलितकेशानां पुनः पोषणार्थं वैज्ञानिकचिकित्सकं शङ्करनाथनामानं कमपि आह्वयति। रतिकान्तस्य भगिनी खड्गधरा विधवा चत्वारिंशद्वयस्का भ्रातुः व्यर्थप्रयासमपहसति। सा रतिकान्तस्य भृत्यं कङ्कनामानं क्रोधेन प्रहरति। चन्द्रलेखायाः विवाहस्तु केनचन तरुणेन साकं जातः। वीतसाफल्यो रतिकान्तो वदति- "सर्वं दुर्दैवं विजृम्भते। भो वैवाहिक ! यदि सत्यं सम्बन्धगौरवं मानयसि तर्हि रक्ष मां घटकहस्तात्।" इति। चन्द्रलेखायाः पिता विधुशेखरः रतिकान्तं समाश्वासयति।

रतिकान्तधनेन विधुशेखरस्य कन्या योग्येन तरुणेन परिणीतेति शुभसूचनया प्रहसनं समाप्तिमेति ।

## Summarised Overview

बोधायनकवेः नाट्यकृतिः भगवदज्जुकसंज्ञकप्रहसनम्। आचार्यः गणिकासदृशं व्यवहरति, गणिका च आचार्यसदृशम्। अतः सञ्जायते "भगवदज्जुकीयम्"। सर्वप्राचीनाः प्रहसनग्रन्थः 'मत्तविलासः'। पल्लववंश्येन काञ्चीपुराधीशेन सिंहविष्णोः सुतेन महेन्द्र-विक्रमेण मत्तविलासाख्यं प्रहसनरूपकं प्रणीतमस्ति। काञ्चीपुर्याः नागरिकजीवनं चित्रितमस्ति। ग्रन्थे अस्मिन् बौद्ध-कापालिक-पाशुपतादीनां दुर्व्यसनग्रस्तत्व्यं दर्शितं सनिपुणम्। हास्यचूडामणिर्नाम प्रहसनं महाकविना वत्सराजेन विरचितं रूपकम्। लटकमेलकं हि कविवर-शङ्खधर-विरचितम् अतीव लोकप्रियं प्रहसनम्। लटकानाम् (धूर्तानाम्), मेलकम् (सम्मेलनम्) इति लटकमेलकम्। अस्य रचनाकालः द्वादशशताब्दी-पूर्वार्धः इति। तिरुमलनाथकृतं कुहनाभैक्षवं नाम प्रहसनम्। मृदङ्गदासप्रहसनम् अभिराजराजेन्द्रमिश्र-विरचितमेकं समस्यामयिकं प्रहसनमस्ति। स्नुषाविजयाख्यं रूपकं कविसुन्दरराजस्य कृतिः वर्तते। इदं रूपकं खलु प्रतीकात्मकं वर्तते, यस्य अवसानः वर्तमानकालीनसमाजस्य परिप्रेक्ष्ये प्रश्नचिह्नम् उपस्थापयति यत् इयं सामाजिकी दुरवस्था कियत् पर्यन्तं सफला भवितुमर्हतीति। हास्यार्णवप्रहसनं द्व्यङ्कविशिष्टं कविना श्रीजगदीश्वरेण विरचितमस्ति।'पलाण्डुमण्डनप्रहसनम्' श्रीहरिजीवनमिश्रेण प्रणीतम्। इदं प्रहसनं धर्मशास्त्रेण निषिद्धं पलाण्डुलशुनादिभक्षणम् अविहितमत्स्यादिभक्षणं च कुर्वतो धार्मिकम्मन्यान् प्रति कटाक्षः। संस्कृतरूपकेषु भाणवत् प्रहसनमपि धूर्तचरित्रात्मकम्। कामुकवचोवेष-समन्वितत्वात् धूर्तजनसमन्वितत्वाच्च सङ्करं

प्रहसनं प्रसिद्धम्। प्रकृते श्रीमज्जीवन्यायतीर्थभट्टाचार्यविरचितं विवाहविडम्बनं नाम सङ्करप्रहसनं भाणवदेकाङ्कं हास्यरसभूयिष्ठं च विलसति।

# Assignments

उत्तरं लिखत।

1. "भगवदज्जुकीयम्" नाम प्रहसनस्य नामवैशिष्ट्यं किम् ?
2. "लटकमेलकम्" नाम प्रहसनस्य नामवैशिष्ट्यं किम् ?
3. "विवाहविडम्बन"स्य इतिवृत्तं किम् ?

टिप्पणिं लिखत ।

1. भगवदज्जुकीयम् ।
2. मत्तविलास प्रहसनम् ।
3. हास्यचूडामणिः ।
4. लटकमेलकम् ।
5. स्नुषाविजयम् ।
6. विवाहविडम्बनम् ।

# Suggested Readings


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. A Short History of Sanskrit Literature - T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
4. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992

# References

1. Mattavilasaprahasana of Mahendravikraman, Edited and translated by N.P.Unni, Nag Publishers, Delhi, 1974
2. Bhagavad - Ajjukam and Mattavilasa-Prahasana by King Mahendravikramavarman, Edited and Translated by Michael Lockwood and A.Vishnu Bhat Copyright, 2005

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# मत्तविलासप्रहसनम्

## Learning Outcomes

- महेन्द्रविक्रमस्य मत्तविलासप्रहनस्य परिचयः ।
- मत्तविलासप्रहनस्य नागरिकजीवनस्य विज्ञानम् ।
- संस्कृतप्रहसनेषु मत्तविलासप्रहसनस्य वैशिष्ट्यम् ।
- बौद्ध-कापालिक-पाशुपतादीनां स्वभावान् परिचिनोति ।

## Background

हास्यरसस्य समाजे महानुपयोगे शिष्टहास्यस्य आदरः, समाजविरोधतत्त्वस्य मार्गस्थाने हास्यरसप्रधानकाव्यस्य प्रहसनकाव्यस्य सृष्टौ कारणं भवति। यथाऽधुना हास्यरसप्रधानं व्यङ्ग्यमयं च काव्यं काममपि विशिष्टां मर्यादां रक्षति, नानायासं लिख्यते, तथैव प्रागपि प्रहसनं बहुलतया अवर्तत। नालिख्यत, तथऽपि संस्कृतसाहित्ये प्रहसनग्रन्थस्य एकान्ततोऽभावो नास्ति।

प्रहसने भाणवत् सन्ध्यादयः, निन्दनीयत्वेन वर्ण्यमानानां कल्पितं वृत्तम्, विष्कम्भकप्रवेशकराहित्यम्, हास्यरसप्राधान्यश्च भवति।

प्राचीन प्रहसनग्रन्थः भवति 'मत्तविलासः'। पल्लववंश्येन काञ्चीपुराधीशेन सिंहविष्णोः सुतेन महेन्द्र-विक्रमेण मत्तविलासाख्यं प्रहसनरूपकं प्रणीतमस्ति। अस्य हि प्रणयनकालः ६६७ मितवैक्रमाब्दमभितः। अयं च राजा हर्षवर्धनपुलकेशिद्वितीययोः समकालिक इत्यतः अस्य समयः क्रिस्त्वीयसप्तमशतकस्य पूर्वार्धभागः। अत्र हि काञ्चीपुर्याः नागरिकजीवनं चित्रितमस्ति। ग्रन्थे अस्मिन् बौद्ध-कापालिक-

पाशुपतादीनां दुर्व्यसनग्रस्तत्व्यं दर्शितं सनिपुणम्।

## Keywords

दिव्यः कपाली, मत्तामिव, अर्हन्तो, मिथ्यादृष्यः, वारुणी, रुद्रभगो, कपालम्, शाक्यभिक्षुः, संवृतसत्यम्, खरपटायेति, अपह्नुवानस्य, शिरःकपालम्, सुवर्णवर्णपटावृतेन।

## Discussion

**मत्तविलासप्रहसनम्**

श्रीमहेन्द्रविक्रमवर्मप्रणीतम्

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

**सूत्रधारः -**

**भाषावेषवपुः क्रियागुणकृतानाश्रित्य भेदान् गतं**
**भावावेशवशादनेकरसतां त्रैलोक्ययात्रामयम्।**
**नृत्तं निष्प्रतिबद्धबोधमहिमा यः प्रेक्षकश्च स्वयं**
**स व्याप्तावनिभाजनं दिशतु वो दिव्यः कपाली यशः ॥१॥**

भोः! समासादितः खलु मया यवीयसीं भार्यामधिकृत्य समुत्पन्नव्यलीकायां ज्येष्ठायां मे कुटुम्बिन्यां युक्ततरः प्रसादनोपायः, यच्चिरस्याद्यवयं प्रेक्षाधिकारे परिषदा नियुक्ताः स्मः। तद् यावदेनामुपसर्पामि।

सूत्रधारस्य प्रथमपत्नी तथा मुख्याभिनेत्री भवति नटी

(नेपथ्याभिमुखमवलोक्य) आर्ये ! इतस्तावत्।

(प्रविश्य)

**नटी -** (सरोषम्) आर्य ! किं चिरस्य कालस्य यौवनगुणभरमत्तविलासप्रहसनं दर्शयितुमागतोऽसि ।

सूत्रधारः - यथाह भवती ।

नटी - तथैव तावद् दर्शय, या त्वया रमयितव्या।

सूत्रधारः - त्वया सह दर्शयिष्यामीति ।

नटी - किं तथैव नियुक्तोऽसि ?

सूत्रधारः - एवमेतत्। अपि च, तत्र गता महान्तमनुग्रहं लप्स्यसे।

नटी - तथैव खल्वेतद्युज्यते ।

सूत्रधारः - भवति ! किमिव न युज्यते । त्वत्प्रयोगपरितोषिता परिषद-नुग्रहीष्यतीति ।

नटी - (सहर्षम्) एवम् । लब्ध आर्यमिश्राणां प्रसादः।

सूत्रधारः - बाढम्। लब्धः।

नटी - यद्येवं, किं ते प्रियाख्यानिकं ददामि।

सूत्रधारः - अलं प्रियाख्यानिकपुनरुक्तेन। पश्य-

सूत्रधारः युवत्याः मुखसौन्दर्यं वर्णयति

**उद्भिन्नरोमाञ्चकपोलरेख-**
**माविर्मयूखस्मितमञ्चितभ्रु ।**
**लब्ध्वा प्रिये ! दुर्लभमाननं ते**
**भूयोऽपि किं प्रार्थयितव्यमस्ति ।।२।।**

नटी - किमिदानीमार्येण प्रयोक्तव्यम् ।

सूत्रधारः - ननु त्वयैवाभिहितं मत्तविलासप्रहसनमिति ।

नटी - नूनमस्मिन् पक्षपाती मे कोपः, येनाभिप्रायानुरूपं भणितास्मि। आर्य! कतमः पुनः स कविः, योऽनया कृत्या प्रकाश्यते ?

सिंहविष्णोः सुतेन महेन्द्रविक्रमेणवर्मणा मत्तविलासाख्यं प्रणीतमस्ति।

सूत्रधारः - भवति ! श्रूयताम्। पल्लवकुलधरणि मण्डलकुलपर्वतस्य सर्वनयविजितसमस्तसामन्तमण्डलस्य आखण्डलसमपराक्रमश्रियः श्रीमहि-मानुरूपदानविभूतिपरिभूतराजराजस्य श्रीसिंहविष्णुवर्मणः पुत्रः शत्रुषड्वर्ग-निग्रहपरः परहितपरतन्त्रतया महाभूत सधर्मा महाराजः श्रीमहेन्द्रविक्रमवर्मा नाम। अपि च,

महाराजस्य श्रीमहेन्द्रविक्रमवर्मणः प्रशस्तिं वर्णयति

**प्रज्ञादानदयानुभावधृतयः कान्तिः कलाकौशलं**
**सत्यं शौर्यममायता विनय इत्येवम्प्रकारा गुणाः।**
**अप्राप्तस्थितयः समेत्य शरणं याता यमेकं कलौ,**
**कल्पान्ते जगदादिमादिपुरुषं सर्गप्रभेदा इव ।।३।।**

**किञ्च,**

**आकरे सूक्तिरत्नानां यस्मिन् गुणगरीयसाम् ।**
**अर्घन्ति बहु सूक्तानि सतां सारलघून्यपि ।।४।।**

**नटी** - किमिदानीमार्येण विलम्ब्यते। नन्वपूर्वतया त्वरितमनुष्ठातव्योऽयं प्रयोगः।

**सूत्रधारः** - अहं तु,

सम्प्रति सङ्गीतधनः
कविगुणकथयास्मि निघ्नतां नीतः।

(नैपथ्ये)

प्रिये ! देवसोमे !

**सूत्रधारः** - युवतिसख एष सुरया
**कपालविभवः कपालीव ।।५।।**

(निष्क्रान्तौ।)

**स्थापना।**

(ततः प्रविशति सपरिग्रहः कपाली।)

**कपाली** - (क्षीबतां रूपयित्वा) प्रिये ! देवसोमे ! सत्यमेवैतत्-- तपसा कामरूपता प्राप्यत इति। यत् त्वया परमव्रतस्य विधिवदनुष्ठानेनान्य एव रूपातिशयः क्षणात् प्रतिपन्नः। तव हि,

**उद्भिन्नश्रमवारिविन्दु वदनं सभ्रूलताविभ्रमं**
**खेलं यातमकारणानि हसितान्यव्यक्तवर्णा गिरः।**
**रागाक्रान्तमधीरतारमलसापाङ्गं युगं नेत्रयो-**
**रंसोपान्तविलम्बिनश्च विगलन्मालागुणा मूर्धजाः ॥६॥**

**देवसोमा** - भगवन् ! मत्तामिव मत्तामिव मां भणसि।

**कपाली** - किमाह भवती।

**देवसोमा** - न खलु किञ्चिद् भणामि।

**कपाली** - किन्नुखलु मत्तोऽस्मि।

**देवसोमा** - भगवन्! परिभ्रमति परिभ्रमति पृथिवी। पुरः पतामीव। अवलम्बस्वेदानीं माम्।

**कपाली** - प्रिये! तथास्तु। (अवलम्बमान: पतनं रूपयित्वा) प्रिये! सोमदेवे! किं त्वं कुपितासि, यदवलम्बितुमुपसर्पतो मे। दूरीभवसि।

**देवसोमा** – अहो नुखल्वागतकोपा सोमदेवा, या त्वया शीर्षेण प्रणम्या-नुनीयमानापि दूरीभवति।

**कपाली** - ननु त्वमेवासि सोमदेवा। (ध्यात्वा) नहि, देवसोमा।

**देवसोमा** - भगवन् ! ननु तथा वल्लभा सोमदेवा, नार्हति मम नाम-केनाभिधातुम्।

**कपाली** - भवति ! सुलभपदस्खलितो मे मदोऽयं तवात्रापराद्धः।

**देवसोमा** - दिष्ट्या न त्वम्।

**कपाली** - कथं मद्यदोषो मामेवं सङ्क्रामयति। भवतु भवतु। अद्य प्रभृति मद्यनिषेवणान्निवृत्तोऽस्मि।

**देवसोमा** - भगवन् ! मा, मा मम कारणाद् व्रतभङ्गेन तपः खण्डयितुम् । (पादयोः पतति।)

**कपाली** - (सहर्षमुत्थाप्यालिङ्ग्य) नमः शिवाय। प्रिये!

> **पेया सुरा प्रियतमामुखमीक्षितव्यं**
> **ग्राह्यः स्वभावललितो विकृतश्च वेषः।**
> **येनेदमीदृशमदृश्यत मोक्षवर्त्म**
> **दीर्घायुरस्तु भगवान् स पिनाकपाणिः ।।७।।**

अर्हन्तो मोक्षमार्गमन्यथा वर्णयन्ति

**देवसोमा** - भगवन्! ननु तथा भणितव्यम्। अर्हन्तो मोक्षमार्गमन्यथा वर्णयन्ति।

**कपाली** - भद्रे ! ते खलु मिथ्यादृष्यः। कुतः,

कार्यस्य निःसंशयमात्महेतोः
सरूपतां हेतुभिरभ्युपेत्य।
दुःखस्य कार्यं सुखमामनन्तः
स्वेनैव वाक्येन हता वराकाः ।।८।।

**देवसोमा** - शान्तं शान्तं पापम्।

**कपाली** - शान्तं शान्तं पापम्। न खलु ते पापा आक्षेपमुखेनाप्यभिधातुमर्हन्ति, ये ब्रह्मचर्यकेशनिर्लोटनमजधारण-भोजनवेलानियम-मलिनपटपरिधानादिभिः प्राणिनः परिक्लेशयन्ति। तदिदानीं कुतीर्थसङ्कीर्तनोपहतां जिह्वां सुरया प्रक्षालयितुमिच्छामि।

**देवसोमा** - तेन ह्यन्यमिदानीं सुरापणं गच्छावः।

**कपाली** - प्रिये ! तथास्तु ।

(उभौ परिक्रामतः)

काञ्चीपुरस्य वर्णना

**कपाली** - अहो नु खलु विमानशिखरविश्रान्तधनरसितसन्दिग्धमृदङ्ग-शब्दस्य मधुसमयनिर्माणमातृकायमाणमाल्यापणस्य कुसुमशरविजय-घोषणायमानवरयुवतिकाञ्ची रवस्य काञ्चीपुरस्य पराविभूतिः। अपि च,

यदुत करणभोग्यं कामभोगात्मकं च

अनतिशयमनन्तं सौख्यमप्रत्यनीकं
समधिगतसतत्वा मेनिरे यन्मुनीन्द्राः।
तदिह निरवशेषं दृष्टमेतत् तु चित्रं
यदुत करणभोग्यं कामभोगात्मकं च ।।९।।

**देवसोमा** - भगवन् ! भगवतीवारुणीवानवगीतमधुरा काञ्ची।

सुरापणो यज्ञवाट विभूतिमनुकरोति।

**कपाली** - प्रिये! पश्य पश्य । एष सुरापणो यज्ञवाट विभूतिमनुकरोति। अत्रहि ध्वजस्तम्भो यूपः, सुरा सोमः, शौण्ड ऋत्विजः, चषकाश्चमसाः, शूल्यमांसप्रभूय उपदंशा हविर्विशेषाः मत्तवचनानि यजूंषि, गीतानि सामानि, उदङ्काः स्रुवाः, तर्षोऽग्निः, सुरापणाधिपतिर्यजमानः।

**देवसोमा** - आवयोरप्यत्र भिक्षा रुद्रभगो भविष्यति।

नहि लोकोपकारनिरतो लोकनाथो लोकं विनाशयति

**कपाली** - अहो दर्शनीयानि प्रहतमर्दलकरणानुगतानि विविधाङ्ग-हारवचनभ्रूविकाराणि उच्छ्रितैकहस्तावलम्बितोत्तरीयाणि विगलित वसनप्रतिसमाधानक्षणविषमितलयानि व्याकुलितकण्ठगुणानि मत्तविलास नृत्तानि।

**देवसोमा** - अहो रसिकः खल्वाचार्यः।

**कपाली** - एषा भगवती वारुणी चषकेत्वावर्जिता प्रत्यादेशो मण्डनानाम्, अनुनयः प्रणयकुपितानां, पराक्रमो यौवनस्य, जीवितं विभ्रमाणाम्। किं बहुना,

**मिथ्या त्रिलोचनविलोचनपावकेन**

**भस्मीकृतां मदनमूर्तिमुदाहरन्ति।**

**स्नेहात्मिका तद्भितापवशाद् विलीना**

**सेयं प्रिये ! मदयति प्रसभं मनांसि** ॥१०॥

**देवसोमा** - भगवन् ! युज्यत एतत्। नहि लोकोपकारनिरतो लोकनाथो लोकं विनाशयति ।

(उभौ कपोलपटहं कुरुतः।)

**कपाली** - भवति ! भिक्षां देहि।

(नेपथ्ये)

भगवन्! एषा भिक्षा। प्रतिगृह्णातु भगवान्।

**कपाली** - एष प्रतिगृह्णामि। प्रिये ! क्व मे कपालम् ?

**देवसोमा** - अहमपि न पश्यामि।

अधर्मः खल्वेष आदरोपनीताया भिक्षाया अप्रतिग्रहः

**कपाली** - (ध्यात्वा) आ, तस्मिन्नेव सुरापणे विस्मृतमिति तर्कयामि। भवतु, प्रतिनिवृत्य द्रक्ष्यावः।

**देवसोमा** - भगवन् ! अधर्मः खल्वेष आदरोपनीताया भिक्षाया अप्रतिग्रहः। किमिदानीं कुर्वः।

आपद्धर्म प्रमाणीकृत्य गोश्रृङ्गेण प्रतिगृह्यताम्।

**कपाली** - आपद्धर्म प्रमाणीकृत्य गोश्रृङ्गेण प्रतिगृह्यताम्।

**देवसोमा** - भगवन् ! तथा। (प्रतिगृह्णाति)

(उभौ परिक्रम्यावलोकयतः)

**कपाली** - कथमिहापि न दृश्यते। (विषादं रूपयित्वा) भो भो माहेश्वराः! माहेश्वराः! अस्मदीयं भिक्षाभाजनमिह भवद्भिः किं दृष्टम्? किमाहुर्भवन्तः- न खलु वयं पश्याम इति। हा हतोऽस्मि। भ्रष्ट मे तपः। केनाहमिदानीं कपाली भविष्यामि। भोः कष्टम् ।

**येन मम पानभोजन-**

**शयनेषु नितान्तमुपकृतं शुचिना।**

**तस्याद्य मां वियोगः**

**सन्मित्रस्येव पीडयति ॥११॥**

तस्याद्य मां वियोगः सन्मित्रस्येव पीडयति

(पतितः शिरस्ताडनं रूपयित्वा) भवतु। अस्ति लक्षणमात्रम्। न मुक्तोऽस्मि कपालिसंज्ञायाः। (उत्तिष्ठति।)

**देवसोमा** - भगवन् ! केन खलु गृहीतं कपालम्।

**कपाली** - प्रिये ! तर्कयामि शूल्यमांसगर्भत्वाच्छुना वा शाक्यभिक्षुणा वेति।

**देवसोमा** - तेन ह्यन्वेषणनिमित्त सर्वं काञ्चीपुरं परिभ्रमावः।

**कपाली** - प्रिये ! तथा।

(उभौ परिक्रामतः।)

(ततः प्रविशति शाक्यभिक्षुः पात्रहस्तः।)

**शाक्यभिक्षुः** - अहो उपासकस्य घनदासश्रेष्ठिनः सर्वावासमहादान महिमा, यस्मिन् मयाभिमतवर्णगन्धरसो मत्स्यमांसप्रकार बहुलोऽयं पिण्डपातः समासादितः। यावदिदानीं राजविहारमेव गच्छामि। (परिक्रम्य आत्मगतम्) भोः परमकारुणिकेन भगवता तथागतेन प्रासादेषु वासः, सुविहितशय्येषु पर्यङ्केषु शयनं, पूर्वाह्ने भोजनम् अपराह्ने सुरसानि पानकानि, पञ्चसुगन्धोपहितं ताम्बूलं, श्लक्ष्णवसनपरिधानमित्येतैरुपदेहौ भिंक्षुसङ्घस्या-नुग्रहं कुर्वता किन्नुखलु स्त्रीपरिग्रहः सुरपानविधानं च न दृष्टम्। अथवा कथं सर्वज्ञ एतन्न पश्यति। अवश्यमेतैर्दुष्टबुद्धस्थविरैर्निरुत्साहैरस्माकं तरुणजनानां मत्सरेण पिटकपुस्तकेषु स्त्रीसुरापान विधानानि परामृष्टानीति तर्कयामि। कुत्र नुखल्वहं विनष्टमूलपाठं समासादयेयम्। ततः सम्पूर्णं बुद्धवचनं लोके प्रकाशयन् सङ्घोपकारं करिष्यामि। (परिक्रामति)

**देवसोमा** - भगवन्! पश्य। एष रक्तपटोऽस्मिन् विश्वस्तपुरुषसम्पाते राजमार्गे सङ्कुचितसर्वाङ्ग उभयपक्षसञ्चारितदृष्टिः शङ्किपदविक्षेपस्त्वरितत्वरितं गच्छति।

**कपाली** - प्रिये! एवमेतत्। अपिचास्य हस्ते चीवरान्तःप्रच्छादितं किमप्यस्तीव।

**देवसोमा** - भगवन् ! तेन हि अवलम्ब्यासाद्य जानीवः।

**कपाली** - भवति ! तथा। (उपगम्य) भो भिक्षो तिष्ठ।

**शाक्यभिक्षुः** - कोनुखलु मामेवं भणति। (निवृत्यावलोक्य) अयि! अयमेकाम्रवासी दुष्टकापालिकः। भवतु, अस्य सुराविभ्रमस्य लक्ष्यं न भवामि। (सत्वरं गच्छति)।

कपालचोरं मत्वा सत्यसोमा भिक्षुं निवारयति

**कपाली** - प्रिये ! हन्त लब्धं कपालम्। अस्य हि मद्दर्शनजनितभयात् त्वरैव चौर्यसाक्षित्वं प्रतिपन्ना। (द्रुतमुपगम्याग्रतो रुणद्धि।) आ धूर्त ! क्वेदानीं गमिष्यसि।

**शाक्यभिक्षुः** - कापालिकोपासक! मा मैवम्। किमेतत्। (आत्मगतम्) अहो ललितरूपा उपासिका।

**कपाली** - भो भिक्षो! दर्शय तावत्। यावदेतत् ते पाणौ चीवरान्तःप्रच्छादितं द्रष्टुमिच्छामि।

**शाक्यभिक्षुः** - किमत्र द्रष्टव्यम्। भिक्षाभाजनं खल्वेतत्।

**कपाली** - अत एव द्रष्टुमिच्छामि !

**शक्यभिक्षः** - आः, उपासक ! मा मैवम् । प्रछन्नं खल्वेतन्नेतव्यम् ।

**कपाली** - नूनमेवमादिप्रच्छादननिमित्तं बहुचीवरधारणं बुद्धेनोपदिष्टम्।

**शाक्यभिक्षुः** - सत्यमेतत् ।

**कपाली** - इदं तत् संवृतसत्यम्। परमार्थसत्यं श्रोतुमिच्छामि।

**शाक्यभिक्षुः** - भवत्वेतावान् परिहासः। अतिक्रामति भिक्षावेला। साधयाम्यहम्। (प्रतिष्ठते)

**कपाली** - धूर्त ! क्व गमिष्यसि। दीयतां मे कपालम्। (चीवरान्तमालम्बते।)

**शाक्यभिक्षः** - नमो बुद्धाय।

खरपटादप्यास्मिन्न धिकारे बुद्धएवाधिकः

**कपाली** - नमः खरपटायेति वक्तव्यं, येन चोरशास्त्रप्रणीतम्। अथवा खरपटादप्यास्मिन्नधिकारे बुद्ध एवाधिकः। कुतः,

**वेदान्तेभ्यो गृहीत्वार्थान् यो महाभारतादपि।**
**विप्राणं मिषातामेव कृतवान् कोशसञ्चयम्** ॥१२॥

**शाक्यभिक्षुः** - शान्तं पापं, शान्तं पापम्।

**कपाली** - एवं सुवृत्तस्य तपस्विनः कथमिव पापं न शाम्यति।

**देवसोमा** – भगवन् ! परिभ्रान्त इव लक्ष्यसे। नैतत् सुखोपायसुलभं कपालम्। तदेतेन गोशृङ्गेण सुरां पीत्वा जातबलो भूत्वाऽनेन सह विवादं कुरु।

**कपाली** - तथास्तु । (देवसोमा कपालिने सुरां प्रयच्छति।)

**कपाली** - (पीत्वा) प्रिये ! त्वयापि श्रमापनोदः कर्त्तव्यः।

**देवसोमा** - भगवन् ! तथा। (पिवति)

**कपाली** - अयमस्माकमपकारी। संविभागप्रधानः स्वसिद्धान्तः। शेषमाचार्याय प्रदीयताम्।

**देवसोमा** - यद् भगवानाज्ञापयति। गृह्णातु भगवान्।

**शाक्यभिक्षुः** - (आत्मगतम्) अहो सुखोपनतोऽभ्युदयः। एतावान् दोषः- महाजनो द्रक्ष्यति। (प्रकाशम्) भवति! मा मैवम्। न वर्धतेऽस्माकम्।

**देवसोमा** - ध्वंसत्व। कुतस्ते एतावन्ति भागधेयानि।

**कपाली** - प्रिये ! इयमस्येच्छाविरोधिनी वाग्मुखप्रसेकेन स्खल।

**शाक्यभिक्षुः** - इदानीमपि नास्ति ते करुणा।

**कपाली** - यद्यस्ति करुणा, कथं वीतरागो भविष्यामि।

**शाक्यभिक्षुः** - एवं वीतरागिणा वीतरोषेणापि भवितव्यम्।

**कपाली** - वीतरोषो भविष्यामि, यदि मे स्वकं दास्यति।

**शाक्यभिक्षुः** - किं ते स्वकम्।

**कपाली** - कपालम्।

**शाक्यभिक्षुः** - कथं कपालम्।

**कपाली** - कथं कपालमित्याह। अथवा युक्तमेतत्।

**दृष्टानि वस्तूनि महीसमुद्र-**
**महीधरादीनि महान्ति मोहात्।**
**अपह्नुवानस्य सुतः कथं त्व-**
**मल्पं न निह्नोतुमलं कपालम् ।।१३।।**

**देवसोमा** - भगवन्! केवलं लाल्यमानो न दास्यति। तदेतस्य हस्तादाच्छिद्य गच्छावः।

**कपाली** - प्रिये! तथा। (आच्छेत्तुं व्याप्रियते।)

**शाक्यभिक्षुः** - ध्वंसस्व दुष्टकापालिक !

**कपाली** - कथं पतितोऽस्मि।

**देवसोमा** - मृतोऽसि दास्याःपुत्र!

**शाक्यभिक्षुः** - (आत्मगतम्) अर्हं बुद्धस्य विज्ञानं, येन मुण्डनं दृष्टम्। (प्रकाशम्) उत्तिष्ठोत्तिष्ठ उपासिके। उत्तिष्ठ। (इति देवसोमामुत्थापयति।)

**कपाली** - पश्यन्तु पश्यन्तु माहेश्वराः अनेन दुष्टभिक्षुनामधारकेण नागसेनेन मम प्रियतमापाणिग्रहणं क्रियमाणम्।

**शाक्यभिक्षुः** - आ उपासक ! (आयुष्मन् ! वा) मा मैवम्। धर्मः खल्वस्माकं विषमपतितानुकम्पा।

**कपाली** - किमयमपि सर्वज्ञधर्मः। नन्वहं पूर्वं पतितोऽस्मि। भवतु, किमनेन। इदानीं तव शिरःकपालं मम भिक्षाकपालं भविष्यति।

(सर्वे कलहं रूपयन्ति)

**शाक्यभिक्षुः** - दुःखं दुःखम्।

**कपाली** - पश्यन्तु पश्यन्तु माहेश्वराः। एष दुष्टभिक्षुनामधारको मम भिक्षाकपालं मुषित्वा स्वयमेवाक्रन्दति। भवतु, अहमप्याक्रोशयिष्ये। अब्रह्मण्यम् अब्रह्मण्यम्।

(ततः प्रविशति पाशुपतः)

**पाशुपतः** - सत्यसोम ! किमर्थमाक्रन्दसि।

बभ्रुकल्पो नाम पाशुपतः प्रविशति

**कपाली** - भो बभ्रुकल्प! अयं दुष्टभिक्षुनामधारको नागसेनो मम भिक्षाकपालं चोरयित्वा दातुं नेच्छति।

**पाशुपतः** - (आत्मगतम्) यदस्माभिरनुष्ठेयं, गन्धर्वैः तदनुष्ठितम्! एष दुरात्मा,

**तां क्षौरिकस्य दासीं मम दयितां चीवरान्तदर्शितया।**

**आकर्षति काकण्या बहुशो गां ग्रासमुष्ट्येव ।।१४।।**

तदिदानीं प्रतिहस्तिप्रोत्साहनेन शत्रुपक्षं ध्वंसयामि

तदिदानीं प्रतिहस्तिप्रोत्साहनेन शत्रुपक्षं ध्वंसयामि। (प्रकाशम्) भो नागसेन ! अप्येवमेतद्, यथायमाह।

नागसेनः बौद्धधर्मोपदेशं करोति

**शाक्यभिक्षुः** - भगवन्! त्वमप्येवं भणसि। अदत्तादानाद्विरमणं शिक्षापदम्। मृषावादाद्विरमणं शिक्षापदम्। अब्रह्मचर्याद्विरमणं शिक्षापदम्। प्राणातिपाताद्विरमणं शिक्षापदम्। अकाल भोजनाद्विरमणं शिक्षापदम्। अस्माकं बुद्धं धर्मं शरणं गच्छामि।

**पाशुपतः** - सत्यसोम ! ईदृश एषां समयः। किमत्र प्रतिवचनम्।

**कपाली** - नन्वस्माकमनृतं न वक्तव्यमिति समयः।

**पाशुपतः** - उभयमप्युपपन्नम्। कोऽत्र निर्णयोपायः।

**शाक्यभिक्षुः** – बुद्धवचनं प्रमाणीकुर्वन् भिक्षुःसुराभाजनं गृह्णातीति कोऽत्र हेतुः।

**पाशुपतः** - नहि प्रतिज्ञामात्रेण हेतुवादिनः सिद्धिरस्ति।

**कपाली** - प्रत्यक्षे हेतुवचनं निरर्थकम्।

**पाशुपतः** - कथं प्रत्यक्षमेव।

**देवसोमा** - भगवन्! एतस्य हस्ते चीवरान्तःप्रच्छादितं कपालम्।

**पाशुपतः** - श्रुतं भवता।

**शाक्यभिक्षुः** - भो भगवन् ! एतत् कपालं न परकीयम्।

**कपाली** - तेन हि दर्शय तावत्।

**शाक्यभिक्षुः** - तथा। (दर्शयति।)

**कपाली** - पश्यन्तु पश्यन्तु माहेश्वराः कापालिकेन कृतमन्याय्यमस्य भदन्तस्य साधुवृत्ततां च।

**शाक्यभिक्षुः** - अदत्तादानाद्विरमणं शिक्षापदम्। (इति पुनस्तदेव पठति।)

(उभौ नृत्यतः।)

**शाक्यभिक्षुः** - हा धिक्। लज्जितव्ये काले नृत्यति।

**कपाली** - आः को नृत्यति। (सर्वतो विलोक्य) आ मम नष्टभिक्षाभाजनं दर्शनकुतूहलमलयानिलप्रयुक्तायाध्रुवमस्यनृत्तबुद्धिः प्रीतिलताया विलसितेषु।

**शाक्यभिक्षुः** - भगवन् ! केन कारणेनैतन्न लक्ष्यते। भोः आचष्टां भगवान्। अस्यायं वर्णः।

**कपाली** - किमत्र वक्तव्यम्। तनुमया दृष्टम्। काकादपि कृष्णमिदं कपालम्!

**शाक्यभिक्षुः** - तेन ह्येतन्मदीयमिति स्वयमेवाभ्युपगतम्।

**कपाली** - सत्यमभ्युपगतं तव वर्णान्तरकरणे नैपुण्यम्।

पश्य,

**यदेतदासीत् प्रथमं स्वभावतो**
**मृणालभङ्गच्छविचोरमम्बरम्।**
**ननु त्वया नीतमचिन्त्यकर्मणा**
**तदेव बालारुणरागताम्रताम् ॥१५॥**

अपि च,

**आवृतं बहिरन्तश्च कषायेणानपायिना।**
**त्वां प्राप्तं स्यात् कथं नाम कपालमकषायितम् ॥१६॥**

**देवसोमा** - हा हतास्मि मन्दभागा। सर्वलक्षणसम्पन्नतया कमलासन-शीर्षकपालानुभावस्य पौर्णमासीसोमदर्शनस्य नित्यसुरागन्धिन एतस्य मलिनपटसंसर्गेणेयमीदृश्यवस्था संवृत्ता। (इति रोदिति)।

महान्ति भूतानि प्रायश्चित्तैरपनीतकल्मषाणि भवन्ति

**कपाली** - प्रिये ! अलं सन्तापेन। पुनः शुचिर्भविष्यति। श्रूयन्ते हि "महान्ति भूतानि प्रायश्चित्तैरपनीतकल्मषाणि भवन्ति"। तथाहि-

आस्थाय प्रयतो महाव्रतमिदं बालेन्दुचूडामणिः
स्वामी नो मुमुचे पितामहशिरश्छेदोद्भवादेनसः।
नाथोऽपि त्रिदिवौकसां त्रिशिरसं त्वष्टुस्तनूजं पुरा
हत्वा यज्ञशतेन शान्तदुरितो भेजे पुनःपुण्यताम् ।।१७।।

भो ! बभ्रुकल्प! नन्वेवमेतत्।

**पाशुपतः** - आगमानुगतमभिहितम्।

**शाक्यभिक्षुः** - भोः! वर्णस्तावन्मया कृतः। अस्य संस्थानपरिमाणं केन निर्मितम्।

**कपाली** - ननु मायासन्तानसम्भवाः खलु भवन्तः।

**शाक्यभिक्षुः** - कियतीं वेलां भवन्तमाक्रोशामि। गृह्णातु भगवान्।

**कपाली** - नूनमेवं बुद्धेनापि दानपारमिता पूरिता।

बुद्धधर्मसिद्धान्तं खण्डयति

**शाक्यभिक्षुः** - एवं गते किमिदानीं मे शरणम्।

**कपाली** - ननु बुद्धधर्मसङ्घाः।

**पाशुपतः** - नायं व्यवहारो मया परिच्छेत्तुं शक्यते।

तदधिकरणमेव यास्यामः।

**देवसोमा** - भगवन् ! यद्येवं, नमः कपालाय।

**पाशुपतः** - कोऽभिप्रायः।

**देवसोमा** - एष पुनरनेकविहारसमधिगतवित्तसञ्चयो यथाकाममधिकरणकारणिकानां मुखानि पूरयितुं पारयति। अस्माकं पुनरहिचर्मभूतिमात्रविभवस्य दरिद्रकापालिकस्य परिचारिकाणां कोऽत्र विभवोऽधिकरणं प्रवेष्टुम्।

**पाशुपतः** - नैतदेवम् ।

निर्णयार्थं न्यायालयं गन्तुं बभ्रुकल्पः तौ उपदिशति

अजिह्मैः सारगुरुभिः स्थिरैः श्लक्ष्णैः सुजन्मभिः।
तैर्धर्मो धार्यते स्तम्भैः प्रासाद इव साधुभिः ।।१८।।

**कपाली** - कृतमनेन। कुतश्चिदपि न्याय्यवृत्तेर्भयं नास्ति।

**शाक्यभिक्षुः** - भो भगवन् ! त्वं तावदग्रतो भव।

**पाशुपतः** - बाढम् ।

(सर्वे परिक्रामन्ति)

(ततः प्रविशत्युन्मत्तकः।)

विक्षिप्तचित्तः उन्मत्तकः स्वहस्ते कपालं स्वीकृत्य प्रविशति

**उन्मत्तकः** - एष एप दुष्टकुक्कुरः। शूल्यमांसगर्भं कपालं गृहीत्वा धावसि। दास्याःपुत्र! कुत्र गमिष्यसि। एष इदानीं कपालं निक्षिप्य मां खादितुकामोऽभिमुखमाधावति। (दिशो विलोक्य) अनेन प्रस्तरेण दन्तानस्य भङ्क्ष्यामि। कथं कपालमुक्तित्वा पलायसे। उन्मत्तो दुष्टकुकुर ईदृशेन नाम शूरत्वेन मया सहापि रोषं करोषि। ग्रामसूकरमारुह्य गगनमुत्पतितेन सागरेण प्रभञ्ज्य रावणं बलाद् गृहीतः शक्रसुतस्तिमिङ्गिलः। अयि एरण्डवृक्ष! किं भणसि अलीकमलीकमिति। नन्वेष मुसलसमविशाललम्बहस्तो दर्दुरो मे साक्षी। अथवा त्रैलोक्यविदितपराक्रमस्य साक्षिणा किं कार्यम्। एवं करिष्यामि। कुक्कुरखादितशेषं मांसखण्डं खादिष्यामि।

(खादन् भ्रान्तः।) हा हा बाष्पेण मारितोऽस्मि (रुदित्वा विलोक्य) क एष मां ताडयसि। (विलोक्य।)

दुष्टदारकाः ! यस्य वा कस्य वा भागिनेयः खल्वहं, भीमसेनस्य घटोत्कच इव। अपि च शृणुथ,

**गृहीतशूला बहुवेषधारिणः**
**शतं पिशाचा उदरे वहन्ति मे।**
**शतं च व्याघ्राणां निसर्गभीषणं**
**मुखेन मुञ्चाम्यहं महोरगान् ।।१९।।**

कथं मां बाधन्ते। प्रसीदन्तु दारकभर्तारः। अस्य मांसखण्डस्य कारणाद् मा मां बाधध्वम्। (अग्रतो विलोक्य) एष खल्वस्माकमाचार्यः शूरनन्दी। यावदेनमुपसर्पामि। (इति धावति)

**पाशुपतः** - अये ! अयमुन्मत्तकः इत एवाभिवर्तते। य एषः,

**निर्विष्टोज्फितचित्रचीवरधरो रूक्षैर्नितान्ताकुलैः**
**केशैरुद्धतभस्मपांसुनिचयैर्निर्माल्यमालाकुलैः।**
**उच्छिष्टाशनलोलुपैर्बलिभुजामन्वास्यमानो गणै-**

**भूर्यान् ग्रामकसारसञ्चय इव भ्राम्यन् मनुष्याकृतिः ॥२०॥**

**उन्मत्तकः** - यावदेनमुपसर्पामि (उपसृत्य)। महासाधोश्चण्डालकुक्कुरस्य सकाशादधिगतमेतत् कपालं प्रतिगृह्णातु भगवान्।

**पाशुपतः** - (सदृष्टिक्षेपम्) पात्रे प्रतिपाद्यताम्।

**उन्मत्तकः** - महाब्राह्मण ! क्रियतां प्रसादः।

**शाक्यभिक्षुः** - एव महापाशुपत एतस्य योग्यः।

**उन्मत्तकः** - (कपालिनमुपगम्य कपालं भूमौ निक्षिप्य प्रदक्षिणीकृत्य पादयोः पतित्वा) महादेव ! क्रियतां प्रसादः। एष तेऽञ्जलिः।

**कपाली** - अस्मदीयं कपालम्।

**देवसोमा** - एवमेतत्।

**कपाली** - भगवत्प्रसादात् पुनरपि कपाली संवृत्तः। (ग्रहीतुमिच्छति।)

**उन्मत्तकः** - दास्याःपुत्र! विषं खाद। (कपालमाच्छिद्य गच्छति।)

**कपाली** - (अनुसृत्य) एष यमपुरुषो मे जीवितं हरति। अभ्यवपद्ये तां भवन्तौ।

**उभौ** - भवतु ! आवां ते सहायौ भवावः।

(सर्वे रुन्धन्ति)

**कपाली** - भोः ! तिष्ठ तिष्ठ।

**उन्मत्तकः** - कस्मान्मां रुन्धन्ति।

**कपाली** - अस्मदीयं कपालं दत्वा गम्यताम्।

**उन्मत्तकः** - मूढ ! किं न पश्यसि, सुवर्णभाजनं खल्वेतत्।

**कपाली** - एवंविधं सुवर्णभाजनं केन कृतम्।

**उन्मत्तकः** - एतेन सुवर्णवर्णपटावृतेन सुवर्णकारावुत्तेन कृतमिति भगवन्! सुवर्णभाजनमिति भणामि।

**शाक्यभिक्षुः** - किं भणासि।

**उन्मत्तकः** - सुवर्णभाजनमिति।

**शाक्यभिक्षुः** - किमयमुन्मत्तकः।

कपालं कापालीकः स्वीकरोति

**उन्मत्तकः** - उन्मत्तक इति बहुश एतं शब्दं श्रृणोमि। एतद् गृहीत्वा दर्शयोन्मत्तकम्। (कपालिने कपालं प्रयछति)

**कपाली** - (कपालं गृहीत्वा) अयमिदानीं कुड्येनान्तर्हितः! शीघ्रमनुगम्यताम्।

**उन्मत्तकः** - लब्धप्रसादोऽस्मि।

(निष्क्रान्तो जवेनोन्मत्तकः।)

**शाक्यभिक्षुः** - अहो आश्चर्यम्। परपक्षस्य लाभेनाहं परितुष्टोऽस्मि।

**कपाली** - (कपालं परिष्वज्य)

**चिरं मया चरितमखण्डितं तपो**
**महेश्वरे भगवति भक्तिरस्ति मे।**
**तिरोहितः स तु सहसा सुखेन न-**
**स्त्वमद्य यत् कुशलि कपाल ! दृश्यसे ।।२१।।**

**देवसोमा** - भगवन्! चन्द्रसमागतमिव प्रदोषं भगवन्तं पश्यन्त्या अद्यानन्दतीव मे दृष्टिः

**पाशुपतः** - दिष्ट्या भवान् वर्धते।

**कपाली** - नन्वभ्युदयो भवतामेव।

**पाशुपतः** - (आत्मगतम्) सत्यमेतत् - नास्त्यदोषवतां भयमिति। यदयमद्य भिक्षुर्व्याघ्रमुखात् परिभ्रष्टः। (प्रकाशम्) यावदहमिदानीमेव सुहृदभ्युदयकृत-मानन्दं पुरोधाय भगवतः पूर्वस्थली निवासिनो धूमवेलां प्रतिपालयामि। अयं चाद्यप्रभृति,

**विरोधः पूर्वसम्बद्धो युवयोरस्तु शाश्वतः।**
**परस्परप्रीतिकरः किरातार्जुनयोरिव ।।२२।।**

(निष्क्रान्तः पाशुपतः।)

कापालिकः नागसेनस्य पुरतः क्षमायाचनं करोति।

**कपाली** - भो नागसेन! यन्मयापराधः कृतः, तत् प्रसन्नहृदयं त्वामिच्छामि।

**शाक्यभिक्षुः** - किमेतदप्यभ्यर्थनीयम्। किं ते प्रियं करोमि?

**कपाली** - यदि मे भगवान् प्रसन्नः, किमतः परमहमिच्छामि।

**शाक्यभिक्षुः** - गच्छामि तावदहम्।

**कपाली** - गच्छतु भवान् पुनर्दर्शनाय।

**शाक्यभिक्षुः** - तथा भवतु । (निष्क्रान्तः)

**कपाली** - प्रिये देवसोमे ! गच्छावस्तावत् ।

(भरतवाक्यम्)

**शश्वद् भूत्यै प्रजानां वहतु विधिहुतामाहुतिं जातवेदा**
**वेदान् विप्रा भजन्तां सुरभिदुहितरो भूरिदोहा भवन्तु**
**उद्युक्तः स्वेषु धर्मेष्वयमपि विगतव्यापदाचन्द्रतारं**
**राजन्वानस्तु शाक्तिप्रशमितरिपुणा शत्रुमल्लेनलोकः**।।२३।।

(निष्क्रान्तौ ।)

मत्तविलासप्रहसनं समाप्तम्

## Summarised Overview

सर्वप्राचीनः प्रहसनग्रन्थः मत्तविलासः। तस्य रचयिता पल्लवनरेशस्य सिंहविष्णुवर्मणः पुत्रो महेन्द्रविक्रमवर्माऽऽसीत्। अयं च राजा हर्षवर्धनपुलकेशिद्वितीययोः समकालिक इत्यतः तस्य समयः क्रिस्त्वब्दसप्तमशतकस्य पूर्वार्धभागः। अत्र हि काञ्चीपुर्याः नागरिकजीवनं चित्रितमस्ति। ग्रन्थे अस्मिन् बौद्ध-कापालिक-पाशुपतादीनां दुर्व्यसनग्रस्तत्वं दर्शितं सनिपुणम्।

महाकविमहेन्द्रविक्रमवर्मप्रणीते मत्तविलासप्रहसने काञ्चीपुरनगरमार्गे सत्यसोमनामा कापालिकः मद्यपानं कृत्वा देवसोमा नाम्न्याः युवत्याः सौन्दर्यं प्रशंस्य तया सह विहरति। पुनः सः कापालिकधर्मप्रवर्तकस्य परमशिवं स्तुतिं करोति। देवसोमा जैनधर्मसिद्धान्तानुसारेण तस्य वाक्यानि खण्डयति। तदनु विनष्टं कपालमन्विष्य उभौ काञ्चीनगरे भ्रमणं कुरुतः। एतस्मिन्नन्तरे नागसेननामकशाक्यभिक्षुः स्वकीयं भिक्षापात्रं वस्त्रान्तरे गोपयित्वा प्रविशति। स तु उपासकस्य धनदासस्य मन्दिरात् सम्यग् भोजनं कृत्वा राजविहारं गच्छति। काञ्चीपुरस्य प्रसिद्धं शिवक्षेत्रं नाम एकाम्रनाथम्। तदानीं तं कपालचोरं मत्वा सत्यसोमा गृह्णाति। कापालिकस्य प्रश्नस्य उत्तररूपेण नागसेनः वदति यत् बुद्धोपदेशानुसारेण भिक्षापात्रं निगूह्य एव गन्तव्यमिति।

नागसेनः देवसोमाम् अतिलोलुपतया अवलोकयति। देवसोमा कापालिकं वदति यत् मदिरां पीत्वा शक्तिम् अर्जयित्वा भिक्षुणा सह विवादं कर्तुं आगन्तव्यम् इति। कापालिकः मदिरां पिबति, नागसेनाय अपि

मदिरां दातुं देवसोमां प्रेरयति। पुनः कापालिका बलपूर्वकं नागसेनात् भिक्षापात्रं ग्रहीतुं प्रवर्तते। किन्तु नागसेनस्य प्रहरात् पतितो भवति। तन्मिथः देवसोमा अपि पतति। नागसेनः देवसोमां हस्तं गृहीत्वा यदा उत्थापयति तदा कापालिकः उच्चैर्वदति यत् नागसेनः तस्य प्रियायाः पाणिग्रहणं करोति इति।

अस्मिन्नवसरे बभ्रुकल्पो नाम पाशुपतः प्रविशति। नागसेनः बौद्धधर्मोपदेशं करोति। पुनरपि भिक्षापात्रविषये कोलाहलः भवति। निर्णयार्थं न्यायालयं गन्तुं बभ्रुकल्पः तौ उपदिशति। अस्मिन् क्षणे कोऽपि विक्षिप्तचित्तः उन्मत्तकः स्वहस्ते कापालिकस्य कपालं स्वीकृत्य प्रविशति। एवं तद्हस्तात् कपालं कापलिकः स्वीकरोति। प्रसन्नः कापालिकः नागसेनस्य पुरतः क्षमायाचनं करोति। ततः भरतवाक्यानन्तरं प्रहसनं समाप्तिम् एति।

# Assignments

उत्तरं लिखत।

1. सत्यसोमः कापालिकधर्मप्रवर्तकस्य परमशिवस्य स्तुतिं करोति। कथम्?
2. देवसोमा जैनधर्मसिद्धान्तानुसारेण सत्यसोमस्य वाक्यानि खण्डयति। विशदयत।
3. सत्यसोमनामा कापालिकः कुत्र निवसति ?
4. खरपटादप्यास्मिन्नधिकारे बुद्ध एवाधिकः। कुतः?

व्याख्यात।

1. पेया सुरा प्रियतमामुखमीक्षितव्यं
   ग्राह्यः स्वभावललितो विकृतश्च वेषः।
   येनेदमीदृशमदृश्यत मोक्षवर्त्म
   दीर्घायुरस्तु भगवान् स पिनाकपाणिः ।।७।।
2. येन मम पानभोजन-
   शयनेषु नितान्तमुपकृतं शुचिना।
   तस्याद्य मां वियोगः
   सन्मित्रस्येव पीडयति ।।११।।
3. यदेतदासीत् प्रथमं स्वभावतो
   मृणालभङ्गच्छविचोरमम्बरम्।

ननु त्वया नीतमचिन्त्यकर्मणा
तदेव बालारुणरागताम्रताम् ।।१५।।

**टिप्पणिं लिखत ।**

1. ‘एष सुरापणो यज्ञवाट विभूतिमनुकरोति’।
2. ‘अद्यप्रभृति मद्यनिषेवणान्निवृत्तोऽस्मि’। सन्दर्भं विशदयत।
3. ‘अधर्मः खल्वेष आदरोपनीताया भिक्षाया अप्रतिग्रहः’। सन्दर्भं विशदयत।
4. ‘आपद्धर्म प्रमाणीकृत्य गोश्रृङ्गेण प्रतिगृह्यताम्’। सन्दर्भं विशदयत।
5. ‘तदिदानीं प्रतिहस्तिप्रोत्साहनेन शत्रुपक्षं ध्वंसयामि’। सन्दर्भं विशदयत।
6. धर्मः खल्वस्माकं विषमपतितानुकम्पा।

**आशयं विशदयत ।**

1. यदुत करणभोग्यं कामभोगात्मकं च ।।९।।

**निबन्धात्मकप्रश्नौ ।**

1. संस्कृतरूपकसाहित्ये मत्तविलासप्रहसनस्य स्थानं सङ्क्षिप्य वर्णयत।
2. मत्तविलासप्रहसने महेन्द्रविक्रमेण कृतं सामूहिकविमर्शनमधिकृत्य उपन्यस्यत।

# Suggested Readings


1. Tantra In practice, Edited by David Gordon White, Princeton Reading in Religion,@Copyright Princeton University Press.
2. "A Parody of the Kapalikas in the Mattavilasa" by David N. Lorenzen
3. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
4. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी।
5. A Short History of Sanskrit Literature - T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
6. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992


# References

1. Mattavilasaprahasana of Mahendravikraman, Edited and translated by N.P.Unni, Nag Publishers, Delhi, 1974
2. Mattavilasaprahasana of Mahendravikraman, edited by Ganapathi Sastri, published under the authority of the government of His Highness the Maharaja of Travancore, printed by the superintendent, government press, 1917
3. Mattavilasaprahasanam, Malayalam, translated by Sunilkumar, Elamkulam, Muthukurissi
4. The Kapalikas and Kalamukhas – Two lost Saivaites sects, David N. Lorenzen, Motilal Banarasidass, Delhi, 1972

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

Model Question Paper (SET – A)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No...............** **QP CODE.................**

**Name.......................**

**SECOND SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 5 - M23SN05DC - संस्कृतनाटकम्**

**(CBCS- PG)**

**2023 - Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

**सर्वेप्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या। (Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A

**(प्रथमो भागः)**

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a paragraph)**

1. नाटकशब्दस्य निष्पत्तिं लिखत।
2. कालिदासस्य प्रथमं नाटकं किम्? तस्य प्रशस्ततमं नाटकं किम्?
3. विशाखदत्तस्य मुद्राराक्षसे अङ्काः कति? के च ते ?
4. विषप्रदानेन चन्द्रगुप्तमौर्यवधाय राक्षसेण नियुक्तः कः? विशदयत।
5. मुण्डितमुण्डो नक्षत्राणि पृच्छति। सन्दर्भं विशदयत।
6. 'अलक्षितनिपाता पुरुषाणां समविषमदशापरिणतयो भवन्ति' कुतः?
7. प्रहसनस्य भेदान् लिखत।
8. "भगवदज्जुकीयम्" नाम प्रहसनस्य नामवैशिष्ट्यं किम्?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत। (6 x 5=30)**
**(Answer any six Questions in a page)**

9. नाटकलक्षणं विशदयत।

10. कालिदासेन कति नाटकानि रचितानि? विशदयत।

11. “नाटकं ख्यातवृत्तं स्यात्” -सप्रसङ्गं व्याख्यात।

12. कुटिलमतिः कौटिल्यः। उक्तिमिमां स्पष्टयत।

13. अत्यादरः शङ्कनीयः। सप्रसङ्गं व्याख्यात।

14. किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्। सप्रसङ्गं व्याख्यात।

15. राक्षसं प्रति मलयकेतोः सन्देहः।

16. राक्षसस्य कुसुमपुरागमनान्तरं स्वस्य दुर्दशायाः, तथा विनयस्य च पश्चात्तापं विशदयत।

17. प्रहसनस्य लक्षणं कृत्वा तद् भेदान् च प्रतिपादयत।

18. भाणवत् प्रहसनमपि धूर्तचरित्रात्मकम्। विशदयत।

## SECTION – C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x15=30)**
**(Write an essay on any two of the following)**

19. दशरूपकेषु नाटकस्य स्थानं किमिति विचारयत।

20. मुद्राराक्षसे प्रथमाङ्कस्य कथां स्ववाक्यैः वर्णयत।

21. मुद्राराक्षसानुसारं विशाखदत्तस्य राजनीतिनैपुण्यं निरूपयत।

22. संस्कृतरूपकसाहित्ये मत्तविलासप्रहसनस्य स्थानं विचारयत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. NO................** **QP CODE..................**

**Name........................**

**SECOND SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 5 - M23SN05DC - संस्कृतनाटकम्**

**(CBCS- PG)**

**2023 – Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या। **(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A

**(प्रथमो भागः)**

**I.** एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5 x 2=10)**

**(Answer any five Questions in a paragraph)**

1. ‘अर्थप्रकृतयः काः?
2. मुद्राराक्षसनाटकं कीदृशं नाटकं भवति?
3. कौमुदीमहोत्सवनिषेधस्य कारणं किम्?
4. “पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी”। कस्येयमुक्तिः? विशदयत।
5. अथाऽग्निप्रवेशे तव सुहृदः को हेतुः? विशदयत।
6. सर्वथा स्थाने यशस्वी चाणक्यः। कुतः ?
7. सत्यसोमः कापालिकधर्मप्रवर्तकस्य परमशिवं स्तुतिं करोति। कथम्?
8. खरपटादप्यास्मिन्नधिकारे बुद्धएवाधिकः। कुतः?



SGOU

## SECTION –B

(द्वितीयो भागः)

**II.** एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत। **(6 x 5=30)**

**(Answer any six Questions in a page)**

9. 'काव्येषु नाटकं रम्यम्'- उक्तिमिमां स्पष्टयत।
10. मृच्छकटिकं राष्ट्रस्य समाजस्य चोत्कृष्टं निदर्शनमिति सप्रमाणं निरुपयत।
11. वेणीसंहारस्य वैशिष्ट्यम्।
12. चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः। सप्रसङ्गं आशयं विशदयत।
13. परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः। सप्रसङ्गं व्याख्यात।
14. दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः।

    कल्याणकुलधराणां देवनाञ्च मनुष्यदेवानाम् ॥ श्लोकमिमं व्याख्यात।
15. 'कार्याणां गतयो विधेरपि न यान्त्याज्ञाकरत्वं चिरात्'। विशदयत।
16. राक्षसं चन्द्रगुप्तस्य अमात्यं कर्तुं चाणक्यस्य नयः कः आसीत्?
17. 'अद्यप्रभृति मद्यनिषेवणान्निवृत्तोऽस्मि'। सन्दर्भं विशदयत।
18. यदुत करणभोग्यं कामभोगात्मकं च। आशयं विशदयत।

## SECTION – C

(तृतीयो भागः)

**III.** केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। **(2x15=30)**

**(Write an essay on any two of the following)**

19. भासनाटकचक्रम्।
20. दशरूपकेषु मुद्राराक्षसस्य स्थानम्।
21. चाणक्यस्य स्वभावचित्रणम्।
22. संस्कृतरूपकसाहित्ये प्रहसनस्य स्थानम्।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

संस्कृतनाटकम्

COURSE CODE: M23SN05DC

SGOU

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-971228-4-2
9 788197 122842